
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

मिताक्षरा प्रथमोऽध्यायः १

१

श्रीगणेशाय नमः ॥ योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयोऽब्रुवन् ॥ वर्णाश्रमेतराणां नो ब्रूहि ध
र्मानशेषतः १ मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाब्रवीन्मुनीन् ॥ यस्मिन्देशे मृगः कृष्ण
स्तस्मिन्धर्मान्निबोधत २ धर्माधर्मौ तद्विपाकास्त्रयोपि क्लेशाः पंच प्राणिनामापतंते
यस्मिन्लीने नोपरामृष्ट ईशो यत्तं वंदे विष्णुमोंकारवाच्यं ॥ याज्ञवल्क्यमुनिभाषितं मुहुर्वि
श्वरूपविकटोक्तिविस्तृतं ॥ धर्मशास्त्रमृजुभिर्मिताक्षरैर्बालबुद्धिविधये विविच्यते २
याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपं याज्ञवल्क्यमुनिप्रणीतं धर्मशास्त्रं संक्षिप्य कथ
यामास ॥ यथा मनुप्रणीतं भृगुः ॥ तस्य चायमाद्यश्लोकः योगीनां शासनं ॥ कादीनामीश्वरः
प्रभुः ॥ तं याज्ञवल्क्यं सेज्ञं संपूज्य मनोवाक्कायकर्मभिः ॥ पूजयित्वा मुनयः मामण्डव्यप्र
भृतयः श्रवणधारणयोग्या अब्रुवन् ॥ उक्तवंतः धर्मान्नोऽस्मभ्यं ब्रूहि कथय अशेषतः का
र्त्स्न्येन केषां वर्णाश्रमेतराणां वर्णा ब्राह्मणादयः ॥ आश्रमा ब्रह्मचारिप्रभृतयः ॥ तरे अनु
लोमप्रतिलोमजाता मूर्द्धावसिक्तादयः ॥ इतरशब्दस्य द्वंद्वे चेति सर्वनामसंज्ञाप्रतिषेध

१

बोनतुरंसोऽभिचारतो॥ समाचारनमाचष्टव्यावत्तव्यःसमेनसे॥ अष्टकवस्त्रादिन
रोभवतीतिकिंल्बिवीति मनुस्मरणात्॥ रिपौमित्रेचत्ति॥ रा इदं नो करं जनार्थकानि
पार्थिवैर्गाभिरध्यधिष्ठितंसदः॥ कर्तव्यं॥ यथाहकात्यायनः॥ कुलशीलवयोवृत्त
वित्तवद्भिरमत्सरैः॥ वणिग्भिः स्यात्कतिपयैः॥ कुलभूतैरधिष्ठितमिति॥ ७॥ व्य
वहारान्नृपःपश्येदित्युक्तंतत्रानुकल्पमाह॥ यदानकार्यंचरणाद्व्यवहारान्नृ
पिणातु॥ सभ्यैःसहनियोक्तव्योब्राह्मणः॥ सर्वधर्मविकार्यार्थी तस्याकुलतयाव्यवहा
रान्नृपश्येत्तान्नपेणपूर्वोक्तैः॥ सभ्यैः॥ सहसर्वधर्मवित्॥ सर्वान्धर्मशास्त्रोक्तान्सा
मयिकांश्चधर्मान्वेत्तीतिविचारयतीतिससर्वधर्मवित्ब्राह्मणोनक्षत्रियादिर्नियो
क्तव्योव्यवहारदर्शने॥ तंचकात्यायनोगुणविशिष्टंकुर्यात्॥ यथाह॥ दांतंकु
लीनंमध्यस्थमनुद्वेगकरंस्थिरं॥ परत्रभीरुंधर्मिष्ठमुद्युक्तंक्रोधवर्जितमिति॥ ए
वंभूतब्राह्मणासंभवेक्षत्रियंवैश्यंवानियुञ्जीत॥ ... यथाहकात्यायनः॥ ब्रा

3

३

न्यप्राड्विवाकमात्रेस्थितां सभामिममतिन्यत्रापेक्ष्य वहीरानेःमारिति प्राड्विवाकमतिष्ठितो नसह २

ज्ञशो यत्र न स्यात्तु ज्ञत्रियं तत्र योजयेत् । विप्रं वाभावे स्वसंतु शूद्रं यत्नेन वर्जयेत् । ना
रदेनञ्चयामवमुख्यो दर्शितः धर्मशास्त्रैबुरस्तैः सधृतः राजाचारश्च तुष्यापरासिन्धं
पररूपांतीतिवत् । तस्य चेयं यौगिकी संज्ञा अर्थिप्रत्यर्थिनो पृच्छतीति प्राट् तयोश्च
घनं विरुद्धं विविधं वसभ्यैः सहाभिविनक्ति विवक्तीति वा विवाकः । प्राट् चासौ
विवाकश्चेति प्राड्विवाकः । उक्तं च । विवादानुगतं पृष्ठा ससभ्यस्तत्प्रयत्नतः । विचा
रयतीति येनासौ प्राड्विवाकस्ततः स्मृतः । इति । अपि च । गन्धर्वो भाद्रुयाच्छापि स्मृत्य प
तादिकारिणः सभ्याः पृथक् २ दंड्या विवादात् द्विगुणं दमं ४ पूर्वोक्ताः सभ्या
रजसो निरंकुशाश्चेन न दृभिभूतारागात् । स्नेवातिशयात् लोभाद्वालिस्मातिशया
त् भयात् संत्रासात् स्मृत्यापतं स्मृतिविरुद्धं व्यादिशाश्चाराद्पेतं कुर्वंतः पृथ
क् २ एकैकशो विवादात् विवादपराजयनिमित्ताद्दमाद्विरुत विरुद्धं गुणं
दमं दंड्याः । न पुनर्विवादास्पदीभूतात् द्रव्यात् । तथा निश्चितोसंग्रहणादिषु दं

३

(5)

डामावाप्रसंग॥ रागलोभभयाजस्मुपादाने॥ रागादिष्वेव हि द्विजरोषः समोभासाना
माहादिष्विति नियमार्थिनः वचनात् सर्वस्यैव ब्राह्मणवर्णमिति॥ गौतमवचनात्॥ न
ब्राह्मणः दृष्टो इति मन्तव्यं॥ तस्य प्रसंसार्थत्वात्॥ यत्तु षड्भिः परिहार्यो राज्ञा अव
ध्यश्चावंध्यो भवतीति लोकश्चेद वेदांगादि द्वाकोवाक्येतिहासपुराणकुशलस्तदपे
क्षस्तद्वृत्तिश्चत्वारिंशता संस्कारैः॥ संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामया
चारिकेष्वाभिविनीत इति प्रतिपादितं बहुश्रुतविषयं च न ब्राह्मणमात्रविषयं
व्यवहारविषयमाह॥ स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः॥ आवेदयति चेद्रा
ज्ञे व्यवहारपदं हि तत्॥ धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैराधर्षितो ऽभिभू
तो यद्राज्ञो प्राड्विवाकाय वा॥ आवेदयति विज्ञापयति चेद्यदि तदा आवेद्यमानं व्यव
हारपदं ज्ञेयं न्तत्रसंशयहेतुपरामर्शप्रमाणातिसंशयप्रयोजनात्मको व्यवहार
स्तस्य पदं विषयस्तस्यावेदनं सामान्यलक्षणं॥ स च द्विविधः॥ शंकाभियोगस्तत्त्वाभि

योगश्चेति । यथाह नारदः । अभियोगस्तु विज्ञेयः शंकातत्त्वाभियोगतः । शंकासतां तु संस
र्गात्तत्त्वं होढाभिदर्शनादिति । होढा लोप्त्रं लिंगमिति यावत् । तेन दर्शनं साक्षाद्वा द
र्शनं तस्मात् । तत्त्वाभियोगोऽपि द्विधा प्रतिषेधात्मको विध्यात्मकश्चेति । यथा मत्तो
हिरण्यादिकं गृहीत्वा न प्रयच्छतीति क्षेत्रादिकं मम मापहरतीति वा । उक्तं च कात्याय
न । न्यायेस्थेन धृतं कर्तुमन्यायं वा करोतीति यदा सि पुनश्चाष्टादशधाभिधीयते । यथाह मनुः ।
तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः । संभूय च समुत्थानं दत्तस्यानपकर्म च । वे
तनस्यैव चादानं संविदश्च व्यतिक्रमः । क्रयविक्रयानुशयो विवादः स्वामिपा
लयोः । सीमाविवादधर्मश्च पारुष्ये दंडवाचिके । स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव
च । स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च । पदान्यष्टादशैतानि व्यवहारस्थिताविहे
ति । एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि । यथाह नारदः । [illegible] एषा
मेव प्रभेदोऽन्यः शतमष्टोत्तरं शतं । क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते

ति ॥ आवेदयातिचेत्यानन्तरं स्वयमेव आगत्यावेदयाति ॥ न राजप्रेरितस्तत्पुरुषप्रेरितो वे
तिदर्शयति ॥ यथाहमनुः ॥ नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः न च प्रापितमन्ये
न ग्रसेनार्थं कथंचनेति ॥ परेरितिपारणपस्यभ्यो परैरित्येकस्मै केन द्वाभ्यां पद्भिर्भिर्थीव्यवहा
रो न भवतीति निदर्शयति ॥ यस्तु नरे कस्य बहुभिः सार्द्धं ॥ स्त्रीणां प्रेष्यजनस्य च ॥ अनादेयो भवे
द्वादो धर्मविद्भिरुदाहृत इति नारदवचनं ॥ तद्भिन्नविषयसाध्ये ॥ आवेदयातिराजद्गत्य
नैनैव रास्नाध्यो विनीतवेष आवेदयेत् ॥ आवेदितं च युक्तं चेन्नुब्राह्मिना प्रत्यर्थ्यी का
नमकल्यादीनां वा नाह्वानमित्याद्यर्थसिद्धमितिनोक्तं ॥ स्मृत्यंतरेनुस्पष्टार्थं ॥ यथा काले
कार्यार्थिनं पृच्छेत् प्रणतं पुरतः स्थितं ॥ किं कार्यं का च ते पीडा मा भैषीः ब्रूहि मानव ॥ केन कस्मिन्
कदा कस्मात् पृच्छेदेवं समागतं ॥ एवं पृष्टः स यथा ... सभ्यैर्ब्राह्मणैः सह ॥ विमृश्य कार्यं न्याय्यं
चेदाह्वानार्थमतः परं ॥ मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत् ॥ अकल्यबालस्थवि
रविषमस्थक्रियाकुलान् कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् ॥ मत्तोन्मत्तप्रम
त्तार्तभृत्यान्नाह्वानयेन्नृपः ॥ न हीनपक्षां युवतिं कुले जातां प्रसूतिकां ॥ सर्ववर
र्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः ॥ तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः

निक्षुल्लापाश्चपतितास्तास्तामाह्वानमिष्यते । कालंदेशंचविज्ञायकार्याणांचबलाब
लं अकल्यादीनपिशनैर्यानैराह्वानयेन्नृप ज्ञात्वाभियोगंयेपिस्युर्वनेप्रव्रजितादं
यः तानप्याह्वानयेद्राजागुरुकार्येष्वकोपयन्निति आसेधव्यवस्थाप्यर्थसिद्धिवनारदेनो
क्ता । वक्तव्येर्थेह्यतिष्ठंतमुत्क्रामंतंतद्वचः आसेधयेद्विवादार्थीयावदाह्वानदर्शनं स्थाना
सेधःकालकृतःप्रवासात्कर्मणस्तथा चतुर्विधःस्यादासेधोनासिद्धस्तंविलंघयेत् आसेधकाल
आसिद्धआसेधंयोतिवर्तते सविनेयोन्यथाकुर्वन्नासेधादंडभाक्भवेत् नदीसंता
रकांतारदुर्देशोपप्लवादिषु आसिद्धस्तंपरासेधमुत्क्रामन्नापराध्नुयात् निर्विष्टकालो
रोगार्तोपियक्ष्यव्यसनेस्थितः अभियुक्तस्तथान्येनराजकार्योद्यतस्तथा गवांप्रचारेगोपा
लाःसस्याबाधेकृषीबलाः शिल्पिनश्चापितत्कालमायुधीयाश्चविग्रहेइति आ सद्योरा
ज्ञायावरोधः अकल्यादयःपुत्रादिकमन्यंवासुहृदंप्रेषयेयुरितिनचेतपरार्थवादिनः
योनभ्रातानचपितापुत्रोननियोगकृत् परार्थवादीदंड्यःस्याद्व्यवहारेषुविब्रुवन्निति ॥
नारदवचनात् ७ प्रत्यर्थिनिप्रुद्गलेख्यपुरुषाणामन्यतमनानितेकिंकुर्यादित्याह प्रत्य
र्थिनोग्रतोलेख्यंयथावेदितमर्थिनासमामासतदर्धाहर्नामजात्यादिचिह्नितं अर्थीत्तदति

(8)

अर्थी। साध्यः सोऽस्यास्तीति अर्थी तस्मात्प्रतिपक्षः प्रत्यर्थी। तस्याग्रतः पुरतो लेख्यं लेखनीयं यथा
येः प्रकारेण पूर्वमावेदनकाले आवेदितं तत्तथा न पुनस्तत्पुरस्तथा। अन्यथावादि चेद्भंगप्र
संगात्। अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः। आहूतप्रपलायी च हीनः पंचविध
स्मृतः इति। आवेदनकाले एवार्थिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह
समामासेत्यादिः। संवत्सरमासपक्षतिथिवाराहादि नार्थिप्रत्यर्थिनाम ब्राह्मणादिजात्यादि विलि
खितं। आदिशब्देन द्रव्यतत्संख्यास्थानवेलाक्षमालिंगादीनि गृह्यंते। यथोक्तं। अर्थवद्धर्मसंयु
क्तं परिपूर्णमनाकुलं। साध्यवद्वाचकपदं प्रकृतार्थानुबंधि च। प्रसिद्धमविरुद्धं च निश्चितं साध
नक्षमं। संक्षिप्तं निखिलार्थं च देशकालाविशेषितं। वर्षर्तुमासपक्षाहोवेलादेशप्रदेशव
त्। स्थानावसथसाध्याख्याजात्याकारवयोयुतं। साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामव
त्। परात्मपूर्वजानेकराजनामभिरंकितं। क्षमालिंगात्मपीडावेकथिताहर्तृदायकं। यदा
वेदयते राज्ञे तल्लेख्यमित्यभिधीयते इति। भाषाप्रतिज्ञापक्ष इत्यनर्थांतरं। आवेदनसमये कार्यमा
त्रं लिखितं प्रत्यर्थिनो ग्रतः समामासादिविशिष्टं लिख्यत इति विशेषः। संवत्सरविशेषणं
यद्यपि सर्वव्यवहारेषूपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते। आ

६

धीप्रतिपद्येकीर्त्ति। पूर्वानुबन्धवत्तरेतिवचनात्। अर्थव्यवहारेऽप्येकस्मिन्नवसरे पसंख्याकं प
संख्यया इत्ययं तो येन गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्नवसरे तद्व्यंतसंख्याकं ततस्तेन गृही
तं प्राप्यमानो यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितं चेति वस्तरान्तरे गृहीतं प्रत्यर्पितं नास्मिन्नवा
सर इत्युच्यते। एवं मासाद्यपि योज्यं। दिशास्थानादयः पुनः स्थावरेष्वेवोपयुज्यन्ते। दिशश्चै
वं तथा स्थानं सन्निवेशस्तथैव च। जातिसंज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च। पितृपिताम
हं चैव पूर्वराजानुकीर्त्तनं। स्थावरेषु विवादेषु दशैतानि निवेदयेदिति स्मरणात्। दिशो
मध्यदेशादिः। जातिरर्थिनो ब्राह्मणत्वादि। संज्ञा च दिवदत्तादिः। अधिवासः समीपदेशनिवा
सीजनः। प्रमाणं निवर्तनादिपरिमाणं। क्षेत्रनाम शालिक्षेत्रं। अमुकक्षेत्रं त्वस्म वत्स
रमः पांडुभूमङ्गति पितृपितामहस्पत्तावद्भक्षणीयमिति तात्पर्यार्थः। एवं पक्षलक्षणोक्त्यैते
पक्षलक्षणरहितानां पक्षवदाभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृथ
कथनाभासाउक्ताः। अन्यैस्तु स्पष्टार्थमुक्तं। अप्रसिद्धं निराबाधं निरर्थं निःप्रयोजनं। असा
ध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेदिति। अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न ददातीत्या
दि। निराबाधमस्मद्गृहप्रदीपप्रकाशेनायं स्वगृहे व्यवहरतीत्यादि। निरर्थं। अभिधेयर

६

हितं कचटतपगजडबमित्यादि। निःप्रयोजनं यथायं देवदत्तोऽस्मद्गृहसन्निधौ सुस्वर
मधीत इति। असाध्यं यथाहं देवदत्तेन सुभ्रूभंगमुपहासित इत्यादि एतत्साध्यना
संभवादसाध्यं। अल्पकालत्वान्न साक्षिसंभवो लिखितं दूरत्वात् अल्पत्वान्न दिव्यमिति वि
रुद्धं यथाहं मूकेन सप्तत इत्यादि पुरराष्ट्रादिविरुद्धं वा राज्ञा विवर्जितो यश्च यश्च पौर
विरोधकृत् राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च अन्ये वा ये पुरग्राममहाजनविरो
धकाः अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः इति यच्चानेकपदसंकीर्णः पूर्वपक्षो
न सिद्ध्यति इति तत्रानेकवस्तुसंकीर्ण इत्युच्यते तद्दानदोष मदीयमनेनाहिरण्यं वासो रू
पकादिव अपहृतमित्येवं विधस्य अदुष्टत्वात् ऋणादानादिपदसंकरपक्षो नासइ
ति चेत्तत्पदमपि न मदीया रूपकाः अनेन वृद्ध्या गृहीता सुवर्णं वास्य हस्ते निक्षिप्तं मदीयं क्षे
त्रमयमपहृतवांश्चेत्यादीनां पदानामभिप्रेतत्वमेव। किंतु क्रियाभेदाक्रमेण व्यवहारो न युग
पदित्येतावत्। यथाह कात्यायनः। बहुप्रतिज्ञं यत्कार्यं व्यवहारेषु निश्चितं कामं तदपि
पि गृह्णीयाद्राजा तत्त्वबुभुत्सया इति तस्मादनेकपदसंकीर्णः पूर्वपक्षो युगपन्न सिध्यती

ति नस्यार्थः अर्थीग्रहणात्पुत्रपित्रादीनां ग्रहणं तेषां कार्यत्वात् । नियुक्तस्यापि नियो
गे नैवतद्देकार्यत्वाक्षेपात् अर्थिना संनियुक्तो वा प्रत्यर्थिनोपि वा यावस्यार्थे विवदते
तयोर्जयपराजयाविति स्मरणात् । नियुक्तजयपराजयौ मूलस्वामिनोरेव एतच्चमूलमो
फलके वा भूमौ पांडुलेखेन लिखित्वा अवाप्य हारणं शोधितं पश्चात्पत्रे निवेशयेत् पूर्व
पक्षं स्वभावोक्तं प्राड्विवाकोभिलेखयेत् पांडुलेखेन फलके ततः पत्रे विशोधितमिति
कात्यायनस्मरणात् शोधनं च यावदुत्तरदर्शनं कर्तव्यं नातः परमनवस्थाप्रसंगा
त् अत एव नारदेनोक्तं शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनं अवष्टब्धस्योत्तरेणानि
वृत्तं शोधनं भवेदिति पूर्वपक्षमशोधयित्वैव यदोत्तरं दापयंति सभ्यास्तदा रागाद्यो
भादित्युक्तदंडेन मत्स्यान्नदंड्ययित्वा पुनः प्रातिज्ञापूर्वके व्यवहारः प्रवर्तनीयो रासे
ति: ७ एवं शोधिते पत्रारूढे पूर्वपक्षे किं कर्तव्यमित्याह श्रुत्वार्थस्योत्तरं लेख्यं पू
र्वावेदकसन्निधौ सामीप्ये उत्तरं च यत्पूर्वोक्तस्य निराकरणं तदुच्यते यथाह
पक्षस्याव्यापकं सारमसंदिग्धं संदेहरहितं अनाकुलं पूर्वापराविरुद्धं अव्याख्यागं

८

प्यमप्रसिद्धपदप्रयोगेणदुःश्लिष्टश्लिष्टविभक्तिसाध्यासाध्याहाराभिधानेनवादेशभाव
भिधानेनेवाद्यास्यैयार्थेनभवति ॥ तस्यदुत्तरं तच्चचतुर्विधं ॥ संप्रतिपत्तिर्मिथ्याप्रत्यव
स्कंदनं पूर्वन्यायश्चेति ॥ यथाहकात्यायनः ॥ सत्यंमिथ्योत्तरं चैव प्रत्यवस्कंदनं तथा ।
पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधमिति ॥ तत्रसत्योत्तरं यथा रूपकशतं मह्यं
धारयतीत्युक्ते सत्यं धारयामीति ॥ यथाह ॥ साध्यस्यसत्यवचनं प्रतिपत्तिरुदाहृते
ति ॥ मिथ्योत्तरं तु नाहं धारयामीति ॥ यथाहकात्यायनः ॥ अभियुक्तोभियोगस्यय
दि कुर्यादपह्नवं ॥ मिथ्यात्तत्तु विजानीयादुत्तरं व्यवहारतः इति मिथ्याचतुर्विधेति ॥ प्र॰
त्यवस्तु तच्च मिथ्योत्तरं चतुर्विधं मिथ्यैतन्न ॥ भिज्ञानामितदा तत्र न संनिधिः ॥ अजा
तश्चास्मितत्कालइति मिथ्याचतुर्विधेति ॥ प्रत्यवस्कंदनं नाम सत्यं गृहीतं प्रतिदत्तं
प्रतिग्रहेणलब्धमितिवा ॥ यथाहनारदः ॥ अर्थीनालेखितोयोऽर्थः प्रत्यर्थी यदितं त
था ॥ प्रपदाकारणं ब्रूयात्प्रत्यवस्कंदनं स्मृतमिति ॥ प्राङ्न्यायोत्तरं तु ॥ यत्राभियु
क्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमार्तियुक्तस्तत्र वायं व्यवहारमार्गेण पराजितइति

मि

उक्तं च कात्यायनेन । आचारेणावसन्नोपि पुनर्लेखयते यदि । सोऽभियोज्यो जितः पूर्वं
प्रोञ्श्नीयस्तु स उच्यते ॥ इति ॥ एवमुत्तरलक्षणेऽभिहिते उत्तरलक्षणरहितानामुत्तरवदव
भासमानानामुत्तराभासत्वमर्थादुक्तं स्पष्टार्थं तत्र वक्ष्यते तत्र । संदिग्धमन्यत्प्रकृता
दत्यल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैव चेल्लरं भवेत् । यद्व्यस्तपदमव्या
पि निगूढार्थं तथाकुलं । व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये ॥ इति ॥ तत्र सं
दिग्धं सुवर्णशतमनेन गृहीतमि । त्युक्ते सत्यं गृहीतं सुवर्णशतं माषकशतं वेति
प्रकृतादन्यत् यथा सुवर्णशताभियोगे पणशतं धारयामीति । अत्यल्पं सुवर्णश
ताभियोगे पंचाशतं धारयामीति । अतिभूरि । द्विशतं धारयामीति पक्षैकदेशव्यापि
हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतं नान्यदिति । व्यस्तपदं । सुवर्णशताभियोगेप
दोत्तरेणोत्तरं । यथा । सुवर्णशताभियोगेऽनेनाहं ताडितः इति । अव्यापि । देशस्था
नादिविशेषणाव्यापि ॥ यथा मध्यदेशे वाराणस्यां पूर्वस्यां । दिशि क्षेत्रमनेनापहृ
तं । मत्पितृपूर्वपक्षेऽभिलिखिते क्षेत्रमपहृतमिति । निगूढार्थं । सुवर्णशताभियोगे कि

मह्येमेवधारयामीत्यत्रध्वनिनाप्राड्विवाकः। सभ्यो वार्थी वान्यस्मै धारयतीति सूच
यतीति न गृह्यार्थं। आकुलं पूर्वापरविरुद्धं। यथैतेषां वर्णशतानामभियोगे त्ततेसत्यं गृही
तं धारयामीति व्याख्यागम्यं दुःश्लिष्टविभक्तिसमासाध्याहाराणामभिधानेन व्याख्या
गम्यं। आदेशभाषाभिधानेन वा। यथा सुवर्णशतं विप्रशोधिनन्दसणामभियोगे गृही
तं शतवचनात्सुवर्णानां पितुर्येजानामीति। अत्र गृहीतस्यापि पितुर्वचनात्सूतर्णानांश
तं गृहीतमिति न जानामीति व्याभियोगे सत्यं वाद्दिदत्तानमस्त्वं गृहीतमिति। उत्तराभि
त्येकवचननिर्देशादुत्तराणां संकरो निरस्तः। यथाह कात्यायनः। पक्षैकदेशेय
सत्यमेकदेशे च कारणं। मिथ्या चैवैकदेशे च संकरात्तदनुत्तरमिति। अनुत्तरञ्च
कारणं। तेनैवोक्तं। नचैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः। नचार्थसिद्धिरुभ
योर्नचैकत्र क्रियाद्वयमिति। मिथ्याकारणयोरुत्तरयोः संकरेऽर्थिप्रत्यर्थिनोर्द्वयोरपि क्रि
या प्राप्नोति। मिथ्यायां क्रिया पूर्ववादे कारणे प्रतिवादिनीति स्मरणात्। तदुभय
मेकस्मिन्व्यवहारे विरुद्धं। यथा सुवर्णशतं रूपकशतं वानेन गृहीतमिति अभियोगे

सुवर्णशतं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति । कारणप्राङ्न्यायसंकरे तु प्रत्य
र्थिन एव क्रियाद्वयं प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थिनिर्दिष्टा क्रियामिति । यथा सुवर्ण
शतं गृहीतं प्रतिदत्तं रूपकशते व्यवहारमार्गेण पराजित इति । अत्र प्राङ्न्यायेन पत्रेण
वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यं । कारणोत्तरे तु साक्षिलेख्यादिभिर्भावयितव्य
मिति विरोधः । एवमुत्तरत्रयसंकरेपि द्रष्टव्यं । यथानेन सुवर्णं रूपकशतं वस्त्राणि
च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदास्यामि रूपकशतं तु न गृहीतं
वस्त्रविषये पूर्वन्यायेन पराजित इति । एवं च तु संकरेपि न तेषां चानुत्तरत्वं योग
पाद्यते । तस्य शास्त्रेणानेन ते विना सिद्धेः क्रमेणोत्तरत्वाभाव क्रमस्त्वर्थिनः प्रत्यर्थिनः
समानो चेच्छया भवति । यत्र पुनस्तयोः करणस्य प्रत्यर्थिविषयत्वं तत्क्रियोपादानेन
पूर्वं व्यवहारः प्रवर्तयितव्यः । पश्चादन्यविषयोत्तरोपादानेन व्यवहारो द्रष्टव्यः । यत्र
च संप्रतिपत्त्येनोत्तरे तरस्य च संकरस्तत्रोत्तरोत्तरोपादानेन व्यवहारो द्रष्टव्यः । संप्रति
पन्नौ क्रियाभावात् । यथा हारीतेन । मिथ्योत्तरं कारणं चस्यातामेकत्र चेदुभे सत्ये

वृं०
६

(16)

व

वापिसहानेन न तत्र प्रसक्तं किमुत्तरमित्युक्तौक्ते यथाभूतार्थविषये यत्र वा स्यात्क्रिया
फलं उभयं तत्र तत्तज्ज्ञेयमसंकीर्णमतो ऽन्यथा संकीर्णं भवतीति शेषः एवं क्र
मं भवतीत्यर्थः तत्र भूतार्थयथानेन स्वरूपकथनं वस्त्राणि गृहीतान्यभियोगे सुवर्ण
रूपकथनं च गृहीतं वस्त्राणि तु गृहीतान्यभियोगे सुवर्णं परूपकथनं च न गृहीतं
वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति अत्र मिथ्योत्तरस्याभूतविषयत्वाद्दर्थि
नः क्रियामादाय प्रथमे व्यवहारः प्रवर्त्तयितव्यः पश्चाद्दत्तविषयो व्यवहारः एवं
मिथ्याप्राङ्न्यायसंकरे कारणप्राङ्न्यायसंकारश्च योजनीयं तथा तस्मिन्नेवाभियोगे
सत्यं सुवर्णं परूपकथनं च गृहीतं दास्यामि वस्त्राणि तु न गृहीतानि प्रतिदत्तानी
ति वा वस्त्राणि विषये पूर्वं पराजितवदिति वोत्तरे संप्रतिपत्ते र्भूरिविषयित्वेऽपि तत्र
क्रियाभावान्मिथ्याद्युत्तरक्रियामादाय व्यवहारः प्रवर्त्तयितव्यः यत्र तु मिथ्याका
रणोत्तरयोः तत्स्वपक्षव्यापित्वं यथाऽभिगम्याह्निकमायया कश्चिद्ददातीदं गोमही
षा अमुकस्मिन्काले तेन चास्य गृहे दृष्टेति अन्यस्तु मिथ्यैतदेतत्प्रदर्शितकाला

17

त्सर्वमेवास्मद्गुरुगृहे स्थितामममगृहे जानातीति वदतीदं तावत्पक्षनिराकरणास
मर्थत्वान्नानुत्तरं ॥ नापि मिथ्या चकारणोपन्यासात् ॥ नापि कारणमेकदेशस्या
भ्युपगमाभावात् तस्मात्सकारणं मिथ्योत्तरमिदं अत्र च प्रतिवादिनः ॥ क्रिया
कारणे प्रतिवादिनीति वचनात् ॥ ननु मिथ्या क्रिया पूर्ववाद इति पूर्ववादिनः
कस्मात्क्रिया न भवति ॥ तस्य शुद्धमिथ्याविषयत्वात् ॥ कारणे प्रतिवादिनी
त्येतदपि कस्मात् शुद्धकारणविषये न भवति नैतत् सर्वस्यापि कारणोत्तरस्य
मिथ्यासहचरितरूपत्वाच्छुद्धकारणस्योत्तरस्याभावात् ॥ प्रसिद्धकारणोत्तरे प्रति
ज्ञातार्थैकदेशस्याप्यभ्युपगमेनैकदेशस्यापि मिथ्यात्वं ॥ यथा सत्यं रूपकश
तं गृहीतं न धारयामि प्रतिदत्तत्वादिति प्रत्तत्तोदाहरणे तु प्रतिज्ञातार्थैकदेशस्या
भ्युपगमो नास्तीति विशेषः ॥ एतच्चोदाहरितेन स्पष्टमुक्तं मिथ्याकारणयोर्वापि गृ
ह्णं कारणमुत्तरमिति ॥ यत्र मिथ्या प्राङ्न्याययोः पक्षव्यापित्वं यथा रूपकशतं धा
रयतीत्यभियोगे मिथ्यैतदस्मिन्नर्थे पूर्वमयं पराजित इति अत्रापि प्रतिवादिन

18

एवं क्रियाप्राड्न्यायकारणोक्तौ नु प्रत्यर्थी निर्दिशेत्क्रियामिति वचनादुद्दिष्टस्यापि प्रा
ड्न्यायस्याभावादनुत्तरप्रसंगात् संप्रतिपत्तौ रपि सद्व्यत्वे नोपदिष्टस्य पक्षस्यासि
द्धत्वोपन्यासेन साध्यत्वनिराकरणादेव उत्तरत्वं यदा तु कारणप्राड्न्यायलक्ष
णः पश्चात् तमनेन गृहीतामित्यभियुक्तः प्रतिवदति त्वं गृहीतं प्रतिवादितो रेक
स्मिन् व्यवहारे क्रियाप्रसंगादिति न संशयः ॥ ४ एवमुत्तरे पत्रे निवेशिते साध्यासिद्धेः सा
धनायत्तत्वात् साधनानिर्देशकः कुर्यादित्याह अर्थीति ततो ऽर्थी लेखयेत्सद्यः प्र
तिज्ञातार्थसाधनं तत उत्तरलेखनानन्तरमर्थी साध्यवान् सद्य एवानन्तरमेव लेखये
त्प्रतिज्ञातः साध्यः स चासावर्थश्चार्थश्च प्रतिज्ञातार्थस्तस्य साधनं साध्यते ऽनेनेति
साधनं प्रमाणं अत्र सद्यो लेखयेदिति वदतोत्तराभिधाने कालाविलम्बनमर्थाद्गी
तमिति गम्यते तच्चोत्तरत्रा विवेचयिष्यते अर्थी प्रतिज्ञातार्थसाधनं लेखये
दिति वदता यस्य साध्यमस्ति स प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तमतः प्राड्न्या

याप्येवसाध्यत्वात्तत्पर्थ्येवादीनायतइतिसएवसाधनंलेखयेत् । कारणोत्तरेऽपि
कारस्यैवसाध्यत्वात्कारणवाद्येवादीतिसएवलेखयेत् । मिथ्योत्तरेत्वपूर्ववाद्ये
वार्थीतिसएवसाधनंनिर्दिशेत् । तथार्थीलेखयेदितिवदतार्थ्येवलेखयेत्तान्य
इत्युक्तमतश्चसंप्रतिपत्त्युत्तरेसाध्याभावेनभावोत्तरवादिनो । द्वयोरप्यर्थित्वाभा
भावात्तसाधननिर्देशएवनास्तीतिभावनैवव्यवहारः परिसमाप्यतइतिगम्यते
एतदेवहारितेनस्पष्टमुक्तं । प्राङ्न्यायकारणोक्तौतुभावनैनुप्रत्यर्थी । निर्दिशेत्क्रियां
मिथ्योक्तौपूर्ववादीनुप्रतिपत्तौनसाभवेदिति ॥ ततः । किमित्याह तत्सिद्धौसिद्धि
माप्नोतिविपरीतमतोऽन्यथा । तस्यसाधनप्रमाणस्यवक्ष्यमाणलिखितसाक्ष्यादि
लक्षणस्यसिद्धौनिर्वर्तितौसिद्धिंसाध्यस्यजयलक्षणांप्राप्नोतिइति । अतोऽस्मात्प्राक
राद्न्यथाप्राकारोत्तरेसाधनासिद्धौविपरीतंसाध्यस्या[illegible]सि
द्धिंसा[illegible]राजयलक्षणांमाप्नोतिइतिसंबंधः ॥ एवंव्यवहाररूपंअभिधा

योपसंहरति । चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः । व्यवहारान्नृपः पश्येदित्यत्रो
व्यवहारः सोऽयमिदं चतुष्पाच्चतुरंशकल्पनया विवादेषु ऋणादिष्वनुपदर्शितो व
र्णितः । तत्र प्रत्यर्थिनोऽग्रे लेख्यमिति भाषापादः प्रथमः । श्रुतार्थस्योत्तरं लेख्यमित्यु
त्तरपादो द्वितीयः । ततोऽर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः । तत्सिद्धौ सिद्धिमाप्नो
तीति साध्यसिद्धिश्चतुर्थ इत्याहुरेके । प्राह्वानवत्तु रंशास्तु चतुष्पादभिधीयत इति
संप्रतिपत्त्युत्तरे तु साधनानिर्देशाद्बाधार्थस्यासाध्यत्वाच्च न साध्यसिद्धिलक्षणपा
दोऽस्तीति द्विपात्त्वमेव । उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रि
यास्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनाऽ
नभिधानाद्व्यवहारसंबंधाभावाच्च न व्यवहारपादत्वमिति निरस्यते ॥ एवं
सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना कांश्चिद्व्यवहारविशे
षकांश्चिद्विशेषं दर्शयन्नाह । अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् । अ

पराधीनेन न संयोजयेत्। यद्यपि प्रत्यवस्कंदनं प्रत्यभियोगरूपं तथापि स्वापराधप
रिहारात्मकत्वात्तस्य प्रतिषेधस्याविषयः। अतः स्वाभियोगानुपमर्दनरूपस्य प्र
त्यभियोगस्यायं निषेधः। इदं प्रत्यर्थिनमधिकृत्योक्तं। अथार्थिनं प्रत्याह। अभियु
क्तं च नान्येन नेति। अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्योऽर्थी नाभियोजयेत्। किंच
उक्तामावेदनसमये यदुक्तं तद्विप्रतिपत्तिविरुद्धत्वात्तावेनेन यन्त्रप्रापयेत्। एतदुक्तं भ
वति यद्वस्तु येन रूपेणावेदनसमये निवेदितं तद्वस्तु तथैव भाषाकालेऽपि लेखनी
यं नान्यथेति। ननु प्रत्यर्थिनोऽसन्निधाने यथावेदितमर्थिनोऽन्यत्रावेदनमुक्तं
किमर्थं पुनरुच्यते नोक्तं विप्रतिपत्तिं नयेत् इत्युच्यते। यथावेदितमर्थिनेत्यनेन। प्रा
वेदनसमये यद्वस्तु निवेदितं तदेव भाषासमये लेखनीयं। एकस्मिन्नपि पदे न वस्त्वं
तरमेत्युक्तं यथा निनरूपकशतं वृद्ध्या गृहीतमित्यावेदनसमये प्रतिपन्नप्रत्य
र्थिसंनिधौ भाषासमये वस्त्रशतं वृद्ध्या गृहीतमिति न वक्तव्यं। तथा सति पदांत

(८२)

णागमने विवस्त्वंतरगमनाद्धीनवादी दंड्यः स्यादिति नोक्तं विप्रतिपत्तिं नयेदित्यनेनैक
वस्तुन्यपि पक्षान्तरगमनं निषिध्यते यथा रूपकशतं निषिद्धमित्यनुपक्षान्तरगमने
निषिध्यत इति न पौनरुक्त्यं एतदेव स्पष्टीकृतं नारदेन पूर्ववादं परित्यज्य यो ऽ
न्यमालंबते पुनः पादसंक्रमणाज्ज्ञेयो हीनवादी स वै नर इति हीनवादी दंड्यो
न तु दृष्टार्थाद्धीयते अतः प्रत्यर्थिनो ऽर्थिनश्च प्रमादपरिहारार्थमेवायमभियोगम
भिस्तीर्येत्याद्युपादेशो न प्रसक्तार्थसिद्ध्यसिद्धिविषय अत एव बृहस्पति छलं निरस्य
भूतेन व्यवहाराद्धीयते न पदस्यैव तथार्थं व्यवहारे इष्यते मन्यूह्यते नु व्यवहारे
प्रमादाभिधाने प्रसक्तादपि व्यवहाराद्धीयत एव यथाह नारदः सर्वेष्वर्थविवा
देषु वाक्छले नावसीदति परस्त्रीभूम्यृणादाने शास्योप्यर्थान्न हीयते इति यस्यार्थः
सर्वेष्वर्थविवादेषु न मन्यूह्यते पुनः वाक्छले प्रमादाभिधाने ऽपि नावसीदति परा
जीयते न पराजीयते न पराजीयते न प्रसक्तादर्थाद्धीयत इत्यर्थः अत्रोदाहरणं प
रस्त्रीत्यादि परस्त्रीभूम्यृणादाने प्रमादाभिधाने न दंड्यापि यथा प्रप्रसक्तादर्थी

न्नाहीयते एवं सर्वेष्वर्थविवादेष्विति । अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमा
दाभिधाने प्रसक्तादप्यपहीयत इति गम्यते यथाहमनेन शिरसि पादेन ताडित इत्या
वेदनेन समये ऽभिधाय भाषाकाले हस्तेन पादेन ताडित इति वदन्न केवलं दंड्यः परा
जीयते च ॥ अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेदित्यस्यापवादमाह कुर्यात्प्रत्य
भियोगं च कलहे साहसेषु च । कलहे वाग्दंडपारुष्यात्मके च दंड्यः पराजीयते च सा
हसेषु शस्त्रादिभिर्मित्रप्राणव्यापादनादिषु प्रत्यभियोगसंभवे स्वाभियोगमनि
स्तीर्यापि विना [illegible] प्रत्यभियोजयेत् । ननु चात्रापि पूर्वपक्षानुपमर्दे नह्यपरं चेना
नुत्तरत्वात्प्रत्यभियोगस्य प्रतिसंतरं चेद्युगपद्व्यवहारासंभवः समानः सत्यं ना
त्र युगपद्व्यवहारापवादप्रत्यभियोगापदेशः अपि तु न्यूनदंडप्राप्तये ऽधिकदंडनिवृ
त्तये वा तथाहि अनेनाहं ताडितः शस्त्रेणेत्यभियोगे पूर्वमहमनेन ताडितः
शस्त्रेणेति प्रत्यभियोगे दंडाल्पत्वं यथाह नारदः पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स
दोषभाक् पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुरिति यदा तु न युगपद्द्यो

स्ताङ्गनादिप्रवृत्तिस्तत्राधिकं दंडं निवर्त्तिस्तिताधिकं दंडं निवर्त्तेति परुषोसाहसेवापि
युगपत्संप्रवृत्तयोः वशेषश्चेन्नत्तम्येतविनयः स्यात्समस्तयोरिति एवं युगपद्व्यवहा
रप्रवृत्तत्वसंभावे ऽ विकल्पेनाद्यो ग्रन्थाभियोगोर्थ्यवानुसरणादिषु निरर्थक एव ॥ ७ ॥ अ
र्थिप्रत्यर्थिनोर्विधिमुक्त्वा सभ्यस्य सभापतेः कर्त्तव्यमाह उभयोः प्रतिभूर्ग्राह्यः सम
र्थः कार्यनिर्णये उक्तयोरर्थिप्रत्यर्थिनो सर्वेषु विवादेषु निर्णयस्य कार्यनिर्णयः
प्राहिताभ्यादिषु पाठ्य कार्यशब्दस्य पूर्वनिपातः निर्णयस्य च कार्यसाधितधनादाने
दंडदाने वतस्मिन्प्रतिभूः प्रतिभवति तत्कार्यं तद्भवतीति प्रतिभूर्ग्राह्यः समत्वेन
सभापतिना तस्यासंभवे ऽर्थिनोरक्षणार्थं पुरुषानियोक्तव्या तेभ्यश्च ताभ्यां प्रातिदिनं
वेतनं देयं यथाह कात्यायनः प्रथमाच्चेत्प्रातिभूर्नास्ति कार्ययोग्यस्तु वादिनः स र
क्षितो दिनस्यान्ते दद्याद्भृत्याय वेतनं इति तु अर्थिप्रत्यर्थिनोर्निर्णयकार्ये समत्वेन स
भापतिना प्रतिभूर्ग्राह्य इत्युक्तं किं तन्निर्णय कार्यं यस्मिन्प्रतिभूर्गृह्यते इत्य
पेक्षितमाह निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समं मिथ्याभियोगी द्विगुणमभियो

गार्हं न वाहेत् । अर्थिना निवेदितस्याभियोगस्य प्रत्यर्थिनेऽपलपिते चेत्तस्य पद्रूसते यद्यर्थिना
साक्ष्यादिभिर्भावितोऽभ्यंगीकारितः प्रत्यर्थी तदा दद्याद्धनं प्रसक्तं अर्थिने राज्ञे च तत्सममप
णाय दंडं । अर्थी चार्थाभावयितुं न शक्नोति तदा मिथ्याभियोगी अभियुक्ताय तद्दद्यादिति । अ
भियोगः । अभियोगादभियुक्तात्तु धनात् द्विगुणं धनं दद्यात् राज्ञे प्राङ्न्याये प्रत्यवस्कं
दने ष्वेदमेव योजनीयं । तत्रार्थ्येवापह्नववादीति प्रत्यर्थिना भावितो राज्ञे प्रसक्तं समं दंडं
दद्यात् । अर्थे प्रत्यर्थिप्राङ्न्यायकारणं वा भावयितुं न शक्नोति तदा स एव मिथ्याभियो
गीति राज्ञे द्विगुणं धनं दद्यात् । अर्थिने च प्रसक्तं धनमिति । संप्रतिपत्त्युत्तरे तु दंडाभाव
एव । एतच्च ऋणादानविषयमेव । पदान्तरेषु तत्र तत्र दंडाभिधानात् । व्यवहारेष्वस्या
संभवाच्च । न सर्वविषयत्वं । राज्ञा धर्मार्थी को दाप्य इत्यस्य ऋणादानविषयत्वेऽपि तत्रैव
विशेषं वक्ष्याम । एतदेव सर्वव्यवहारविषयत्वेनापि योजनीयं । कथमभियोगस्यानि
ह्नवेऽभियुक्तेन कृते यद्यभियोक्ता साक्ष्यादिभिर्भावितोऽभियुक्तस्तदा तत्समं तत्र तत्र
प्रतिपदोक्तं धनं दंडं द्विगुणं दद्यादिति विधीयते । अत्रापि प्राङ्न्याये प्रत्यवस्कन्दने वद् त्य

(26)

वेवदेवयोजनीये ॥ ततोर्थीलेखयेत्सद्यः प्रतिज्ञातार्थसाधनमितिवदतोत्तरलेख
नेकालप्रतीक्षणंदर्शितंतत्रापवादमाह ॥ साहसस्तेयपारुष्यगोभिशापात्यये स्त्रि
यां॥ विवादयेत्सद्यएवकालोन्यत्रेछयास्मृतः ॥ साहसंविषशस्त्रादिनिमित्तंप्राणिव्यापा
दनादि स्तेयंचौर्यंपारुष्यंवग्दंडपारुष्यंवक्ष्यमाणलक्षणं गोदोग्ध्री अभिशापः पा
तकाभियोगः अत्ययः प्राणाधानातिपातः तस्मिन्नुद्दे द्वेकवद्भावादेकवचनं स्त्रियां
देस्योच कुलस्त्रियांचारित्रविवादेदास्याश्चस्वत्वविवादे विवादयेत्तु तरंदापयेसद्यएवन
कालप्रतीक्षणंकुर्यात् अन्यत्रविवादांतरेत्तुउत्तरदानकालइछयार्थिसभ्यसत्ताप्रती
स्मृतइत्यर्थः ॥ दुष्टलक्षणमाह ॥ देशाद्देशांतरंयातिस्रक्किणीपरिलेहिच ललाटं
स्विद्यतेचस्यमुखंवैवर्ण्यमेतिच परिशुष्यत्स्खलद्वाक्योविरुद्धंबहुभाषते वा
क्चक्षुः पूजयतिनोतथोष्ठौनिर्भुजत्यपि स्वभावाद्विकृतिंगछेत्मनोवाक्कायकर्म
भिः अभियोगेसाक्षिवादुष्टः परिकीर्तित मनोवाक्कायकर्मभिः स्वभावादेवनत

पूर्वापरविरुद्धं वक्तुं भाषत इति वाचा सत्तिः परोक्तो वाचं प्रतिवचनदानेन न पूजयति चक्रुर्वी

यादिनिमित्ताद्विसर्तिं विकारं याति गच्छत्य सौ ऽभियोगे साहृदयवादुष्टः परिकीर्तितः
तावित्तातिविभज्य दर्शयति देशाद्देशांतरं याति न क्वचिद्‌वतिष्ठते सा क्वेरणीर्तुष्ट
यर्यौष्ठोपरिलेढी जिह्वाग्रेण घट्टयतीति कर्मणा विसर्तिः अस्यत्वत्वाटं स्विद्यते स्वे
दबिंदुश्चित्ते भवति मुखंच वैवर्ण्यं विवर्णश्च याति उच्चं सत्मश्च वाणं गच्छतीति का
यस्य विसर्तिः परिशुष्य स्खलद्वाक्यः परिशुष्यत्सगद्गदं स्खलत्यसंप्रत्तं वाक्यं यस्य
सतथोक्तः विरुद्धं पूर्वापरतिवीहारेण न न पूजयतीति मनसो विलिंगं तथार्धेशोवि
र्दृ जयति चक्रयतीत्य प्यापि कार्यस्य विसर्तिः तच्च दोषसंभावनमात्रमुच्यते नदोषनि
श्चयाय स्वाभाविकनैमित्तिकविकारयोर्विवेकस्य दुःसाधनत्वात् अथ कश्चिन्निपु
णमतिर्विवेकं प्रतिपाद्यात तथापि न पराजयनैमित्तं कार्यं भवति नह्यिमरि
ष्यतो लिंगदर्शनेन मृतकार्यं कुर्वे अपवमस्य पराजयो भविष्यतीति लिंगादवा
तेपि न पराजय निमित्तकार्यप्रसंगः ७ किंच संभाव्यार्थेत्वं तत्रोपः साधयेच्छ्वनिष्प

साक्षिषूभयः सत्सुसाक्षिणःपूर्ववादिनः पूर्वपक्षेधरीभूतेभवंत्युत्तरवादिनः उभयतउभयोरपिवादिनोः

तत्र नचाहूतोवदेत्किंचिद्धीनोदंड्यश्चसस्मृतः संदिग्धमर्थमधर्मसंभानागीसत भव
यः स्वतंत्रः साधननिरपेक्षः साधयत्या सधादिना सहीनोदंड्यश्चभवति यश्चस्वयंसे
प्रतिपन्नंसाधनेनवासाधितंयाच्यमानोनिष्पतेत्पलायते यश्चाभियुक्तोराज्ञाचाहूतः
स्वदासिनाकिंचिद्वदतिसोऽपिहीनोदंड्यश्चस्मृतइतिसंबध्यते अभियोगप्रसाक्षेवादु
ष्टः सपरिकीर्तितइतिप्रस्तुत्वाद्व्यानपरिज्ञानमात्रमेवैमाभूदितिदंडग्रहणं दंड्य
स्यापिशास्योपपर्योनहीयतेइति अर्थादहीनत्वदर्शनादेवतन्माभूदितिहीनग्रहणं
७ अथयत्रद्वावपियुगपद्धर्माधिकरणंप्राप्ताभाषावादिनौ तद्यथा कश्चित्प्रातग्रह
णेक्षेत्रेलब्ध्वाकंचित्कालमुपभुज्यकार्यवशात्सकुटुंबोदेशांतरंगतः अन्योऽपितमिदंक्षे
त्रंप्रतिग्रहेणलब्ध्वाकंचित्कालमुपभुज्यदेशांतरंगतस्तातोद्वावपियुगपदागत्यमदी
यमिदंक्षेत्रंमदीयमिदंक्षेत्रमितिपरस्परंविवदमानौ धर्माधिकरणंप्राप्तौतत्रकस्य
येन्याकांक्षितेआह साक्षिषूभयतःसत्सुसाक्षिणः पूर्ववादिनः पूर्वस्मिन्काले

मयाप्रतिगृहीतमुपभुक्तंच ॥ किंतुरासेदमेवक्षेत्रमस्मादिवक्रयेणलब्धमस्येदं नमन्येमयाप्र
तिग्रहेणलब्धमस्येदं दत्तमितितत्रपूर्वपक्षोऽसाध्यतयाधरीभूतस्तस्मिन्पूर्वपक्षेऽधरीभू
तेभवेत्युत्तरवादिनउत्तरकालंप्रतिगृहीतमुपभुक्तंवेतिवादिनःसाक्षिणः ॥ प्रष्टव्याभवं
ति ॥ इदमेवव्याख्यानयुक्ततरं ॥ मिथ्योत्तरेपूर्ववादिनःसाक्षिणोभवंति ॥ प्राङ्न्यायकारणो
क्तौपूर्वपक्षेधरीभूतेउत्तरवादिनःसाक्षिणोभवंतीतिव्याख्यानमयुक्तं ॥ अस्यार्थस्यैतो
थीत्वेस्वयंसिद्धःप्रतिज्ञातार्थसाधनःसाक्षिणोभवंतीत्येतेनोक्तत्वात्पुनरुक्तिप्र
संगात् ॥ पूर्वव्याख्यानमेवस्पष्टीकृतंनारदेन ॥ मिथ्याक्रियापूर्ववादेकारणेप्रतिवादि
नि ॥ प्राङ्न्यायविधिसिद्धौतुजयपत्रंक्रियाभवेदित्युक्त्वाद्वयोर्विवदतोरर्थेद्वयोःसत्सुचसा
क्षिषु ॥ पूर्वपक्षोभवेद्यस्यभवेयुस्तस्यसाक्षिणइतिवदतो ॥ तस्यसर्वव्यवहारविलक्षणत्वा
त्प्रभेदेनोपन्यासः ॥ ७ ॥ अपिच सपणश्चेद्विवादःस्यात्तत्रहीनंतुदापयेत् ॥ दंडंचस्वप
णं ॥ चैवधनिनेधनमेवचं ॥ यदिविवादोव्यवहारःसपणःपणेनपणस्तेनसह वर्तत

ऽन्तिसपणाः स्यात्तदा तत्र । तस्मिन्सपणे व्यवहारे हीनं पराजीतं पूर्वोक्तं दंडं स्वकृतं च पणं रा
ज्ञेऽर्थिने च विवादास्पदीभूतं धनं दापयेत् । तत्रास्मिन्न राजा । यत्र पुनरेकः कोपावेश
वशाद्यद्यहमत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीतेऽन्यस्तु न किंचि
त्प्रतिजानीते तत्रापि व्यवहारः प्रवर्त्तते तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि हीयते तदा स
एव सपणं दंडं दाप्यः । स तु पराजितो दंडं दाप्यो न पणं स्वपणं दाप्यो । सपणश्चेद्विवादः स्यादि
ति वदता पणरहितोऽपि विवादो दर्शित । किंच छलं निरस्य भूतेन व्यवहारान्नये
न्नृपः । भूतमप्यनुपन्यस्तं हीयते व्यवहारतः । छलं प्रमादाभिहितं निरस्य परित्यज्य भू
तेन वस्तुतत्त्वानुसारेण व्यवहारान्नयेदिति नृपः यस्माद्भूतमपि वस्तुतत्त्वमपि अनुपन्य
स्तमनभिहितं हीयते हानीमुपगच्छति व्यवहारतो व्यवहारेण साक्ष्यादिभिस्तस्माद्भूता
नुसरणं कर्त्तव्यं । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा सभ्यैः सभापतिना यतितव्यं
सामादिभिरुपायैस्तथा सभ्यैः साक्ष्यादिनैरपेक्ष्येण च निर्णयो भवति । अथ सर्वव्यापि

भूतानुसरणे न शक्यते वक्तुं कर्तुं तथा सति साक्ष्यादिभिर्निर्णेयः कार्य इत्यनुकल्पः । य
थोक्तं । भूतछलानुसारित्वाद्विगतिः समुदाहृता । भूतं तत्त्वार्थसंयुक्तं प्रमादाभि
हितं छलमिति तत्र भूतानुसारी व्यवहारो मुख्यः छलानुसारी त्वनुकल्पः । साक्षिलेख्या
दिभिर्व्यवहारनिर्णय इत्यत्रार्णयो कदाचिद्वस्त्वनुसरणं भवति कदाचिद्वस्त्वनुसरणं भ
वति कदाचिन्न भवति साक्ष्यादीनां व्यभिचारस्य संभावात् ॥ भूतमप्यनुपन्यस्तं
हीयते व्यवहारतः इत्यत्रोदाहरणमाह । निह्नुते लिखितं नैकदेशाविभावितः दा
प्यः सर्वं नृपेणार्थी न ग्राह्यस्त्वनिवेदितः ॥ नैकमनेकं सुवर्णरजतवस्त्रादि लिखितं
मिति । मिथ्युक्तमर्थी नो प्रत्यर्थी यदा सर्वमेवाभिह्नुतेऽपजानीते तदार्थिनैकदेशे हि
रण्ये साक्ष्यादिभिः प्रत्यर्थी भावितोऽङ्गीकारितः सर्वं रजताद्यर्थं पूर्वलिखितं दापयो
ऽर्थिनेन्नृपेण । न ग्राह्यस्त्वनिवेदितः पूर्वं भाषाकालेऽनिवेदितः पश्चादर्थिना प्र
मया विस्मृतमिति निवेद्यमानो न ग्राह्यो न दातव्यो नृपेण एतच्च न केवलं वाचनिकम

कदेशे प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदेशान्तरेऽपि मिथ्यावादित्वसंभवात्प्र
त्यर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेऽपि सत्यवादित्वसंभवात् एवं त
कपिरानामसंभावनाप्रत्ययानुगृहीतादस्मादेव योगीश्वरवचनात्सर्वं दापनीयं
न्यपेणेति निर्णयः एवं च तर्कवाक्यानुसारेण न निर्णये क्रियमाणे वस्तुनोऽन्यथा
त्वेऽपि व्यवहारदर्शिनो न दोषः तथा च गौतमो न्यायाधिगमाने तर्कोऽभ्युपेयनाभ्यू
ह्यथाख्यातं गमायादिन्यूकं तस्माद्राजाचार्यावनिर्द्याविरूपसंहरत्तिन चैकदेश
विभावितोऽनुपादेयवचनः प्रत्यर्थीत्येवा तावदिह गम्यते एकदेशविभावितो न
पेण सर्वं दाप्य इति वचनात् यत्तु कात्यायनेनोक्तं प्रयत्नेन कार्योऽभियोगीत्यि
वसे साधयेद्धमी सान्त्विभिक्षावदेवासोत्प्रमैत्रे साधितं धनमिति तत्पुत्रादिदेयपि
त्रादिरूणविषयं तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्जानामीति प्रतिवाद्यभिर्ईक्षवा
दी न भवतीत्येकदेशविभावितोऽपि न कश्चिदसत्यवादित्तिनिह्नुतेऽलिखितेनैक

दे

मिति शास्त्रं तत्र न प्रवर्त्तेत ॥ निर्द्धाराभावादप्येतत्तर्काभावाच्च ॥ अनेकार्थाभियोगेपीति का
त्यायनवचनं सामान्यविषयं विशेषशास्त्रस्याविषये ॥ निह्नवोत्तरं परित्यज्यान्याकारोत्तरे प्रव
र्त्तते ॥ ननु ऋणादिविवादेषु स्थिरप्रायेषु निह्नुते ॥ अनेनाप्याधिक्ये वाच्ये प्रोक्ते साध्यं न सिध्य
तीति वदता कात्यायनेनानेकार्थाभियोगे साक्षिभिरेकदेशभाविते साध्यं सर्वमेव नो सि
ध्यतीत्युक्तं ॥ तथा सत्येकदेशभाविते ऽभाविते कदेशाशुद्धिः कुतस्त्या ॥ उच्यते ऽसर्वार्थ
साधनतयोपन्यस्तैः साक्ष्यादिभिरेकदेशाभिधानेऽधिकाभिधाने वा सर्वमेव साध्यं न
सिध्यतीति तस्यार्थस्तत्रापि निह्नुतं न सिध्यतीति वचनात्पूर्ववत्संशय एवेति प्रमाणान्तर
स्यावपरोक्षस्य बच्छन्नं निरस्येत्तिनियमात् ॥ साहसादौ तु सकलसाधनतयोपादिष्टैः साक्षिभिः
सकलं भवेत् ॥ स्त्रीसंगे साहसे चौर्ये च साध्यं परिकीर्त्तितमिति ॥ छ ॥ ननु निह्नुते लिखि
तं तेकमितीयं स्मृतिस्तथानेकार्थाभियोगेपीतीयं स्मृतिरेवं तत्रानयोः स्मृत्योः पर
स्परविरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति विषयव्यवस्था किमि

१८

३५

त्याश्रीयत इत्यत आह । स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः । यत्र स्मृत्योः पर
स्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापनाद्यर्थमुत्सर्गापवादलक्षणो न्या
यो बलवान्समर्थः । स च न्यायः कुतः प्रत्येतव्य इत्यत आह । व्यवहारत इति व्यवहाराद्वृ
द्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते । अतश्च प्रसक्तोदाहरणे विषयव्यव
स्थैव युक्ता एवमन्यत्रापि विषयव्यवस्थापनाविकल्पादि यथासंभवं योज्यं ॥ ए
वं सर्वत्र संगेऽपि वादमाह । अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः । धर्मशास्त्रानुसा
रेण त्वनेनैवोशनसाद्यर्थशास्त्रस्य निरस्तत्वाद्धर्मशास्त्रान्तर्गतमेव राजनीतिलक्षण
मर्थशास्त्रमिह विवक्षितं । अर्थशास्त्रधर्मशास्त्रस्मृत्योर्विरोधेऽर्थशास्त्राद्धर्मशास्त्रं ब
लवदिति स्थितिर्मर्यादा । यद्यपि समानकर्तृकतयार्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो
विशेषो नास्ति तथापि प्रमेयस्य धर्मस्य प्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः धर्म
स्य च प्राधान्यं शास्त्रादौ वर्णितं । तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधेऽर्थशास्त्रस्य बा
ध एव । न विषयव्यवस्था नापि विकल्प । किमत्रोदाहरणं । ततावद्धुहंवावालर

द्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दो
षो हन्तुर्भवति कश्चन प्रकाशं वाप्रकाशं वा मन्युस्तं मन्युमृच्छतीति तथा च आततायिन
मायान्तमपि वेदान्तगं रणे जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदित्याद्यर्थशास्त्रं इय
विशुद्धिरुदिता प्रमाप्याकामतो द्विजं कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इत्यादि धर्म
शास्त्रं तयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तं अनयोरेकविषयत्वासंभवेन विरोधाभा
वा वान्न्यायबलाबलचिन्तावतरति तथा हि शास्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यत इत्युपक्रम्या
त्मनश्च परित्राणे दक्षिणानां च संगरे स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यतीति आ
त्मरक्षणे दक्षिणादियज्ञोपकरणानाचरक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां चाततायि
नमकूटशस्त्रेण घ्नन् अदंड्यभागिन्युपक्रान्तस्यार्थवादार्थमिदमुच्यते गुरुं वा बालवृ
द्धौ वेत्यादि गुर्वादिनेत्यं तावध्यानाप्याततायिनो हन्यात्किमुतान्यानिति वाशब्द
श्रवणादपि वेदान्तगमित्यत्रापि शब्दश्रवणान्न गुर्वादीनां वध्यत्वप्रतीति नाततायिव त
धे दोषोऽन्यत्र गोब्राह्मणवधादित्येतस्मिन्ननुवचनाच्च आचार्यं च प्रवक्तारं पितरं मातरं गु

रं॥ नाहिंस्याद्ब्राह्मणं गाश्च सर्वांश्चैव तपस्विन इति मनुवचनाच्च। आचार्यस्त्रीनामा
ततायी नाहिंसा प्रतिषेधेनैव वचनामर्थवत्त्वान्यथा हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रे
णैव सिद्धत्वात्॥ नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्येतदपि ब्राह्मणादितिरिक्त
विषयमेव॥ यतोऽग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः॥ क्षेत्रदारहरश्चैव षडेते आततायिन
इति॥ उद्यतासिविषाग्निश्च शापोद्यतकरस्तथा॥ आथर्वणेन हन्ता च पिशुनश्चापि राज
नि॥ भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः॥ एवमाद्यान्विजानीयात्सर्वानेवाततायि
न इति सामान्येनाततायिनो दर्शिताः॥ एतच्च ब्राह्मणादय आततायिन आत्मादित्रा
णार्थं हिंसनेऽपि संबंधेनानिवार्यमाणाः प्रमादाद्यदि विद्येरंस्तत्र लघुप्रायश्चित्तं राजदंडा
भावश्चेति निष्कर्षः॥ तस्मादन्यदिहोदाहरणं वक्तव्यं॥ तदुच्यते॥ हिरण्यभूतित्रलब्धिर्यया प
त॥ अतो यतेत तत्प्राप्तावित्यर्थशास्त्रं धर्मशास्त्रानुसारेण क्रोधलोभविवर्जित इति धर्मशा
स्त्रं॥ तयोः क्वचिद्विषये विरोधो भवति॥ यथा चतुष्पाद्व्यवहारप्रवर्त्तमानेनैकस्य जये विधार्य
माणे मित्रलब्धिर्भवति न धर्मशास्त्रमनुसृतं भवति॥ अन्यस्य जये वधार्यमाणे धर्मशास्त्रा-

मनुष्ठितं भवति। मित्रत्वन्निश्चितं भवति न धर्मस्त्रोस्त्राद्धर्मे शास्त्रो बलवदत एव धर्मार्थे सांनिया
तेऽर्थेष्वा द्विगुणं यत्तद्देवेति प्रायश्चित्तस्य गुरुत्वं दर्शितमापस्तंबे न यत्तद्देवेति द्वादशवार्षि
कं प्रायश्चित्तं परामृश्यते ॥ ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनमित्युक्तं किं त
त्साधनमित्यपेक्षितत्राह प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं एषामन्यतमा
भावे दिव्यान्यतममुच्यते प्रमीयतेऽपरिच्छिद्यतेऽनेनेति प्रमाणं तच्च द्विविधं शासनं चा
रकं चेति शासनमुक्तलक्षणं चीरकं तु वक्ष्यमाणलक्षणं भुक्तिरुपभोगः साक्षिणो वक्ष्य
माणस्वरूपप्रकाराः ननु लिखितस्य साक्षिणश्च शाब्दाभिव्यक्तिद्वारेणाशाब्दे ऽन्तर्भावात्पृ
थक्प्रामाण्यं भुक्तेस्तु कथं प्रामाण्यमुच्यते भुक्तिरपि कैश्चिद्विशेषणैर्युक्ता सत्येव हेतुत्व
तत्क्रयादिकमभिचारादनुमापयति अनुपपद्यमाना कल्पयतीत्यनुमानेऽर्थापत्तौ
वान्तर्भवतीति प्रमाणमेवैषां लिखितादीनां त्रयाणामन्यतमस्याप्यभावे दिव्यानां व
क्ष्यमाणस्वरूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते मानुष
भाव एव दिव्यस्य प्रामाण्यमस्माद्देववचनादवगम्यते दिव्यस्य स्वरूपप्रामाण्ययोरा

गमागन्यनात् ॥ अतश्च यत्र परस्परविवादेन युगपद्धर्माधिकरणं प्राप्तयोरेको मानुषीं क्रि
यामपरस्तु दैवीमवलंबते तत्र मानुष्येव स्यादाह ॥ यथाह कात्यायनः ॥ यद्येको मानुषं ब्रूयाद
न्यो ब्रूयात्तु दैविकीं ॥ मानुषीं तत्र तु गृह्णीयात् नतु दैवीं क्रियां नृपः इति ॥ यत्रापि प्रधाने
कदेशसाधनं साधनं मानुषं संभावितं ॥ तत्रापि नादैवमश्ववणीयं ॥ यथाहू षकशतम
नयाः रुष्यामहीन्वायं न प्रयच्छतीत्यनियोगापह्नवे प्रहरणे साक्षिणः संति नो संख्यायां
वृद्धिविशेषे वा ततो दिव्ये भावयामीत्यशोभनत्रैकदेशविभावितन्यायेनापि संख्यावृद्धिवि
शेषसिद्धेर्नव्यस्यावकाशः ॥ उक्तं च कात्यायनेन ॥ यद्येकदेशव्याप्तापि क्रिया विद्येत
मानुषी ॥ सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणामिति ॥ यत्र गूढसाहसिकानां तु प्रा
प्तं दिव्यैः परीक्षणमिति ॥ तदपि मानुषासंभवस्तत्र नियमार्थं ॥ यदप्यपि नारदेनोक्तं ॥ मेर
ण्येष निर्जने रात्रावंतर्वेश्मनि साहसे न्यासस्यापह्नवे चैव दिव्या संभवति क्रियेति त
दपि मानुषसाहसे वादे पारुष्ये दंडवाचिके ॥ बलोद्भवेषु कार्येषु साक्षिणो दिव्यमेवा न
ति ॥ तथा लेख्यादीनामपि क्वचिन्नियमो दृश्यते यथाह गर्गः श्रेणीगणादीनां यास्थितिः

परिकीर्तिता । तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः तथा द्वारमार्गक्रियाभोगज
लवाहादिषु क्रिया भुक्तिरेव गुर्वी स्यान्न दिव्यं न च साक्षिणः तथा दत्तादत्तेऽथ भृ
त्यानां स्वामिनो निर्णये मतः । विक्रयादानं संबंध धनमनिति ॥ क्रीत्वा नमनीष्छ
ति । द्यूते समाह्वये चैव विवादे समुपस्थिते साक्षिणः साधनं प्रोक्तं न दिव्यं न च ले
ख्यकमिति ॥ उभयत्र प्रामाण्यसद्भावे प्रमाणानां बलाबलविवेके सति पूर्वापरयोः
का येयोः कस्य बलीयस्त्वमित्यत्राह । सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया स
र्णादिषु सर्वेष्वर्थविवादेषूत्तरा क्रिया क्रियत इति क्रियाकार्ये बलवती उत्तरका
र्ये साधिते तद्वादी जयी भवति पूर्वकार्ये साधितेऽपि तद्वादी पराजीयते । तद्यथा कश्चि
दुत्तमर्णेन धारणं सास्य ध्येयति कश्चित्प्रतिदानेनाधारणं तत्र ग्रहणप्रतिदानयोः प्रमाण
सिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी जयति । तथा पूर्वं द्विकं शतं गृहीत्वा का
लान्तरे त्रिकं शतमंगीकृतवान् । मत्रोभयत्र प्रमाणसद्भावेऽपि त्रिकशतग्रहणं बल
वत् । पश्चाद्गाविक्त्वात्पूर्वाबाधिनानुत्पत्तेः । उक्तं च । पूर्वाबाधेन नोत्पत्तिरुत्तरस्य

द्दिसस्यतीति ॥ ७ ॥ अस्यापवादमाह ॥ आधौ प्रतिग्रहे क्रीते पूर्वो न्तु बलवत्तरः ॥ आध्यादि
युक्तिषु पूर्वैसेव कार्यं बलवत् ॥ तद्यथा ॥ एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा
पुनरन्यस्याध्याधाय किमपि गृ तितत्र पूर्वस्यैव तद्भवति ॥ नोत्तरस्या एवं प्रतिग्रहे क्रः
येव ॥ नन्वाहितस्य तदानीमस्वत्वात् पुनराधानमेव न संभवति ॥ एवं दत्तस्य च क्रीतस्य
स्य वदानक्रयेनोपपद्यते ॥ तस्मादिदं वचनमनर्थकमुच्यते ॥ अस्वत्वेऽपि मोहात्
कश्चिल्लोभाद्वा पुनराधानादिकं करोति ॥ तत्र पूर्वं बलवदिति न्यायमूलमेवेदं
वचनमित्यतोक्षं ॥ ७ ॥ भुक्तेः क्वचिद्विशासनेयुक्तया अप्रमाणमेव दर्शयित्वा कन्या
क्वचिद्भुक्तेः कार्यान्तरमाह ॥ पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ॥ परेण भुज्य
मानाया धनस्य दशवार्षिकी ॥ परेणासंबद्धेन भुज्यमानामनुबंधनेवापश्यत अब्रु
वतः मदीयेयं भूत्वया न भोक्तव्येत्यप्रतिषेधतः तस्या भूमौ विंशतिवार्षिकी अप्रतिरव
यि विंशतिवर्षोपभोगान्निमित्ताद्धानिर्भवति ॥ धनस्य तु हस्त्यश्वादेर्दशवार्षिकी हा
निर्नन्विदमनुपपन्नं ॥ नह्यप्रतिषेधात्स्वत्वमपगच्छति ॥ अप्रतिषेधस्य दानविक्रया

दिवस्वत्वनिवृत्तिहेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात्। नापि विंशतिवर्षोपभोगात्
स्वत्वं। उपभोगस्य स्वत्वप्रमाणत्वात् प्रमाणस्य च प्रमेयप्रत्यमुत्पादकत्वात्। स्व
छक्रयादिषु स्वत्वकारकहेतुष्वभावात्। तथा हि स्वामी सद्धक्रयसंविभागपरि
ग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरित्य
ष्टावेव स्वत्वाकारकहेतून् गौतमः पठति न भोगं तच्चेदमेव वचनं विंशतिवर्षोपभोग
स्य स्वत्वापात्तिहेतुत्वं प्रतिपादयतीति युक्तं स्वत्वस्य च हेतूनां लोकप्रसिद्धत्वेन
शास्त्रैकसमाधिगम्यत्वाभावात्। एतच्च विभागप्रकरणे निपुणतरमुपपादयिष्यते
गौतमवचनं तु नियमार्थं। अपि च अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि। चौरदं
डेन तं पापं दंडयेत्पृथिवीपतिरित्येतदनागमायभोगस्य स्वत्वहेतुत्वे विरुध्यते। न
चानागमं तु यो भुंक्ते इत्येतत्स्मरणोक्तभोगविषयं परस्पतोक्षवतद् इति प्रत्यक्षविषयमि
ति युक्तं वक्तुं। अनागमं तु यो भुंक्ते इत्यविशेषाभिधानात्। नोपभोगबलं कार्यमाहर्त्रा
तत्सुतेन वा पशुस्त्रीपुरुषदासानामिति धर्मो व्यवस्थित इति कात्यायनवचनात्। स

मत्र भोगे च हानिकारणाभावेन हानेरसंभवात् ॥ न चैवं मंतव्यं । आधिप्रतिग्रहक्रयेषु
पूर्वस्याः क्रियायाः प्राबल्यापवादेनाम् । विषये विंशतिवर्षोपभोगयुक्तायाश्च न विषय
दशवार्षोपभोगयुक्तायाः ॥ उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यते इति यतस्तेषूत्त
रैव क्रिया तत्त्वतो नोपपद्यते ॥ एवमेव ह्याधेयं देयं स्वं विक्रेयं च तत्त्वतोति न चाहितस्य द
त्तस्य विक्रीतस्य वा स्वत्वमस्ति । अस्तस्य दाने प्रतिग्रहे च दंडः स्मर्यते ॥ अदेयं यश्च ग
ह्णाति यश्चादेयं प्रयच्छति । उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति ॥ तथा
ध्यादीनां त्रयाणामपवादश्चेत्स्यश्लोकस्याधिसीमादीनामुत्तरश्लोकेऽपवादो नोप
पद्यते ॥ तस्माद्भूम्यादीनां हानिरनुपपन्नैव ॥ नापि विव्यवहारहानिः सा यतः उपेक्षां कु
र्वतस्तस्य तूष्णींभूतस्य तिष्ठतः काले विपन्ने पूर्वोक्ते व्यवहारो न सिध्यतीति नार
देनोपेक्षालिंगाभावसत्ता व्यवहारहानिरुक्ता न च [illegible]समावसत्ता ॥ तथापि मनुना
पि । अजडश्चेदपोगंडो विषये चास्य भुज्यते भग्नं तद्व्यवहारेण भोक्ता तद्द्रव्यमर्हतीति
इति व्यवहारतो भंगो दर्शितो न वस्तुतः ॥ व्यवहारभंगश्चैवं तोक्तो किं त्ववदत्ति अन

ड्गोयं मयोभुक्तोऽस्य सन्निधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं तत्र बहवः साक्षिणः संति
पश्यस्यस्वमन्यायेन मया भुज्यते तदाय किमित्येतावंतं कालमुदास्त इति तत्र वाचैव निरु
त्तरो भवतीत्येवं निरुत्तरस्यापि वास्तवो व्यवहारो भवत्येव छलं निरस्य भूतेहार्थहानि
शंका भवतीति तन्निवृत्तये तं हानिनस्यात्तस्यामित्यपदिश्यते इति तद्व्रज स्मार्तकाला
भुक्तेर्हानिशंकाकारणाभावात् तत्र हानिनस्यात्तस्यामित्येतावरोत्राभिधिसोऽर्थो वश
तिग्रहणमिति विवक्षितं स्यात् ॥ अथोच्यते विंशतिवर्षाण्यतिक्रांते तत्पत्रदोषवर्जितमि
ति ॥ यथाह कात्यायनः ॥ शक्तस्यासंनिधावर्था यस्य लेख्येन भुज्यते ॥ विंशतिवर्षाण्य
तिक्रांते तत्पत्रं दोषवर्जितमिति ॥ तदपि न प्राध्यादिष्वपि विंशतिरूर्ध्वं पत्रदोषोद्भवेन
निराकरणसमन्वेनापवादासंभवात् ॥ यथाह कात्यायनः ॥ अथ विंशतिवर्षाणि आ
धिर्भुक्तः सुतिष्ठितः ॥ तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिता ॥ तथा ॥ सीमावि
वादे निर्णीते सीमापत्रं विधीयते ॥ तस्य दोषाः प्रवक्तव्या यावद्वर्षाणि विंशतिरिति ॥
एतेन धनर्णस्य दशवार्षिको त्येतदपि प्रत्युक्तं ॥ तस्मात् दस्यश्लोकस्य संनोऽर्थो वक्त

न

यः श्रूयते। भूमेर्हन॰वस्य च फलहानिरिह विवक्षिता। न वस्तुहानिर्नापि व्यवहारहा
निरारक्षो। शा विंशतिवर्षोपभोगादूर्ध्वं यद्यस्वामी न्यायतः क्षेत्रं लभते तथापि फलानु

त्व

सारेणैनं भजते। अप्रतिषेधनेन स्वापराधात्स्वामिवच्च चमात्। परोक्षभोगेनु विं
शतेरूर्ध्वमपि फलानुसारेण लभते। एवं श्रूयते इति वचनात्। उक्तं तदुत्पन्नस्यापि फ
लस्य सत्वात् तद्धानिरनुपपन्नैव बघ्द तस्य क्षेत्रोपभेदितिविधिः। यद्यपि गृहक्षेत्रा
दुतसमो दंडो न संभवति तथापि मर्या। दाया प्रभेदेवसीमातिक्रमेण तथेत्यादि
नावहस्पमाणो दंडोऽस्त्वः स्वरूपाविनाशेन तथैव वस्त्रादेर्यथा तदुत्पन्नस्य ग
पनसत्वहादीनां यस्तु नस्त्वदुत्पन्नसुपभोगान्नष्टं तत्र त्वरूपनाशादेवस्वत्वनमा
शे। अनागमं तु यो भुंक्ते बहून्यब्दशतान्यपि चोरदंडेन तं चैनं पापं दंडयेत्पृथिवीपतिः
इत्यादिना वचनेन निष्क्रयरूपेण गणयित्वा चौरवत्तत्समं द्रव्यदानं प्राप्तं तं हानिर्वि
शतिवार्षिकीत्यपोद्यते राजदंडाः पुनस्त्रिवार्षिंशतिरूर्ध्वं नष्टं फलं नैन लभतं इतिस्थि
तम्। एवं तेन धनस्य दश वार्षिकीत्येतदपि व्याख्यातम्॥ छ॥ अस्यापवाद माह। आधि

सीमोपनिक्षेपजडबालधनैर्विना तथोपनिधिराजस्वश्रोत्रियद्रव्यं ॥ धनैरपि ॥ आधि
श्च सीमा च उपनिक्षेपश्च । आधिसीमोपनिक्षेपाः जडश्च बालश्च जडबालौ तयोर्धने जडबा
लधने । आधिसीमोपनिक्षेपाश्च जडबालधने च । आधिसीमोपनिक्षेपत्येतैः जडबा
लधनैर्विना ॥ उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते नि
निहितं द्रव्यं ॥ यथाह नारदः ॥ स्वद्रव्यं यत्र विश्रंभान्निक्षिपत्यविशंकितः ॥ निक्षेपो
नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति ॥ उपनिधानमुपनिधिः ॥ आध्यादिषु पा
रपन्तोव्रवलोपिभ्रमेर्विंशतेर्धनस्य दशाब्दाद्वर्षेभ्य ऊर्ध्वमप्युपचयहानिर्नेभ
वति पुरुषापराधस्य तथाविधस्याभावादुपेक्षाकारणस्य तत्र तत्र संभवात्
तथा हि आधेराधिन्योपाधिक एव भोगइत्यपेक्षायामपि न पुरुषापराधः ॥ सीम्न
श्चिरन्तनुषांगारादिचिह्नैः सुसाधत्वादुपेक्षा संभवति उपनिक्षेपोपनिध्योर्भु
क्तैः प्रतिषिद्धत्वान्न प्रतिषेधातिक्रमोपभोगे च सोदयस्योभादुपेक्षापयत्तेः ॥ ज
डबालयोर्जडत्वाद्बालत्वादुपेक्षावुक्तैव राज्ञो बहुकार्यव्याकुलत्वात्स्त्रीण

मज्ञानादप्रागल्भ्याच्च ॥ श्रोत्रियस्याध्ययनाध्यापनतच्चिविचारानुष्ठानव्याकुलत्वा
दुपेक्षायुक्तैव ॥ तस्मादाढ्यादिषु सर्वत्रोपेक्षाकारणसंभावात् समक्षभोगनिराक्षे
पेण न कदाचिदपि फलहानि ॥ ७ ॥ आढ्यादिषु दंडविशेषप्रतिपादनार्थमाह
आढ्यादीनां विहर्तारं धनिने दापयेद्धनं । दंडं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा
आढ्यादीनां श्रोत्रियपर्यंतानां चिरकालोपभोगबलेनापहर्तारं विवादा
स्पदीभूतद्रव्यस्वामिने दापयेदित्यनुवादः । दंडं च तेन समेन विवादास्पदीभूतस
व्यसमं राज्ञे दापयेदिति विधिः ॥ यद्यपि गृहक्षेत्रादिषु तत्समो दंडो न संभवति
तथापि मर्यादायाः प्रभेदे च सीमातिक्रामणे तथेत्यादिना वक्ष्यमाणो दंडोऽ
दृव्यः ॥ अथ तत्समदंडेनापहर्तुर्दमनं न भवति बहुधनत्वेन तदा शक्त्यपेक्षं ध
नं दापयेत् ॥ यावता तस्य दर्पोपशमो भवति तावत् दापयेत् ॥ दंडो दमनादित्या
हुस्तेनादांतान् दमयेदिति दंडग्रहणस्य दमनार्थत्वात् ॥ यस्मिन्नु तत्सममपि द्र
व्यं तावन्मात्रं सोऽपि यावता ध्रियते तावद्दाप्यः यस्य पुनः किमपि धनं नास्ति असौ

धिग्दंडादिना दमतीय तथा च मनुः स्वायंभुवोऽब्रवीत् ॥ त्रिषु वर्णेषु यानि स्युरक्षतो ब्रा
ह्मणो व्रजेत् ॥ उपस्थमुदरं जिह्वा हस्तौ पादौ च पंचमं ॥ चक्षुर्नासा च कर्णौ च धनं दे
हस्तथैव च ॥ एतेषां च यत्किंचिन्निमित्तोपराधस्तत्रोपस्थादौ निग्रहः कार्य इति दृष्टव्यं ॥ कर्म
वा कारयितव्यो बंधनागारं वा प्रवेशयितव्यः यथोक्तं कात्यायनेन धनदानासहं
बुद्ध्वा स्वाधीनं कर्म कारयेत् ॥ अशक्तो बंधनागारप्रवेश्यो ब्राह्मणादृते इति ब्राह्म
णस्य पुनरीदृक्याभावे कर्मवियोगाविख्यापननिर्वासनांककारणान्यवृत्तावितिना
रदोऽपि वधः सर्वस्वहरणं पुरान्निर्वासनांकने ॥ तदंगच्छेद इत्युक्तो दंड उत्तमसाहसः
अविशेषेण सर्वेषां एषामेव दंडविधिः स्मृतमित्युक्त्वोक्तं वधादृते ब्राह्मणस्य न वधं ब्रा
ह्मणोऽर्हति ॥ शिरसो मुंडनं दंडस्तस्य निर्वासनं पुरात् ॥ ललाटे चाभिशस्तांकः प्रा
याणं गर्दभेन च इति ॥ अंकानां च व्यवस्था दर्शिता ॥ गुरुतल्पे भगः कार्यः सुरापाने सुराध्व
जः ॥ स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति ॥ यत्तु चक्षुषोर्निरोधो ब्राह्मणस्यात्याय
स्तेनोक्तं ब्राह्मणस्य पुरान्निर्वासनं समये वस्त्रादिना चक्षुर्निरोधः कर्त्तव्य इति तस्य

र्थो न चक्षुषो रूपग्रहणं । अक्षतो ब्राह्मणो भ्रातेत् न शारीरो ब्राह्मणे दंडः इत्यादिमनुगौत
मवचनाविरोधादित्यलंप्रसंगेन ॥ छ ॥ स्वत्वाव्यभिचारित्वेन भोगस्य स्वत्वे प्रामाण्य
मुक्तं । भोगमात्रस्य स्वत्वव्यभिचारात् । कीदृशो भोगः प्रमाणमित्यत आह । आ
गमो ऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् । स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः स भो
गादभ्यधिको बलीयान् स्वत्वबोधने भोगस्यागमसापेक्षत्वात् । यथाह नारदः । आग
मे ऽपि विशुद्धे न भोगो याति प्रमाणतां । अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छतीति । न च
भोगमात्रात्स्वत्वावगमः परकीयस्याप्यपहारादिना उपभोगसंभवात् । एतदेव भोगं केवलं
यो यस्तु कीर्तयेन्नागमं क्वचित् । भोगच्छलापदेशेन विज्ञेयः स तु तस्करः इति स्मर्यते । आ
तश्च सागमो दीर्घकालो निरंतरो निराक्रोशः प्रत्यर्थिसंनिधानश्च परिभोगो ऽपि चेच्च धे
ति । क्वचिदागमनिरपेक्षस्यापि भोगस्य प्रमाण्यमित्याह विनापूर्वक्रमागतादिति । पूर्वे
षां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमस्तेनागतो यो भोगस्तस्माद्विना आगमो ऽभ्यधिक
इति संबंधः । स पुनरागमादभ्यधिकः आगमनिरपेक्षप्रमाणमित्यर्थः । तत्राप्यागमज्ञान

निरपेक्षो न सत्तानिरपेक्षः सत्तानुवृत्तेनैवावगम्यत इति बोद्धव्यं । विनाशपूर्वक्रमागमादित्येत
द्योग्यानुपलब्ध्या स्वागमाभावनिश्चयसंभवादागमस्तेन सापेक्षस्योपभोगस्य रक्षणायोक्ता । यो रे
ग्यानुपलब्ध्या स्वागमाभावेनागमागमाभावनिश्चयासंभवेवत् । आगमस्तेनानिरपेक्ष
एव संततोपभोगः प्रामाण्यं । एतदेवस्पष्टयते कात्यायनेन स्मार्तकालेक्रियाक्रमः साग
मा भुक्तिरिष्यते । अस्मार्तेऽनुगमाभावक्रमात्त्रिपुरुषागतेति । स्मार्तश्च कालो वर्षशतपर्य
न्तः शतायुर्वै पुरुष इति श्रुतेः । अनुगमाभावादिति । योग्यानुपलब्ध्यभावेनागमाभावनि
श्चयाभावादिति । अत एवश्च वर्षशताधिकोभोगः संततोऽप्रतिरवः प्रत्यक्षश्चागमाभावे बा
धितेऽव्यभिचाराद्यागमस्यानुगमयतीति । अस्मार्तेपि कालेऽनागमस्य तिपरं
परायांसत्वेन भोगः प्रमाणमत एवागमेनुयोक्तुं रूढ इत्येकवचननिर्देशाद्बहून्यपदशता
न्यपीति । प्रपितामहप्रयोगात्प्रथमस्य पुरुषे निरागमाविरकालोपभोगोपि दृष्ट विस्मर्तमि
तिमंतव्यं । द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसंगान्न चेत्तदिष्यते । आ
द्योऽनुकारणं दानं मध्येभुक्तिस्तु सागमेति नारदस्मरणात् । तस्मात्सर्वत्र निरागमोपभोगात्ता

गमं नुयो भुंक्ते इत्येतद्दूष्यं । यद्यप्यन्यायेनापि यद्भुक्तं पितॄपूर्वैस्तरैस्त्रिभिर्नच्छक्यमपाहर्तुं क्र
मात्त्रिपुरुषागतमित्ति योऽंशं । तत्रापि क्रमात्त्रिपुरुषागतमित्तिपित्रा सह पूर्वैस्तरैस्त्रिभिरिति यो
ऽंशं । तत्रापि क्रमात्त्रिपुरुषागतमित्यस्मात्तत्कालोपलक्षणं त्रिपुरुषविवक्षाया मेकव
र्षेऽप्येतैस्तरैः पितृपुरुषत्रयातिक्रमसंभवात् । द्वितीये च वर्षे निरागमस्य भोगस्य प्रामाण्यप्र
सङ्गः । तथा सति स्मार्त्तकाले क्रियाभूमेः सागमा भुक्तिरिष्यत इति क्रमविरोधः । अन्या
येनापि यद्भुक्तमित्येतच्चान्यायेनापि भुक्तमपहर्तुं न शक्यं किं पुनरन्यायानिश्चय इति व्या
ख्येयपि शास्त्रश्रवणात् । यच्चोक्तं यद्विनागममप्येतद्भुक्तं पूर्वैस्त्रिभिर्भिर्भवेत् । न तच्छ
क्यमपाहर्तुं क्रमात्त्रिपुरुषागतमिति । तत्राप्यत्यंतमागमं विनेत्यत्यंतमुपलभ्यमानमाग
मं विनेति व्याख्येयं । न पुनरागमस्वरूपं विनेति आगमस्वरूपाभावे भोगशतेनापि न
स्वत्वं भवतीत्युक्तं । क्रमात्त्रिपुरुषागतमप्यत्येतादृक्कार्थं । ननु स्मरणयोग्येकालभो
गस्यागमसापेक्षत्वस्य स्वत्वे आगमे वा प्रामाण्यं अथ प्रामाण्यं तरेणागमो नावगत क

थं तादृशि शिष्टो भोगः प्रमाणमुच्यते । प्रमाणांतरेण वगतागमसहितएव निरंतरो भो
गः । कालांतरे स्वच्छंगामयति । अप्रचगतो प्यागमो भोगरहितो न कालांतरे स्वच्छंगामयि
तुमलं मध्ये दानवीक्रयादिना स्वच्छोयगमसंभवादिति सर्वमनवद्यं । छ । आगमसा
पेक्षो भोगरेन कालांतरे स्वच्छंगामयि प्रमाणमित्युक्तं । आगमस्तर्हि भोगनिरपेक्ष एव प्रमा
णमित्यत आह । आगमेपि बलं नैव भुक्तिः स्तोकापि यत्र नो । यस्मिन्नागमे स्वल्पापि
भुक्तिर्भोगो नास्तीति तस्मिन्नागमे बलं संपूर्णतानिष्पत्ति । अथमानैर्संधिः स्वत्वनिवृत्तिः
परस्वत्वापादनं च दानं । परस्वत्वापादनं वपरीयादिस्वीकरोमितिदासंपद्यते । नान्य
था । स्वीकरश्च त्रिविधो मानसो वाचिकः कायकश्चेति । मानसो ममेदमिति सविकल्प
रूपः । वाचिकस्तु ममेदमिति संकल्परूप । वाचिकस्तु ममेदमित्याद्यभिव्याहारो द्वेरवी
सविकल्पः कः प्रत्ययः कायिकः पुनरुपदो नाभिमर्शनादिरूपोऽनेकविधस्तत्र वानि
यमस्मार्यते । दद्यात्कृष्णाजिनं पुण्ये गां पृथुकं करेणांकरे । केसरेषु तथैवाश्वं दासीं शरसि

52

दापयेदिति ॥ आह च ॥ आध्वलानेव्याह ॥ अनुमंत्रयेत प्राणाभिमर्शाद्‌ प्राणि कन्यां वे
त्ति ॥ तत्रादिरण्यवस्त्रादावुदकदानानंतरमेवोपादानादि संभवीत्यत्रैविधोपि स्वीकारः
संपद्यते ॥ क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण स्वीकारासंभोगांश्च स्वेनाप्युपभोगे
नाविततस्य मन्यथादानक्रयादेः संपूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वी
कारविकलः आगमो दुर्बलो भवतीति तत्सहितादागमादेतच्च द्वयोः पूर्वापरकालापरि
ज्ञाने तु विपूर्वापरकालपरिज्ञाने तु गुणोपि पूर्वकालागम एव बलीयानिति ॥ अथ
वा लिखितं साक्षिणो भुक्तिः प्रमाणमित्युक्तमेतेषां समवाये कुत्र कस्य प्राबल्यमित्यत्रे
दमुपतिष्ठते आगमो भ्यम्याधिको भोगाद्विना पूर्वक्रमागतात् ॥ आगमेपि नत्वं निवमु
क्तौ कापि यत्र नोऽत्ययमर्थः ॥ आध्वपुरुषसाक्षितिभोगाद्विना पूर्वक्रमागतात् ॥ आ
गमो भोगादभ्यधिको बलवान् पूर्वक्रमागताद्भोगाद्विना सपुनः पूर्वक्रमागतो
भोगस्त्रिपुरुषलिखितेन भाविता दागमाद्बलवान् मध्यमे तु भोगरहितादागमा

स्तोकभोगसहितो ऽयोगमो बलवानिति एतदेव स्पष्टयति नारदः। आद्ये तु करणे दा
नं मध्ये भुक्तिस्तु सागमा। कारणं भुक्तिरेवैका संतता या चिरंतनीति ॥ ४ ॥ पश्य
तो ऽब्रुवत इत्यत्र विंशतिवर्षभोगादूर्द्ध्वं भूमेर्द्धनस्यापि दशवर्षभोगादूर्द्ध्वं फलानुसरणं
न भवतीत्युक्तं तत्र फलानुसारणवत् दंडानुसरणमपि न भविष्यतीत्याशंक्य पुरु
षव्यवस्थया प्रमाणव्यवस्थया च दंडव्यवस्थां दर्शयन्नाह। आगमस्तु कृतो येन सो
ऽभियुक्तस्तमुद्धरेत्। न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी। येन पुरुषेण भूम्यादेरा
गमस्वीकारः स तेन स पुरुषः कृतः क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादिकं
लिखितादिभिरुद्धरेत्। भावयेदिति तेन चाभावयता पुरुषस्यागममनुद्धरतो दंड इत्युक्तं
भवति तत्सुतो द्वितीयो ऽभियुक्तो नागममुद्धरेत्। किंत्वविच्छिन्नाप्रतिरवसमक्षभो
गं। अनेन चागमस्यानुद्धरणे तो द्वितीयस्य न दंडोऽपि तु विशिष्टभोगमनुद्धरतो दंड इ
ति प्रतिपादितं। तत्सुतस्तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपि तु क्रमागतं भोगमा

त्रेऽनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दंडो नागमानुद्धरणे न विशिष्टो भो
गानुद्धरणे वेति । अभिहितं तत्र तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी । तत्रापि द्विती
ये गुरुस्तृतीयेऽपि गरीयसीति विवेक्तव्यं । त्रिष्वप्यागमानुद्धरणेऽर्थहानिः समानैव दंडे
तु विशेष इति तात्पर्यार्थः । उक्तं च । आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् । न तत्सु
तस्तत्सुतो वा भोगप्रहानिस्तयोरपीति ॥ अस्मात्तर्कात्मोपभोगस्यागमज्ञाननिरपेक्ष
स्य प्रामाण्यमुक्तं विनपूर्वक्रमादिः यत्र तस्यापवादमाह योऽभियुक्तः परेतः स्यात्तस्य रि
क्थात्तमुद्धरेत् । न तत्र कारणं भुक्तिरागमेन विना कृता । यदा पुनर्व्यवहर्ता अभियुक्तो
ऽभूत व्यवहारनिर्णयप्रागेव परतः स्यात्परलोकं गतो भवेत् । तदा तस्य सक्थी पुत्रादिस
मागममुद्धरेत् । यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधिता
पि न प्रमाणं पूर्वाभियोगेन भोगस्य सापवादत्वात् । नारदेनाप्युक्तं तथारूढविवाद
स्य प्रेतस्य व्यवहारिणः । पुत्रेण सोऽर्थः संशोध्यो न तं भोगो निवर्त्तयेदिति ॥ अभि

वला

णीते व्यवहारे व्यवहर्त्तरि प्रेते व्यवहारो न निवर्त्तत इति। स्थितं निर्णीतेऽपि च व्यवहारे स्थि
ते च व्यवहर्त्तरि व्यवहारः क्वचित्प्रवर्त्तते क्वचिन्न प्रवर्त्तत इति व्यवस्था। सिद्धयो व्यवहा
रदर्शिनां बलमाह। नृपेणाधिकृताः पूगाः श्रेणयो नानाजातीनामेकजातीनां मध्ये
ऽथ कुलानि च। पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणां। नृपेण राज्ञा अधिकृता व्यवहारदर्शी
ने नियुक्ता राज्ञा सभासदः कार्या इत्यादिनोक्ताः पूगाः समूहाः भिन्नजातीनामेकस्थान
निवासिनां यथा ग्रामनगरादयः श्रेणयो नानाजातीनामेकजातीनां मध्ये एकजाति
यकर्मोपजीविनां संघाताः यथा हेडाबुकानां ताम्बूलिककुविंदकचर्मकारादीनां च कु
लानि ज्ञातिसंबन्धिबन्धूनां समूहाः एतेषां नृपाधिकृतादीनां चतुर्णां पूर्वं यत्पूर्वं प
ठितं तत्तद्गुरु बलवद्वेदितव्यं नृणां व्यवहर्तॄणां व्यवहारविधौ व्यवहारदर्शने कार्ये
एतदुक्तं भवति नृपाधिकृतैर्निर्णीते व्यवहारे पराजितस्य यद्यप्यसंतोषः कुदृष्ट
बुद्ध्या भवति तथापि न पूगादिषु पुनर्व्यवहारो भवत्येवं पूगनिर्णीतेऽपि। न श्रेण्यादि

गमनं ताथाश्रेणिनिर्णीते कुलगमनेन भवति कुलनिर्णीतेपि श्रेण्यादिगमनं श्रेणिनि
र्णीते पूगादिगमनं पूगादिनिर्णीते नृपाधिकृतगमनं भवतीति नारदेन तु नृपा
धिकृते निर्णीतेऽपि व्यवहारे नृपगमनं भवतीत्युक्तं कुलानि श्रेणयश्च गणा
श्चाधिकृता नृपाः प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरमिति तत्र वृत्त पराजि
तस्तदासौ दंड्यः ॥ अथासौ जयति तदाधिकृताः सभ्यादंड्याः दुर्बलैर्व्यवहारदर्शि
भिर्दृष्टो व्यवहारः परावर्त्तते प्रबलदृष्टस्तु न निवर्त्तत इत्युक्तं इदानीं प्रबलदृष्टो
पि व्यवहारः कश्चिन्निवर्त्तत इत्याह बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्त्त
येत् स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा बलेन बलात्कारेणउपाधिना भ
येनादिनिर्वृत्तान्निष्पन्नान् व्यवहारान्निवर्त्तयेत् तथा स्त्रीभिर्नक्तं रात्राव
स्त्रीभिरपि ऽन्तरागारे ग्रामाभ्यांतरे बहिर्ग्रामादिभ्यः शत्रुभिश्च कृतान् व्यवहारा
न्निवर्त्तयेदिति संबंधः ॥ अपि च मत्तोन्मत्तार्त्तव्यसनिबालभीतादियोजितः ॥ अ

संबद्धकृतश्चैवव्यवहारोनसिध्यति॥ मत्तोमदनीयद्रव्येणउन्मत्तउन्मादेनमदवावि
धेनवातपित्तश्लेष्मसन्निपातग्रहसंभवेनोपसृष्ट॥ आर्त्तोव्याधिभा॥ व्यसनमिष्ट
वियोगानिष्टप्राप्तिजनितंदुःखंतद्वान्व्यसनीबालोव्यवहारायोग्यः॥ भीतोऽराति
भ्यः॥ आदिग्रहणात्सुरराष्ट्रादिविरुद्ध॥ पुरराष्ट्रविरुद्धश्चयश्चराज्ञाविसर्जितः
अनादेयोनवैधोधर्मविनिर्द्दिष्टःसदाहृतइतिस्मरणात्॥ एतैर्योजितश्चकृतोव्यवहा
रोनसिध्यतीति॥ आनियुक्तःसंबद्धकृतोपिव्यवहारेऽप्रतिषेधपरंनभवतीतिनसिध्य
तीतिसंबंधः॥ यत्तुस्मरणंगरोःशिष्यपितुःपुत्रेदंपत्योःस्वामिभृत्ययोः॥ विरोधेतुमिथ
स्तेषांव्यवहारोनसिध्यति॥ तदपिगुरुशिष्यादीनामात्यंतिकव्यवहारेऽप्रतिषेध
परंनभवतितेषामपिकथंचिद्व्यवहारस्यष्टत्वात्तथाहि॥ शिष्यशिक्षिरवधेनाशक्तौ
रज्जुवेणुविदलाभ्यांतनुभ्यामनेनघ्नत्राजाशास्यइतिगौतमस्मरणात्॥ नोत्तमां
गेकथंचनेतिमनुस्मरणाच्चयदिगुरुः॥ कोपावेशवशान्महतादंडेनोत्तमांगेताड

यति ॥ तदा स्मृतिव्यपेतेन मार्गेणाधर्षितः शिष्योयादि राज्ञे निवेदयति ॥ तदा भवत्ये
व व्यवहारपदं ॥ तथा भूर्या पितामहोपात्तेत्यादिवचनात् पितामहीयार्जिते भूद्रव्ये पिता
पुत्रयोः स्वाम्ये समाने यदि पिता विक्रयादिना पितामहोपात्तं भूम्यादि नाशयति तदा पु
त्रो यदि धर्माधिकरणं प्रविशति तदापि तापुत्रयोरपि भवत्येव व्यवहारः ॥ तथा दुर्भिक्षे
धर्मकार्ये च व्याधौ संप्रतिरोधके ॥ गृहीतं स्त्रीधनं भर्त्ता नाकामो दातुमर्हतीति स्मरणात्
दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भर्त्ता व्ययीकृत्य विद्यमानधनोपि याच्यमानो न ददा
ति तर्हि दंपत्योरपीष्यत एव व्यवहारः ॥ तथा भक्तदासस्य स्वामिना म व्यवहारपदं वक्ष्य
ति गर्भदासस्यापि गर्भवासादानाधिकृत्य । यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशया
त् ॥ दासत्वात्स विमुच्येत पुत्रभागं लभेत चेति नारदोक्तवचनात् ॥ तदमोचने पुत्रभागदा
ने च स्वामिना सह व्यवहारः केनचार्यते तस्माद् दृष्टादृष्टयोः श्रेयस्करो न भवतीति वादिभि
व्यवहारस्तत्प्रथमं शिष्यादयो निवारणीया राज्ञा सभ्यैर्वेति गुरोः शिष्यस्त्यादेः श्री

बदिधनाहूपसंख्यादिभिर्लिंगैः राज्ञे वयन्ति यदि न भावयति तद्राज्ञे समं दंड्योऽसत्यवादित्वात् ४१

॥३१॥

कस्यतात्पर्यार्थः ॥ असंसक्तनिबंधेनु शिष्यादीनामप्यसंसक्तनीत्याप्रवर्तनीयो व्यवहारः
यदाप्येकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च ॥ अनादेयो भवेद्वादो धर्मविद्भिरुदा
हृत इति नारदवचनं ॥ तत्रापि कस्यापि गणद्रव्यं हरिष्यत्सु संविदं लंघयेच्च यः ॥ तथा एक
मतं विद्विनां चेत्यादिस्मरणादेकार्थैव बहुभिः सार्द्धं विवहार इष्यत एवेति भिन्नार्थे
बहुत्वे एकस्य युगपद्व्यवहारो न भवतीति इष्टव्यं स्त्रीणामित्यपि गोपशौण्डिकादिस्त्री
णां स्वातंत्र्याद्व्यवहारो भवत्येवेति द्रष्टव्यम् ॥ सा कुलस्त्रीणां पतिषु जीवत्सु तत्पारतंत्र्यादना
देयो व्यवहार इति व्याख्येयं प्रेष्यजनस्य देत्येतदपि प्रेष्यजनस्य स्वामिपारतंत्र्यात् स्वार्थव्यव
हारे ऽपि स्वाम्यनुज्ञायैव व्यवहारो नान्यथेति योजनीयं ॥ ० परावर्त्ये व्यवहारमुक्त्वेदानीं
परावर्त्तद्रव्यमाह ॥ प्रनष्टाधिगतं देयं नृपेण धनिने धनं ॥ विभावयेन्नचेद्लिंगैस्तत्समं
दंडमर्हतीति प्रनष्टहिरण्यादि शौल्किकस्थानपालादिभिरधिगतं राज्ञो समर्पितं यत्तद्रा
ज्ञा धनिने दातव्यं ॥ अधिगमस्य स्वत्वानिमित्तत्वात् ॥ स्वत्वे प्राप्ते तत्परावृत्तिरनेनोक्ता

अत्र च कालावधिं वक्ष्यति ॥ शौल्किकैरित्यादि ॥ मनुना पुनः संवत्सरत्रयमवधिर्निर्दि-
ष्टः ॥ प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ॥ अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृप-
तिर्हरेदिति ॥ तत्र वर्षत्रयपर्यन्तमवश्यं रक्षणीयं ॥ तत्र यदि संवत्सरादर्वाक् स्वाम्याग-
च्छेत् ॥ तदा कृत्स्नमेव दद्यात् ॥ यथाह ॥ यदा तु संवत्सरादूर्ध्वमागच्छति तदा केंचिद्भागं र-
क्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात् ॥ यथाह ॥ आददीताथ षड्भागं प्रनष्टाधिमता-
न्नृपः ॥ दशमं द्वादशं वापि सतां धर्ममनुस्मरन्निति ॥ तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात् ।
द्वितीये द्वादशं भागं तृतीये दशमं चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात् ॥ राज्ञा न भाग-
स्य चतुर्थांशोऽधिगन्ते दातव्यः ॥ स्वाम्यनागमे नुक्तकृत्स्नस्य धनस्य चतुर्थमेवांशमधिगंतुस्त्रि-
तुर्यो राज्ञः शेषमित्यत्र संवत्सरमित्येकः वचनमाविरक्षितं ॥ राजा त्र्यब्दं निधापयेदि-
तिस्मरणात् ॥ हरेत्त्रप्ररतो नृप इत्येतदपि स्वाम्यनागमे त्र्यब्दादूर्ध्वं व्ययीकरणस्य-
नुज्ञानपरं ॥ आगते तु स्वामिनि व्ययीभूतेऽपि द्रव्ये राज्ञा स्वांशमवतार्य तत्समं दद्यादेत-

चादिरूपादिविषये । गवादिविषये वक्ष्यति । पणानेकशफे दद्यादित्यादिना ॥ ३६ ॥ र
ख्यापशुल्कशालादिनि नियातितस्य सुवर्णं । इत्येवस्याधिगमे विधिमुक्त्वाधुनास्वामि
चिरंनिखातस्य निधेः शेषत्वात्स्वस्याधिगमे विधिमाह । राजा लब्ध्वा निधिं दद्याद्द्विजेभ्यो:
र्धं द्विजः पुनः । विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठं
शमाहरेत् । अनिवेदितविज्ञातो दाप्यस्तं दंडमेव च । उक्तलक्षणं निधिं राजा लब्ध्वा अ
र्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान्श्रुताध्ययनसंपन्नः सदा
चारो यदि निधिं लभेत् तदा सर्वमेव गृह्णीयात् यस्मादसौ सर्वस्य जगतः प्रभुः इतरेण
तु राजा विद्वद्ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राज्यषष्ठांशं
अधिगंत्रे दद्यादिति । गोतमेनापि निध्यधिगमो राजधनं न ब्राह्मणस्याभिरूपस्य । अ
ब्राह्मणोप्याख्याता षष्ठमंशं इत्यादि । दक्षिणमेते त्येक इति अनिवेदितइतिकर्त्तरिनि
ष्ठा । अनिवेदितश्चासौ विज्ञातश्च राज्ञोऽप्यनिवेदितविज्ञातः कश्चिन्निधिं लब्धा राज्ञे

(६२)

नन्निवेदितव्या। नृपे ज्ञातश्चेत्तदा सर्वं निधिं दाप्यो दंडं च शक्त्यापेक्षया। अथ निधेरपि स्व
स्यागत्यसूपकं संख्यादिभिः स्वत्वं भावयति तदा तस्मै सर्वं निधिं दत्वा षष्ठं द्वादशं वा
शं स्वयमाहरेत्। यथाह मनुः। ममायमिति यो ब्रूयान्निधिं सत्येन मानवः। तस्याददीत ष
ड्भागं राजा द्वादशमेव वेति। अंशविकल्पस्तु वर्ण्य कालाद्यपेक्षया। वितरितव्यं तु चौ
रैर्हृतं प्रत्याह। देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु। अददद्धि समाप्नोति किल्बिषं यस्य
तस्य तत्। चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तद्द्रव्यं तस्मै
राज्ञा दातव्यं। हि यस्माददद्ददप्रयच्छन् यस्य तदपहृतं तस्य किल्बिषमाप्नोति तस्य चौ
रस्य च। यथाह मनुः। दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनं। राजा तदुपयुंजानश्चौरस्या
प्नोति किल्बिषमिति। यदा चौरहृतादि धनादि स्वयमुपभुंक्ते तदापि चौरस्य किल्बिषमा
प्नोति। अथ चौरहृतमुपेक्षते तदा जानपदस्य किल्बिषमथ चौरहृताहरणाय यतमा
नोपि शक्नुयादाहर्तुं तदा तावद्धनं स्वकोशाद्दद्यात्। यथाह गौतम। चौरहृतमव

जित्यथयथा स्यात्तेगमये क्रोशाद्वादशयादिति ॥ कृत्स्नाद्देयापायनोपि ॥ प्रत्याहर्तुमशक्तस्तु
धनं चौरैर्हृतं यदि स्वकोशात्तद्धि देयं स्यादशक्तेनमहीक्षितेति ॥ ७ ॥ साधारणासाधा
रणरूपां व्यवहारमातृकामभिधायाधुनाष्टादशानां व्यवहारपदानामाद्यमृणा
दानं दर्शयति प्रतीतभागोवृद्धिः स्यादित्यादिनामेव ॥ आधिस्तदुत्पन्नेनैव प्रादिष्टे
द्विगुणे धन इत्येवमनेनैव ब्राह्मणो दानं सप्तविधमाह शास्त्र ऋणे देयमाहृत्यशर्मदेयं अनेना
धिकारिणा देयमस्मिन्समये देयमनेन प्रकारेणादेयमित्यधमर्णीयं पंचविधमुत्त
मर्णे दानविधिरादानविधिश्चेति द्विविधमित्येतच्च नारदेन स्पष्टीकृतं ॥ ऋणं देयं
मादेयं च येन यत्र यथा च यत् ॥ दानग्रहणधर्मार्श्च ऋणानमित्तिस्मृतं ॥ मितिस्मृत
मिति तत्र प्रथममुत्तमर्णस्यादानविधिमाह ॥ तत्पूर्वकत्वादितरस्य ॥ प्रतीतभागो
वृद्धिः स्यान्मासि मासि संबंधके वर्णक्रमाच्छतं द्वित्रिचतुष्पंचकमन्यथा मासि मासि
प्रतिमासं बंधके विश्वासार्थे यदीधीयते आधीरिति यावत् बंधनेन सह वर्त्तत इति सं

२

बंधकः प्रयोगस्तस्मिन् सबंधके प्रयोगे प्रयुक्तस्य द्रव्यस्याशीतितमो भागो वृद्धिर्धर्म्या भवति । अन्यथा बंधकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वित्रिचतुःपंचकं शतं धर्म्यं भवति । ब्राह्मणेऽधमर्णे द्विकं शतं क्षत्रिये त्रिकं वैश्ये चतुष्कं शूद्रे पंचकं मासि मासीत्येवं द्वौ वा त्रयो वा चत्वारो वा पंच वा द्वित्रिचतुष्पंचाः द्वित्रिचतुष्पंचा अस्मिन् शते वृद्धिर्दीयत इति द्विचतुष्पंचकं तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयत इति कन् इयं च वृद्धिर्मासि मासि गृह्यत इति कालिका इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति तथा च नारदेन । कायिका कालिका चैव कारिता च तथा परा । चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधेत्युक्ता । कायाविरोधिनी शश्वत्पणपादादि कायिका । प्रतिमासं स्रवंती या वृद्धिः सा कालिका मता री वृद्धिः सा कारिता नाम यार्णिकं न स्वयं कृता वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति । गृहीतविशेषेण वृद्धिः साकारांतरमाह कांतारगा

सुदशकं सोमुद्रा विंशकं शतं ॥ कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगा ये वृद्ध्या धनं ग
हीत्वाधिकलाभार्थमतिगहनं प्राणधनविनाशशंकास्थानं प्रविसंति ते दश
कं शतं दद्युः ये च समुद्रगास्ते विंशकं शतं मासि मासीत्येवमेतदुक्तं भवति कां
तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विंशकं ॥ उत्तमर्णोप्याददीत मूलविनाशस्यापि
शंकितत्वादिति ॥ इदानीं कारितां वृद्धिमाह । दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु
जातिषु ॥ सर्वे ब्राह्मणादयो धमर्णाः प्रबंधकं सबंधकं वा स्वकृतां स्वात्मोपगतां
वृद्धिं सर्वासु जातिषु दद्युः । क्वचित्कृतापि वृद्धिर्न भवति ॥ यथाह नारदः । न वृद्धिः
प्रीतिदत्तानां स्यादनाकारिता क्वचित् ॥ अनाकारितमप्यूर्ध्वं वत्सरार्द्धाद्विवर्द्धत इति
यत्तु याचितकं गृहीत्वा देशान्तरस्थं प्रति कात्यायनेनोक्तं ॥ यो याचितकमादाय याचि
तोप्यदत्त्वा देशान्तरं याति तं प्रति ॥ तेनैवोक्तं कृतोद्धारमदत्त्वा यो याचितस्तु दिशं व्रजेत्
ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयादिति । यः पुनः स्वदेशे स्थित एव याचितो याचि

कं धान्येशदेत्लवे वाह्यो नातिपंचतामिति ॥ शदः क्षेत्रफलं पुष्पमूलफलानीत्यादिऽ
लवश्चोमंयोर्णा चमरीकेशादि ॥ वाह्यो बलीवर्दतुरगादि धान्यशबला चबा ह्यावि
बाधा वृद्धिः पंचगुणत्वं नातिक्रामतीति ॥ तत्राधमर्णयोग्यतावशेन दुर्भिक्षादि
कालवशेन च व्यवस्था द्रष्टव्या एतच्च सकृत्प्रयोगे सकृदाहरणे च वेदितव्यं ॥ पुरुषां
तरसंक्रमणे तु प्रयोगांतरकरणे तस्मिन्नेव वा पुरुषे कंकसेकाम्यां प्रयोगांतरी
करणे सुवर्णादिकं द्विगुण्यं व्यतिक्रम्य पूर्ववद्वर्द्धते सकृत्प्रयोगेऽपि प्रतिदिनं प्रति
मासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽधमर्णो देयस्य द्वैगुण्यासंभवान्न पूर्वोक्त न वृद्ध्या
सह द्विगुणमतिक्रम्य वर्द्धत एव ॥ यथाह मनुः ॥ कुसीदवृद्धिर्द्विगुण्यं नात्येति स
कृदाहिता ॥ सकृदाहृतेत्यपि पाठोऽस्ति उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसी
दवृद्धिर्द्वैगुण्यं नात्येति नातिक्रामति यदि सकृदाहिता सकृत्प्रयुक्ता ॥ पुरुषांतरसंक्रम
णादिना प्रयोगांतरकरणे द्विगुण्यमत्येति ॥ सकृदाहृते पक्षे शनैः शनैः प्रतिदिनं

तोयाचितिकं न ददाति तेयाचनकालनादारभ्य वृद्धिं दापयेद्राजेति तां यथाह ॥ स्वदेशेपि
स्थितोयत्तुनदद्याद्याचितः क्वचित् ॥ ततनोकारितां वृद्धिमनिच्छेतं वदापयेदिति ॥ अ
नाकारितवृद्धेरपवादो नारदेनोक्तः ॥ पण्यमूल्यंभृतिन्यासोदंडायश्चप्रकल्पितः
वृथादानाक्षिकपणा वर्द्धते नाविवक्षिताः ॥ अविवक्षिताः अविवक्षिता अनाका
रिता इति ॥ ७ ॥ अधुना द्रव्यविशेषेण वृद्धिविशेषमाह संततिस्तुपशुस्त्रीणां पशूनां स्त्री
णां संततिकाम्यरेव वृद्धिः ॥ पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टि संततिकामस्य प्रयो
गः संभवतेग्रहणं च क्षीरपरीग्वर्मार्थिनः ॥ ८ ॥ अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणा
न्तरेण चिरकालावस्थितस्य द्रव्यस्य कियती परावृद्धिरित्यपेक्षितं प्राह ॥ रसस्याष्ट
गुणा परा वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ रसस्यातैलघृतादेर्वृद्धिग्रहणमं
तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नातः
परं वर्द्धते तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा त्रिगुणा द्विगुणा च वसु

प्रतिमासमिति तं प्रतिमासं प्रतिसंक्रमणं प्रतिसंवत्सरं वा धरं एपणादाहृत्ता द्विगुणमत्ये
तीजीव्यात्व्यये तथा गोतमेनाप्युक्तं । चिरस्थाने द्विगुणं प्रयोगस्येति प्रयोगस्येत्येक
वचननिर्देशात्प्रयोगान्तरकारणे द्विगुणपातिक्रमोऽभिप्रेतः । चिरस्थान इति निर्देशात्
शनैः शनैर्वृद्धिग्रहणे गुणातिक्रमादर्शितः । ध नप्रयोगे धर्मोऽनुक्तः सांप्रतं प्रयुक्त
धनस्य ग्रहणे धर्मोऽनुच्यते । प्रपन्नं साधयं साक्ष्यादिभिर्भाविते वा साधयन् नर्थं न वा
च्यो नृपतेर्भवेत् साध्यमानो नृपं गच्छन् दंड्यो दाप्यश्च तद्धनं । प्रपन्नमभ्युपगमेन त
धर्मेण धनं साक्ष्यादिभिर्भावितं वा साधयन् प्रत्याहरन् धर्मादिभिरुपायैरुत्तम
र्णो नृपतेर्वाच्यो निवारणीयो न भवति धर्मादयश्चोपाया मनुना दर्शिताः । ध
र्मेण व्यवहारेण सांत्वेनेत्याद्युक्त्वा छलेनाचरितेन वा । प्रयुक्तं साधयेदर्थं पंचमेन बलेन
च । वक्ष्यति धर्मेण प्रीतियुक्तेन सत्यवचनेन व्यवहारेण साक्षिलेख्याद्युपन्यासेन छ
लेनोत्सवादिव्याजेन भूषणादिग्रहणेन प्राचारितेनाभोजनेन पंचमेनोपायेन बले

नानिगडबंधादिना अपचयोर्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यात् इति। प्रपन्नं
साधयन्नर्थं न वाच्य इतिवदत्त्प्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति
एतदेव स्पष्टीकृतं नारदेनापीडयेद्यो धनीकश्चिद्दारिणं न्यायवादिनं। तस्माद्दर्थो
न सहीयेत तत्समं वा दमं॥ इति यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो नृपं
गच्छेद्राजानमभिगम्य साधयेत्तमाभियुक्ते सदंड्यो भवति शक्त्यनुसारेण धनिनेतद्धनं
दाप्यश्च राज्ञा दापनेच प्रकारादिशीतोः स्वजानु स्वामिने विप्रेमान्वैनिव प्रदापयेत् दे
शाचारेण चोन्यो स्तुदुष्टाक्रमं पीड्यादापयेत्। तच्छेदं सुहृद्वा पित्नेनैव प्रदापयेदिति
साध्यमानो नृपं गच्छ। इत्येतत्तु स्मृत्यावारं न्यपेतेनेत्यस्य प्रत्युदाहरणं बहवश्च यदा
बहुभुत्तमर्णाः युगपदुत्थिता तेषां केन धमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षिते
त्वाह। गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः। दत्त्वा तु ब्राह्मणायैव नृपते
स्तदनंतरं। समानजातीयेषु धनिषु पूर्वक्रमेण धनं गृहीतं। तेनैव क्रमेण धमर्णि

कोदाप्यो राज्ञा भिन्नजातीयेषु ब्राह्मणादिक्रमेण ॥ ४ ॥ यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्न
मर्थं धर्मादिभिरुपायैः स्वयं साधयितुमसमर्थो राज्ञा साधितार्थो यद्युत्तमर्णिकः ॥ अधमर्णि
कात्राज्ञा प्रतिपन्नार्थात् साधिताद्दशकं शतं दाप्यः प्रतिपन्नस्य साधितस्यार्थस्य द
शमं सं अंशं राज्ञा अधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः उत्तमर्णिकस्तु प्राप्तार्थः ॥ पंच
कं शतं प्रतिरूपेण दाप्यः ॥ साधितस्यार्थस्य विंशतितमं भागं उत्तमर्णाद्राजा भृत्यर्थं
गृह्णीयादित्यर्थः अप्रतिपन्नार्थसाधनेन दण्डभागो दर्शितो भिद्दवेतावितो द्रव्यादिन्या
य साधनमधमर्णिकं प्रत्युक्तमधुना निर्धनमधमर्णिकं प्रत्याह ॥ हीनजातिं परिक्षी
णमृणार्थं कर्म कारयेत् ॥ ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयं ॥ ब्राह्मणादिजा
तिरुत्तमर्णो हीनजातिं क्षत्रियादिजातिं परिक्षीणं निर्धनमृणार्थं कर्मणा निर्वर्तनार्थं क
र्मात्मनुरूपं कारयेत् कर्तव्याविरोधेन ॥ ब्राह्मणं पुनः परिक्षीणं निर्धनः शनैः शनै
र्यथोदयं यथासंभवमृणं दाप्यः ॥ अत्र च हीनजातेर्ग्रहणं समानजातेरप्युपलक्षणम्

तस्यैवसमजातीमपिपरीक्षीणांयथोचितंकर्मकारयेत्॥ब्राह्मणग्रहणंचश्रेयोजातेरु
पलक्षणंमत्तस्यक्षत्रियादेनापिपरीक्षीणो।विरुपादेः॥शानिर्दिष्टोयथोचितंदयंए
तदेवमनुनास्पष्टीकृतं॥कर्मणापिसमंकुर्याद्धनिकेनाधमर्णिकः॥समोपकृष्टजाति
श्चदद्याछ्रेयांस्तुतच्छनैरिति॥उत्तमर्णेनसमंनिवृत्तोत्तमर्णोधमर्णव्यपदेशमात्मा
नमधमर्णः कर्मणाकुर्यादित्यर्थः॥७॥किंचिदीयमानंनगृह्णातिप्रयुक्तंयः स्वकंधनं
मध्यस्थस्थापितंचस्याद्वर्द्धतेनततःपरं॥उपचयार्थंप्रयुक्तंधनमधमर्णेनदीयमा
नमुत्तमर्णोवृद्धिलोभाद्यदिनगृह्णातितदाधमर्णेनमध्यस्थादौस्थापितंयदि
स्यात्तदातत्स्थापनाद्दूर्द्धंनवर्द्धते।अमध्यस्थापितमपियाच्यमानोनददातितत:पू
र्ववर्द्धतएव॥८॥इदानींदेयमसंप्रदायेनचदेयंतदाह॥अविभक्तैःकुटुंबार्थेयदृणंतु
कृतंभवेत्॥दद्युस्तद्रिक्थिनःप्रेतेप्रोषितेवाकुटुंबिनि॥अविभक्तैर्बहुभिःकुटुं
बार्थमेकैकेनवायदृणंकृतंतदृणंकुटुंबीदद्यात्तस्मिन्प्रेतेप्रोषितेवतद्रिक्थिनः

सर्वैर्देयः। येन देयमित्यत्र प्रत्युदाहरणमाह। न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं
पिता। दद्यादृते कुटुंबार्थान्न पतिः स्त्रीकृतं तथा। पत्या कृतं न योषिद्भार्या निर्वद
द्यात्। पुत्रेण कृतं योषिन्माता न दद्यात्। तथा पुत्रेण कृतं पिता न दद्यात्। तथा
भार्याकृतं पतिः। कुटुंबार्थादृते इति सर्वशेषमतश्च कुटुंबार्थः येन केनापि कृतं त
कुटुंबिना देयं तदभावे तद्धनहारैर्देयमित्युक्तमेव। पुत्रपौत्रैर्ऋणं देयमिति
वक्ष्यति न स्य पुरस्तादपवादमाह। सुराकामद्यूतकृतं दंडशुल्कावशिष्टकं। वृथा
दानं तथैवेह पुत्रो दद्यान्न पैतृकं। सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यस
नानिर्वृत्तं द्यूते पराजयात्तमित्तं दंडशुल्कयोरवशिष्टं वृथादानं धूर्तवंदिबंदि
मल्लादिभ्यो यत्प्रतिज्ञातं धूर्तबंदिमल्लादिभ्यो यत्प्रतिज्ञातैः धूर्तबंदिनिम
ल्लैश्च कुवैद्यकितवेशात्ते वाटचारणचौरेद्दत्तं भवति। निष्फलामिति स्मरणा
त्। यत्तद्दणं पित्रा कृतं पुत्रादिः शौंडिकादिभ्यो न दद्यात्। अत्र दंडशुल्काव

शिष्टकमित्यवशिष्टग्रहणात्सर्वं दातव्यमिति न मंतव्यं ॥ दंडं वा दंडशेषं वा शुल्कं तच्छेष
रमेव वा ॥ न दातव्यं तु पुत्रेण यच्च न व्यावहारिकमित्योशनसस्मरणात् गौतमेनाप्युक्तं ॥ मद्य
शुल्कद्यूतदंडान् पुत्रा नाध्यावहेयुरिति ॥ न पुत्रस्योपरि संभवंतीत्यर्थः ॥ अनेनादेयमृणं
मुक्तं ॥ ६ ॥ न पतिः स्त्रीकृतं तत्पत्येत्यस्यापवादमाह ॥ गोपशौंडिकशैलूषरजव्याधयोषि
तां ॥ ऋणं दद्यात् पतिस्तासां यस्माद्वृत्तिस्तदाश्रया ॥ गोपो गोपालः शौंडिकः सुराकारः शैलू
षो नटः रजको वस्त्राणां रंजकः व्याधो मृगयुः ॥ एतेषां योषिद्भिर्यदृणं कृतं तत्पतिभि
र्देयं ॥ यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना यस्माद्वृत्तिस्तदाश्रयेति हेतू
पदेशादन्येपि ये योषिदधीनजीवनास्तेपि योषित्कृतमृणं दद्युरिति गम्यते ॥ ७ ॥ प
तिकृतं भार्या न दद्यादित्यस्यापवादमाह ॥ प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतं ॥ स्वयं
कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति ॥ मुमूर्षुणा प्रवसता वापि पत्या नियुक्तया सह्यानेन
यत्प्रतिपन्नं तत्पतिकृतमृणं देयं ॥ यच्च पत्या सह भार्यया कृतं तदपि भर्त्रभावे भार्यया

ऽपुत्रया देयं । यच्च स्वयमेव कृतमृणं तदपि देयं नु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्त-
व्यं संदेहाभावात् । उच्यते भार्या पुत्राश्च दासास्त्रय एवाधनाः स्मृताः यत्ते समधिगच्छंति
यस्यैते तस्य तद्धनं । इति वचनात् निर्द्धनत्वेन प्रतिपन्नादिष्वदानाशंकायामिदमुच्यते ।
प्रतिपन्नं स्त्रिया देयमित्यादि । न चानेन वचनेन स्त्र्यादीनां निर्द्धनत्वमभिधीयते । परतं-
त्रमप्रतिपदेन परत्वात् । एतच्च विभागप्रकरणे स्पष्टीकरिष्यते । तान्यस्त्रीदातुमर्हती-
ति एतत्तर्हि न वक्तव्यं । विधानेनैवान्यत्र प्रतिषेधसिद्धेः । उच्यते । प्रतिपन्नं स्त्रिया देयं पत्या
या सह यत्कृतमित्यनयोरपवादार्थमुच्यते । अन्यत्र सुंकामारिवचनो यातं प्रतिपन्नमपि
पत्या सह कृतमपि न देयमिति ॥ पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र च काले दात-
व्यं तत्त्रितयमाह । पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेपि वा । पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षि-
भावितं । पितृमयदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशं गतो ऽचिकित्सनीयव्याध्याद्यभिभूतो
वा तदा तत्कृतमृणमवश्यं देयं पुत्रेण पौत्रेण वा पितृधनाभावेपि पुत्रत्वेन च । तत्र कृ-

सोप्ययमेव । पित्र्याभावे पुत्रः पुत्राभावे पौत्र इति । पुत्रेण पौत्रेण वा निह्नवे कृते स्थिता साक्ष्या
दिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः । अत्र पितरि प्रोषित इत्येतावदुक्ते । कालविशे
षस्तु नारदेनोक्तो द्रष्टव्यः । नारवाक्यं स च विंशद्धिमोऽपि पितरि प्रोषिते सुतः ऋणं दद्यात् निन्हवे
वान्योऽष्टमात्तत्पित्र्याद्विवेति । प्रेतेऽप्राप्तव्यवहारकालो नैव दद्यात् । प्राप्तव्यवहारकाल
स्तु दद्यात् स च कालस्तेनैव दर्शितः । गर्भस्थैः सदृशो ज्ञेय आष्टमाद्वत्सराच्छिशुः । बालआषो
डशाद्वर्षात्पोगंडश्चेति शब्द्यते । परतो व्यवहारज्ञः स्वतंत्रः पितरावृते इति । यद्यपि पितृम
रणादूर्ध्वं बालोऽपि स्वतंत्रो जातं तथापि नर्णभाक् भवति यथाह । अप्राप्तव्यवहारश्च स्वतं प्रा
तंत्रोऽपि हि नर्णभाक् । स्वातंत्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतमिति तथा अप्रासेध्या
ह्रीनाभिषेधश्च दृश्यते । अप्राप्तव्यवहारश्च इतो दानोऽसुखीव्रती । विषमस्थाश्च नासेध्या
नाचेता नाह्वयेन्नृप इति । तस्मादतः पुत्रेण जातेन स्वार्थं सुस्न्यपन्नतदृणान्येतामोच
नीयो यथा न नरकं व्रजेदिति । पुत्रेण व्यवहारज्ञतया जातेन ~~स्वार्थं सुस्न्यपत~~ मिष्पन्नेति

व्याख्यायं श्राद्धे तु बालस्याप्यधिकारः । न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादिति
गौतमस्मरणात् । पुत्रपौत्रैरिति बहुवचननिर्देशाद्बहवः । पुत्रा यद्यविभक्ताः स्वांशा
नुरूपेण ऋणं दद्युः । अविभक्ताश्चेत्संभूय समुत्थाने न गुणप्रधानभावेन वर्तमाना नानाप्रधा
नभूतं ऋणं वदेयुरिति गम्यते । यथाह नारदः । अत ऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः
अविभक्ता विभक्ता वा यस्तां चोद्वहते धुरं इति । अत्र च यद्यपि पुत्रपौत्रैर्ऋणं देयमित्य
विशेषेणोक्तं । तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव देयं । पौत्रेण तु समं मू
ल्यमेव दातव्यं । न वृद्धिरिति विशेषोवगन्तव्यः । ऋणमात्मीयवत्पित्र्यं पुत्रैर्देयं विभावितं
पितामहं समं देयं तत्सुतस्यान्नेति वृहस्पतिवचनात् । अतो विभावितमित्यविशेषोपदा
नात्साक्षिभावितमित्यत्र त्वपत्रमात्र्लिग्रहणं प्रमाणोपलक्षणं समं यावद्गृहीतं तावद्देयं न
वृद्धिः । तत्सुतस्य प्रपौत्रादेयमगृहीतधनस्य गृहीतधनस्य तूत्तरश्लोके स्पष्टयिष्यते ॥ छ ॥ ऋण
पाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शिताः तेषां च समवाये क्रमोपि दर्शितः

दानींकर्तृतरसमवायेचक्रमामाह ॥ रिछग्राहीऋणंदाप्योयोषिद्ग्राहस्तथैवच ॥ पुत्रोनान्या
श्रितःद्रव्यःपुत्रहीनस्यरिक्थिनः ॥ अन्यदीयंद्रव्यमन्यस्यक्रयादिव्यतिरेकेणयस्वीय
भवतितद्दृष्टंरूपेणग्रह्णातिसतत्कृतमृणंदाप्योनचौरादिः ॥ योषितंतंभार्यांगृह्णाती
तियोषिद्ग्राहःसतथैवर्णंदाप्योयदीयांयोषितंयोगृह्णातिसतत्कृतमृणंदाप्यः ॥ योपि
तोऽविभाज्यद्रव्यंनचैनसिद्धव्यपदेशानर्हन्चाद्वैरेनानिर्दिशः ॥ पुत्रश्चानन्याश्रितद्रव्यऋ
णंदाप्यः ॥ अन्यत्राश्रितमन्याश्रितंअन्याश्रितंमातरपिनसंबंधिद्रव्यंयस्यासवनन्या
श्रितद्रव्यंनअत्याश्रितद्रव्यअनन्याश्रितद्रव्यः ॥ पुत्रहीनस्यरिक्थिनऋणंदाप्यइति
संबंधः ॥ नएतेषांसमवायेक्रमस्यपाठक्रमएव ॥ ऋक्थग्राहऋणंदाप्यस्तदभावेयोषिद्ग्रा
हस्तदभावेपुत्रइति ॥ नचैतेषांसमवायएवनोपपद्यते नभ्रातरोनपितरःपुत्रा
ऋक्थहराःपितुरितिपुत्रेसत्यन्यस्यऋक्थग्रहणासंभवात् ॥ योषिद्ग्राहोपिनोपपद्यतेन
हितीयश्चसाध्वीतांकद्ग्रातीपादेश्यतइतिस्मरणात् ॥ तथापिपुत्रोदाप्यइत्यप्युक्तं

पुत्रपौत्रैर्भर्त्तुर्ण्णं देयमित्युक्तत्वात् । अन्यनामपि श्रितद्रव्यादित्ति विशेषणमप्यनर्थकं पु
त्रेसति द्रव्यस्यात्यापयणासंभवात् संभवेवसंछीग्राहीत्यनेनैव गतार्थत्वात् । पुत्र
हीनस्य साक्षितद्रव्य~~स्यात्यापयणासंभ~~त्येतदपि नवक्तव्यं पुत्रेसतिद्रव्यस्यात्याश्रि
त्यपि स्वछं ग्राहसत्के ग्रहीसंभवात् । क्लीबांधबदीराहीनां पुत्रेऽन्येपि स्वछंहरत्वाभावा
त् । तथाच क्लीवादीनन्तु नुभ्यत्क्ली क्रस्य भर्त्तव्याश्च निरंशकाइति वक्ष्यति । तथा सर्व
र्णपुत्रोप्पत्यापवर्त्तो न लभेत्तिकेयामिति गौतमवचनाव । अतश्च क्लीवादिषु पुत्रेषु
स्वन्यायेप्रवर्त्तेचसवर्णपुत्रेसति स्वक्त ग्राहीपित्तव्यतस्सुत्रादिन: । योषिद्ग्राहो पद्या
पिशाक्षाविरोधेन न संभवतीति तथाप्यातिक्लौ तन्निषेधः । पूर्वपतिसत ग्रीयाकरणाधि
कारी भवेत्येव यक्ष्यति । स्वैरिणीनामेति मास्टं हुं ह्लातिपश्च पुनर्भुवांनिरुपणम्प्र
थमा । यथाह नारदः । परपूर्वाः स्त्रियस्त्वन्याः सप्तप्रोक्ता यथाक्रमं । पुनर्भूस्त्रिविधा ता
सां स्वैरिणी तु चतुर्विधाः । कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमो

ता: पुनः संस्कारकर्मणा देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते उत्पन्नसाहसान्यस्मै
सा द्वितीया प्रकीर्तिता उत्पन्नसाहस उत्पन्नव्यभिचारा असत्सु देवरेषु स्त्री बान्ध
वैर्या प्रदीयते सवर्णाय पिंडाय सा तृतीया परिकीर्तिता स्त्री प्रसूता प्रसूता वा प
त्यावेव तु जीवति कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा कौमारं पतिमुत्सृज्य या त्वन्यं
पुरुषं श्रिता पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्तिता मृते भर्तरि तु प्राप्तान् देवरा
दीनपास्य या उपगच्छेत् परं कामात् सा तृतीया प्रकीर्तिता: प्राप्ता देशाद्धनक्रीता क्षुत्पिपा
सातुरा च या तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता प्रतिमा स्वैरिणीनां या प्रथमा
च पुनर्भुवां असंगतयोः प्रपत्तिकृतं दद्याद्यस्तेनुपाङ्कृतं इति तथान्योपि योषि द्रूहे
क्रणापकरणे कोधिकारी इति निबद्धश्चीतः यातु सप्रधनैव स्त्री सा पत्या वात्यमाश्रि
तात् सोऽस्या द्वद्याहरणं भर्तुरुत्सृजेद्यात्तथैव तां प्रनष्टे न धनेन सह वर्तते इति स प्रध
ना बंधु धनेति पाचरि या चतत् तथा अधनस्य ह्यपुत्रस्य ह्यपुत्रस्य मृतास्या पेतियः स्त्रि

४०

यं ॥ ऋणं वोढुः स भजयेति वचा स्य धनं स्मृतमिति ॥ पुत्रस्य पुत्रत्वं वचनं क्रमार्थं अनन्त्या
श्रितद्रव्य इति बहुषु पुत्रेषु ऋक्थाभावे पिंडाग्रहणयोग्यस्यैव ऋणापाकरणाधिका
रो नायोग्यस्येत्याधाद्येशिरित्येवमर्थः ॥ पुत्रहीनस्य ऋक्थिन इत्येतदपि पुत्रपौत्रहीन प्रो
पौत्रादयो यदि ऋक्थं गृह्णंतितद्दरसीदाप्यास्तान्यथेत्येवमर्थं ॥ पुत्रपौत्रौ तु ऋक्थग्रहणा
भावेपि पुत्रपौत्रौ दाप्याविति स्फुटं ॥ यथाह नारदः ॥ क्रमादभ्यागतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतं ।
दद्युः पितामहं पौत्रास्तच्चतुर्थान्निवर्तते इति सर्वं निबद्धं यद्वा योषिद्ग्राहाभावे पुत्रो
दाप्य इत्युक्तं ॥ पुत्राभावे योषिद्ग्राहो दाप्य इत्युच्यते ॥ पुत्रहीनस्य ऋक्थिन इति ॥ तच्च
शब्देन योषिदेवोच्यते ॥ सैववास्य धनं स्मृतमिति स्मरणात् ॥ यो यस्य हरते दारान्स
स तस्य हरते धनमिति च ॥ ननु योषिद्ग्रहणेन योषिदेवोच्यते सैववास्य धनं स्मृतमिति स्म
रणात् स्त्रीग्राहाभावे पुत्रऋणं दाप्य ॥ पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धं ॥ उभयसद्भा
वे न कश्चिद्दाप्य इति ॥ नैष दोषः ॥ प्रातिमः स्वैरिग्राहिणो ॥ हिणाः प्रथमपुनर्भूग्राहिणः

८७

सप्रधनस्त्रीहारिणश्चाद्याभावे दाप्यः ॥ पुत्राभावे तु निर्द्धनानिरपत्यस्त्रीस्त्ययोर्भिन्नाहीदा
प्यः इति एतदेवोक्तं नारदेन ॥ धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत् ॥ पुत्रोऽसतो
स्त्रीधनिनोः स्त्रीवधनंच स्त्रीधनेते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीधनिनोरसतोः
पुत्रभावर्णभाक् ॥ धनीपुत्रयोरसतोः स्त्रीहार्येवर्णभाक् स्त्रीहार्यभावे पुत्रऋणभाक्
पुत्राभावे हारीति विरोधप्रतिभासो ॥ परिहारः पूर्ववत् ॥ पुत्रहीनस्य ऋक्थिन इत्यस्या
व्याख्या ॥ एतेन धनस्त्रीहारिपुत्राऋणं कर्णस्य दाप्या इत्यपेक्षायामुत्तमर्णस्य
दाप्यास्तदाभावे तत्सुताद्यैः पुत्राद्यतावेकस्य दाप्या इत्यपेक्षायामभिपतितष्टते पुत्र
हीनस्य ऋक्थिन इति पुत्राद्यन्वयहीनस्योत्तमर्णस्य लोकऋक्थीऋक्थग्रहणयोग्यः स
पिंडादिस्तस्य साक्षिनादाप्यः ॥ तथा च नारदेन ॥ ब्राह्मणस्य तु यद्देयं सान्वयस्य न चा
स्ति वेत् ॥ निर्वपेत्तत्सकुल्येषु तदभावेस्य बंधुषु इत्यभिधायाभिहितं ॥ यदा तु न कुल्याः
स्फ न च संबांधे बंधवाः तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेदिति ॥ ६ ॥ अधुना

पुरुषावशेषेणस्त्रणस्य ग्रहणं प्रतिषेधस्य प्रसंगादन्यदपि प्रतिषेधति । आदरणं मदं पत्योः पि
नः पुत्रस्य चैव हि । प्रातिभाव्यमृणं साक्ष्यं च न स्त्र तमन्वादिभिरपि नु प्रतिषिद्धं । साधनं
रणाधनत्वात् । प्रतिभाव्यसाक्ष्ये च योः पक्षे द्रव्ये द्रव्यव्ययावसानत्वात् । ऋणस्य वाव
श्यप्रतिदेयत्वात् । एतच्च परस्परानुमतिं व्यतिरेकेणापि भवति । ननु दंपत्योर्विभाग
स्य प्रातिभाव्यादिप्रतिषेधो न युज्यते । तयोर्विभागाभावेनाविशेषणार्थक्यात् । वि
भागाभावश्चापस्तंबेन दर्शितः । जायापत्योर्न विभागो विद्यत इति । सत्यं । श्रौतस्मार्ताग्नि
साध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु वा । तथा हि जायापत्यो
र्न विभागो विद्यत इत्युक्त्वा किमिति न विद्यत इत्यपेक्षायां हेतुमुक्तवान् । पाणिग्रहणा
द्धि सहत्वं कर्मसु तथा पुण्यफलेषु चेति । हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सह
त्वं श्रूयते । जायापत्योः अग्निमादधीयातामिति । तस्मादाधाने सहाधिकारात् । आधा
नसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः । तथा कर्म स्मार्तेविवाहाग्नावपि त्यादि स्मरण

द्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव प्रतिष्ठाभयाविधाग्निनिरपेक्षेषु कर्मसु पूर्-
त्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते ॥ तथा पुण्यनायफलेषु स्वर्गादिषु जायापत्योः
सहत्वं श्रूयते ॥ दिविज्योतिरजरमारभेतामित्यादि ॥ येषु पुण्यकर्मसु सहाधिकारस्तेषां फ-
लेषु सहत्वमिति बोधव्यं ॥ न पुनः ॥ भर्त्रननुज्ञाया नुष्ठितानां फलेष्वपि ॥ ननु द्रव्यस्वा-
मित्वेपि सहत्वमुक्तं द्रव्यपरिग्रहेषु च ॥ न हि ननु विप्रवासो नैमित्तिके दाने स्तेयं उप-
दिशंतीति सत्यं ॥ द्रव्यस्वामित्वं यत्पादिशंतमानन न पुनरस्य विभागाभावः ॥ यस्मा-
द्द्रव्यपरिग्रहेषु चेत्युक्तं तत्र कारणमुक्तं ॥ भर्तुर्विप्रवासे नैमित्तिके ऽवश्यकर्त्तव्ये
दाने ऽतिथिभोजनाभिक्षाप्रदानादौ हि यस्मान्न स्तेयमुपादिशंतिमन्वादयस्तस्माद्द्रा-
वीयामपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यादिति तस्माद्भर्तुरिच्छया भार्यायाम-
पि द्रव्यविभागो भवत्येव न स्वेच्छया यथा वक्ष्यामि ॥ यदि कुर्यात्समानंशान्पत्न्यः कार्याः
समांशिका इति ॥ ४ ॥ अधुना प्रातिभाव्यं निरूपयितुमाह ॥ दर्शने प्रत्यये दाने प्रातिभा-

व्यंविधीयते। ऽआद्यौतुवितथेदाप्यावितरस्यसुताऽअपि। प्रातिभाव्यंनामविश्वासार्थं
पुरुषांतरेणसमयः। तच्चविषयभेदात्त्रिधाभिद्यते। एतोऽमुकस्यपुत्रोयमुकरवराप्रा
ग्रपथाद्दर्शनेदर्शनापेक्षायामेनंदर्शयिष्यामीति। ऽअन्यपेविश्वासेस्यमत्प्रत्ययेनाऽप्रधनं
प्रयच्छनायंत्वांवंचयिष्यते। यतोऽमुकस्यपुत्रोयमुर्वराप्रायभूरस्यग्रामवरोऽस्तीति। दाने
यद्ययंनददातितदानीमहमेवदास्यामीतिप्रतिभाव्यंविधायतइतिप्रत्येकंसंबंधः
ऽआद्यौतुदर्शनप्रत्ययप्रातिभुवौवितथेऽन्यथाभावेऽदर्शनेविश्वासव्यभिचारेवदाप्यौ
राज्ञाप्रस्तुतंधनमुत्तमर्णस्य। इतरस्यसुताऽअपीतिवँभापूर्वयोः सुतानदाप्याइत्युक्तो द
सुताइतिवदत्तानपौत्रादाप्याइतिदर्शितं। एतदेवस्पष्टीकर्तुमाह दर्शनप्रतिभूर्यत्र
मृतः ऽप्रात्ययिकोऽपिवा। नतत्पुत्राऋणंदद्युर्दद्युर्दानायःस्थितः। यदादर्शन
प्रतिभूःप्रात्ययिकोवाप्रातिभूर्दिष्टंगतः। तदानयोऽप्रतिभाव्यायातंपेनऋकमृणंन
नदद्युः। यस्तुदानायास्थितः प्रतिभूर्दिष्टंगतस्तस्यपुत्रादद्युर्नपौत्रा। तेवमूल्यमेवद

द्धूनवृद्धिं ॥ ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः समं दद्यात्तत्सुतौ तु न दाप्याविति
निश्चय इति व्यासवचनात् ॥ प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद्गृहीतं ता
वदेव दद्यात् न वृद्धिं ॥ तथा सुतोपि प्रातिभाव्यागतं वर्ण्यं यथाक्रममगृहीतधनौ न दाप्या
विति ॥ यद्यपि स्मरणे खादको वित्तहीनः स्याल्लग्नको वित्तवान् यदि ॥ मूलं तस्य भवे
द्देयं न वृद्धिं दातुमर्हतीति तैपि लग्नकः प्रातिभूः खादको धमर्णः ॥ लग्नको वित्तवान् य
दि मूलं तत्स्थापयेद्वित्तवान्मृतस्तस्य पुत्रेण मूल्यमेव दातव्यं ॥ न वृद्धिरिति व्याख्या
यं यत्र दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा बंधकं यत्र यदि संगृहीत्वा प्रातिभूर्जातस्तत्र त
त्सुता अपि तस्मादेव बंधकात् प्रातिभाव्यायातमृणं दद्युरेव ॥ यथाह कात्यायनः गृहीत्वा
बंधकं यत्र दर्शनेस्य स्थितो भवेत् । विना पित्रा धनात्तस्माद्दाप्यः स्यात्तदृणं सुत इति द
र्शनस्य ग्रहणं प्रत्ययस्योपलक्षणं विना पित्रा पितरि प्रेते दूरदेशं गते चेति ॥ यस्मिन्नने
कप्रातिभूसंभवस्तत्र कथं दातव्यमित्याह ॥ बहवः स्युर्यदि स्वांशैर्दद्युः प्रातिभुवा धनं

द

एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ यद्येकस्मिन् प्रयोगे द्वौ बहवो वा प्रतिभुव
स्तदर्णं विभज्य स्वांशेन दद्युः ॥ एकच्छायाश्रितेष्वेकस्याधमर्णस्य छायासादृश्यं तामा श्रु
श्रिता एकच्छायाश्रिताः । अधमर्णो यथा कृत्स्नद्रव्यदानाय स्थितस्तथा दाने प्रतिभु
वोऽपि प्रत्येकं कृत्स्नदानाय स्थिताः ॥ एवं प्रदर्शने प्रत्यये च ॥ तेष्वेकच्छायाश्रितेषु प्रति
भूतेषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामं ॥ अतश्च धनी कोऽपि वित्ताद्यपेक्षया
स्वार्थं प्रार्थयते स एव कृत्स्नं दद्यान्नांशतः ॥ एकच्छायाश्रितेषु यश्चिद्देशांतरं गतस्तत्पुत्राश्च
संनिहितेतत्तद्दाधनिके छायासत्सर्वं दाप्याः ॥ मृते तु कस्मिंश्चित्स्य पित्रंशाम वृद्धिकं दाप्याः
यथाह कात्यायनः ॥ एकच्छायाप्रविष्टानां दाप्यो यस्तत्र दृश्यते ॥ प्रोषिते तत्सुतः सर्वं पित्र
ंशं तु मृते न समं इति ॥ प्रातिभाव्यर्णवान विधिश्शुल्कप्रतिभूदत्तस्य प्रतिक्रियाविधि
माह ॥ प्रतिभूर्दापितो यत्र प्रकाशं धनिनां धनं ॥ द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥
यद्दत्तं प्रतिभूस्तत्पुत्रावाधानिके नोपपीडितः प्रकाशं ~~धनिनेनाय~~ चनं सर्वजनसमक्षं रज्ञा

धनिनां दापितो न पुनर्द्वैगुण्यल्लोभेन स्वयमुपेत्य दत्तं । यथाह नारदः । यंचार्थं प्रतिभूर्दद्या
द्धनिकेनोपपीडितः । ऋणिकं तं प्रतिभुवे द्विगुणं प्रतिदापयेदिति । ऋणिकैरधमर्णैस्त
त्स्य प्रतिभूवस्तद्रव्यं द्विगुणं प्रतिदातव्यं स्यात् । तच्च कालविशेषमनपेक्ष्य सद्य एव
द्विगुणं दातव्यं वचनारंभसामर्थ्यात् । एतच्च हिरण्यविषयं नान्यद्वचनं द्वैगुण्यमात्रं
प्रतिपादयति । तश्च पूर्वोक्तकालक्रमाबाधेनाप्युपपद्यते यथा जातिष्टिविधानं
श्रुचिन्त्वाबाधेन । अपि च सद्यः सवृद्धिकदानपक्षे पशुस्त्रीणां सद्यः संतत्यभावान्मूल्य
दानमेव प्राप्नोतीति तदसत् । वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परेत्यनेनैव काला
मेण द्वैगुण्यादिसिद्धौ द्वैगुण्यमात्रविधाने वचनमनर्थकं स्यात् । पशुस्त्रीणां तु कालक्र
मपक्षे ऽपि संतत्यभावे स्वरूपेदानमेव यदा प्रातिभूरपि द्रव्यदानानंतरं कियता कालेना
धमर्णेन संयुज्यते तदा संततिरपि संभवत्येवीयद्वा पूर्वसिद्धसंतत्या सह पशुस्त्रियो दा
स्यतीति न किंचिदेतत् । अथ प्रातिभाव्ये प्रीतिसंतमतश्च प्रतिभुवा दत्तं प्रीतिदत्तमेव

नचप्रीतिदत्तस्ययाचनात्प्राग्वृद्धिरस्ति ॥ यथाह ॥ प्रीतिदत्तंनुयत्किंचिद्वर्द्धतेतन्त्वयाचि
तं ॥ याच्यमानमदत्तंचेद्वर्द्धतेनैपंचकंशतमिति ॥ प्रतश्चास्यप्रीतिदत्तस्यास्माद्वचना
त्प्रतीतिः ॥ द्विगुणप्रतिदातव्यमित्येतावदिहप्रतीयते ॥ तस्मात्कालनक्रममनपेक्ष्यैव
द्विगुणंप्रतिदातव्यंवचनारंभसामर्थ्यादितिसिद्धं ॥ ७ प्रतिभूदत्तस्यसर्वत्राद्वि
गुण्येप्राप्तेऽपवादमाह ॥ संततिःस्त्रीपशुष्वेवधान्यंत्रिगुणमेववस्त्रंचतुर्गुणंप्रोक्तं
रसश्चाष्टगुणस्तथा ॥ हिरण्याद्विगुणवकालानादरे ॥ एतत्स्त्रीपश्चादयःप्रतिपादित
वच्यादाप्यःश्लोकस्तुव्याख्यातएवपस्पष्टव्यस्यपावद्धिःपराकाष्ठोक्ता ॥ एतदुव्यप्राति
भूदत्तंस्वादत्तेनतस्यवृद्ध्यासहवालविशेषमनपेक्ष्यसद्योदातव्यमितिनात्पर्यार्थः
यदानुदर्शनप्रतिभूः सप्रतियन्नेकालेऽधमर्णंदर्शयितुमसमर्थः ॥ तदातदन्वेषणा
यतस्यपक्षत्रयंदातव्यं ॥ तत्रयदिदर्शयति ॥ तदामोक्तव्योऽन्यथाप्रस्तुतंधनंदाप्यः न
ष्टस्यान्वेषणार्थंतुदाप्यंपक्षत्रयं~~[illegible]~~परं ॥ यद्यसौदर्शयत्रमोक्तव्यः ॥ प्रतिभूर्न

वेत् ॥ काले व्यतीते प्रतिभूर्यदि तन्नैव दर्शयेत् ॥ निबंधं दापयेत्तं तु प्रेते चैष विधिः स्मृ
तः इति कात्यायनवचनात् ॥ लग्नकविशेषनिरोधश्च तेनैवोक्तः ॥ न स्वामी न च वैरी च स्वाम
नाधिकृतस्तथा ॥ वेरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित् ॥ नैव साक्षी न मित्रं च न चैवा
त्यंतवासिनः ॥ राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः ॥ नात्रा क्रोधान्निनेदातुं दंडं राज्ञे च त

ना

समौ वक्तातो ग्रहीतव्यः प्रतिभूः स्वक्रियांप्रति ॥ नीसंदिग्धो ऽभिशप्तः ॥ अत्यंतवासिनो नि
ष्ठिकब्रह्मचारिणः ॥ इति प्रतिभूविधिः ॥ धनयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च
यथाह नारदः ॥ विश्रंभहेतू द्वावत्र प्रतिभूराधिरेव वा इति ॥ तत्र प्रतिभूर्निरूपित इदानी
माधिर्निरूप्यते ॥ आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थं अधमर्णेनोत्तमर्णे
क्रियते आधीयत इति आधिः स च द्विविधः कृतकालो ऽकृतकालश्च पुनश्चैकि
कशो द्विविधः गोप्यो भोग्यश्च यथाह नारदः ॥ अधीक्रियत इत्याधिः स वि
ज्ञेयो द्विलक्षणः ॥ कृतकालोपनेयश्च यावद्देयोद्यतस्तथा स पुनर्द्विविधः प्रोक्तो गो

व्यो भोग्यस्तथैव चेति । कृतो कालो ऽवधानकाल एवं चायुस्मिन्काले द्वयोस्संवादो मयाय
माधिर्मोक्तव्यो ऽन्यथा त्वयैवाधिर्भविष्यतीत्येवं निरूपिते काले उपनेयः । आत्मसमी
नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतीक्रम्य द्वयोर्मयायमाधिर्मोक्तव्यो ऽन्यथा
त्वयैवाधिर्भविष्यतीत्येवं निरूपिते काले उपनेय आत्मसमीपं नेतव्यो मोचनीय
इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयमुद्यतो नियतः स्थापित इत्यर्थः । यव
छेयमुद्यतो यावद्देयोद्यतः गृहीतः धनप्रत्यर्पणावधिर्निरूपितकाल इत्यर्थः । गो
प्यो रक्षणीयः एवं चतुर्विधस्याधेर्विशेषमाह । आधिः प्रणश्येद्द्विगुणे धने यदि
दिन मोक्ष्यते काले कालेन तां तेन स्यात्फलभोग्यो न नश्यति । प्रतिगुणे धने स्वकृ
तयावध्याकाले न यदि न मोक्ष्यते तक्रमेण द्विगुणीभूते वध्यापि आधिरधमर्णेन द
व्यवादानेन न मोक्ष्यते तदा नश्यत्यधमर्णस्य धनप्रयोक्तुः स्वं भवति कालकृतः ऽ
क्षतकालः आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः मनुकाले निरूपि

तेवाद्धेन नश्येत्‌ द्विगुणधनाग्रहणे वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रा
दि रामादिः स न कदाचिदपि नश्येत्‌ कृतकालस्य भोग्य गोप्यस्य गोप्यस्य भोग्यस्य च तत्का
लातिक्रमे नाशोऽनन्तरः। काले कालकृतो नश्येदिति। प्रकृतकालस्य भोग्यस्य नाशाभा
वउक्तः। फलभोग्यो न नश्यतीति। यादृशो ह्याद्याधिः प्रणश्येदित्येतदकृतकालगोप्या तका
धिविषयमवतिष्ठते। द्विगुण्यातिक्रमेण निरूपितकालातिक्रमेण चाधिनाशे च
तुर्दशदिवसप्रतीक्षणं कर्तव्यं। बृहस्पतिवचनात्‌। हिरण्ये द्विगुणीभूते पूर्णे काले
कृतावधेः। बंधकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य वै। तदंतराधनं दत्वा ऋणी बंध त
कमाप्नुयादिति। मन्वाधिः प्रणश्येदित्यनुपपन्नं। अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानि
ग्र विक्रयादेरभावात्‌। धनिनश्च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात्‌। मनुवचनविरो
धाच्च न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय इति कालेन संरोधः कालसंरोधात्‌
चिरकालमवस्थानं तस्मात्‌ कालसंरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति ना

72

न्यत्राधीकरणमेस्ति ॥ नचविक्रयएवमाधीकरणंविक्रयप्रतिषेधाद्धनिनः ॥ स्वत्वाभा
वोवगम्यतइत्युच्यते ॥ आधीकरणमेवलोकेसोपाधिकस्वत्वनिवर्त्तिहेतुः ॥ आधी
स्वीकारश्चसोपाधिकस्वत्वापत्तिहेतुःप्रसिद्धः ॥ तत्रधनद्वैगुण्येननिरूपितकालप्राप्तौ
वाद्रव्यदानस्यात्यंतनिवृत्तेरनेनवचनेनाधमर्णिकस्यासांतिकीस्वत्वनिवर्त्तिरुत्तम
र्णस्यचात्यंतिकंस्वत्वंभवति ॥ नचमनुवचनविरोधः ॥ यत्तूक्तंनत्वेवाधौसोप
कारेकौसीदींवृद्धिमाप्नुयादितिभोग्याधिंप्रस्तुत्येदमुच्यते ॥ नचाधेःकालसंरोधा
न्निसर्गोस्तिनविक्रयइति ॥ भोग्यस्याधेश्चिरतरकालावस्थानेप्याधीकरणविक्र
यनिषेधेनधनिनःस्वत्वंनास्तीति ॥ इहाप्युक्तंफलभोग्योननश्यतीति ॥ गोप्याधौतु
(ना) एवमागरश्चमनुना ॥ नभोक्तव्योबलादाधिर्भुंजानोवृद्धिमुत्सृजेदिति ॥ इहापिवक्ष्यते
गोप्याधिभोगेनोवृद्धिरिति ॥ आधिःप्रणश्येद्द्विगुणइतितुभोग्याधिंप्रत्युच्यतइ
तिसर्वमविरुद्धं ॥ ७ ॥ किंचगोप्याधिभोगेनोवृद्धिःसोपकारेऽथहापिते नष्टोदे

यो विनश्येद्दैवराजकृताद्‌ऋते। गोप्याधेस्तु ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति। अल्पे
ऽप्युपभोगे महत्यपि वृद्धिके हातव्या। समयातिक्रमात्। तथा सोपकारेऽनुपकारिणि
बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते
नोऽवृद्धिरिति संबंधः। नष्टो विकृतिं गतस्ताम्रकटाहादिः स्थिरद्रुमेदनादिना पूर्ववत्
कृत्वा देयः। उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या। भोग्याधेर्यदि नष्टत्वं तदा पूर्ववत्कृ
त्वा देयो वृद्धिसद्भावे वृद्धिर्वा हातव्या। विनष्टस्यात्यंतिकं नाशं प्राप्तः सोऽपि दे
यो मूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूल्यनाशः। वि
नष्टे मूलनाशः स्याद्दैवराजकृतादृते। इति नारदवचनात्। दैवराजकृतात्तु दे
वमन्वषाकदेशोपप्लवादि दैवकृतादिनाशादेना। तथा स्वापराधरहिताद्राजन
कृतात्। दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यं मधमर्णेनाध्यंतरं वा। यथा
ह। स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते। आधिर्भोग्योऽपकर्तव्यो देयं वा धनिने धनमि

२

54

त्र

तितैस्तोतसायद्दत्तइतिदेवक्षत्तोपलक्षणं ॥ अपिच आधेः स्वीकरणात्सिद्धी रक्षमाणोऽप्य
सारतां यातश्चेदन्यथाधेयोधनमाप्नुयाधानिभवेत् ॥ आधेर्गोप्यस्य भोग्यस्य च स्वीक
रणादुपभोगाद्वाधिग्रहसिद्धिर्न साक्षिलेख्यमात्रेण नप्रतिदेशमात्रेण ॥ यथाहनारदः
आधिस्तुद्विविधः प्रोक्तो जंगमस्थावरस्तथा सिद्धिरस्योभयस्यापि भोग्यागोयद्यस्तिनाच
थेति अस्यचफलं आधेःप्रतिग्रहे क्रीतेपूर्वोनुबलवत्तरेति ॥ यस्वीकारांतांक्रियाऽ
सापूर्वाबलवतीस्वकाररहिता नपूर्वापिनबलवतीति ॥ सचाधिः प्रयत्नेनरक्ष्यमा
णोपिकालवशेनयद्यसारतामाविष्कृत एवसवृद्धिकमूल्यद्रव्यापचयीत्तणोतांगत
स्तदाधिरन्यः कर्तव्योधनिनेवाधनंदेयंरक्ष्यमाणोऽप्यसारतामितिवदताधिः प्र
यत्नेनरक्षणीयोधनिनेतिध्वाधितं ॥ छ ॥ आधिः प्रणश्येद्द्विगुणे इत्यस्यापवादमा
ह ॥ चरित्रबंधककृतंसवृद्ध्यादापयेद्धनं सत्यंकारकृतंद्रव्यंद्विगुणंप्रतिदापयेत् ॥
चरित्रंशोभनंतेरित्रेणबंधकं चरित्रबंधकं तेनयद्द्रव्यमात्ममात्कृतंपराधीनंवा

वाकृतं ॥ एतदुक्तं भवति धनिनः स्वच्छाशयान्वेषाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमे
व धनिनाधमर्णाधीनं न सहू मूल्यमधिकद्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमम
स्यकृतं ॥ यदि वाधमर्णस्य स्वस्त्वच्छायशयान्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव ध
निनाधमर्णाधीनं ॥ कृतमिति तद्दनं सर्वं हि नयोऽदृष्टासद्दायपेदयमाशयः ॥ एवंरूपं बंधकं
द्विगुणीभूतेऽपि द्रव्ये न नश्यति किं तु द्रव्यमेव द्विगुणं दातव्यमिति ॥ तथा सत्यंकारकृतं ॥ क
रणं कारोऽभिवेद्यक्रसत्यस्य कारः ॥ सत्यंकारः कारे सत्यागदस्येति मुम् ॥ सत्यंकारे
ण कृतं सत्यंकारकृतं ॥ अयं प्राभिसंधिः यथा बंधकार्पणसमये एवं छंदपरिभाषितं
द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाशः इति तदा तद्द्विगुणं दा
पयेदिति ॥ अन्योऽर्थः चरित्रमेव बंधकं चरित्रबंधकं चरित्रशब्देन गंगास्नानाग्निहोत्राऽ
दिजनितमपूर्वमुच्यते ॥ यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसत्कृतं तत्र तदेव द्विगुणीभू
तं दातव्यं नाधिनाश इति आधिप्रसंगादन्यदुच्यते ॥ सत्यंकारकृतमिति क्रयविक्र

धनेति ॥ धायाधमर्णस्यतत्रकिंकर्त्तव्यमित्यपेक्षितंप्राह ॥ तत्कालनक्षतमृत्योपात्तत्रतिष्ठेद्ववृद्धिकः ६

यादिव्यवस्थानिर्वाहायपेदंगुलीयकादिपरहस्तेकृतं ॥ तद्व्यवस्थातिक्रमोद्विगुणंदात
व्यं ॥ तत्रापियेनांगुलीयाद्यर्पितंसएवचेद्व्यवस्थातिवर्तीतेनतद्देदातव्यं ॥ इतरश्चेद्व्यवस्था
तिवर्तीतदातद्देव्यांगुलीयकाद्वीद्विगुणंप्रतिदापयेदिति ॥ ७ ॥ किंच गोप्याधिस्तस्यामोक्त
व्यःआधिहस्तेनोन्यथाभवेत् ॥ प्रयोजकेसतिधनंकुलेन्यस्याधिमाप्नुयात् ॥ धनदानेनाधि
मोक्षणायोपस्थीतस्याधिर्मोक्तव्योधनिनानवृद्धिलोभेनस्थापयितव्यः ॥ अन्यथामोक्ष
णेस्तेनश्चोरवद्दंड्योभवेत् ॥ असंनिहितेपुनःप्रयोक्तरिकुलेतद्दापहस्तेसवृद्धिकं ॥ तस्मि
न्कालेयत्तस्याधेर्मूल्यंतत्परिकल्प्यतत्रैवधनिनितमाधिंवृद्धिरहितंस्थापयेन्नतत्र
कुर्ईधनंवर्द्धेनयावद्धनीधनंगृहीत्वानमाधिंमुंचति ॥ यवद्वातन्मूल्यद्रव्यमर्णीप्रविशाये
दिति ॥ ८ ॥ यदातुद्विगुणीभूतेधनिनेद्विगुणंधनमेवगृहीतव्यंनत्वाधिनाशइतिविवा
रितमृणग्रहणकालेएव ॥ तद्वागुणीभूतेद्रव्येसंनिहितेवाधमर्णेधनिनाकिंकर्त्तव्य
मित्यतमाह ॥ विनाधारणीकाद्वापिविक्रीणीतससाक्षिकं ॥ धारणकादर्भेन्सौद्विना ध

ऽप्रथमर्णे संनिहिते ॥ साक्षिभिस्तदाप्तैश्च सहतमाधिं विक्रीय धनं गृह्णीयाद्धनी वा शङ्खो व्यव
स्थितविकल्पार्थः ॥ यदर्णग्रहणकाले द्विगुणीभूतेपि धने धनमेव ग्रहीतव्यं त्वाधिना
शइति ना विधारितं तदा ऽप्राधेः प्रणाशो द्विगुणादत्याधिनाशः ॥ विचारितेन्वयेपक्ष इति
भोग्याधौ विशेषमाह ॥ यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ॥ मोच्य आधिस्तदुत्पन्ने
प्रविष्टे द्विगुणे धने ॥ यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं ॥ तदाधौ दत्ते तदृणी क्र
भूते द्रव्ये न्याया आधिर्मोक्तव्य इति परिभाषाव्याकरणं तरेणवा भोग्यभावेन यदा द्विगु
णीभूतमृणं तदाधौ भोग्याध्येयानिति ॥ प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः ॥ अ
धिकोपभोगे तद्दापि देयं सर्वथा सवृद्धिकमूल्यर्पणीयाकरणं व्याधिकपभोगविषयमि
दं वचनं ॥ तमेतं क्षयाधिमाचक्षते लौकिकाः यत्रानुवत्सरार्थी एवाधिकपभोग इति परि
भाषा ॥ तत्र द्विगुणातिक्रमेपि यावन्मूल्यप्रदानं तावदुपभुंक्त एवाधिं ॥ एतदेव स्पष्टीकृ
तं वृहस्पतिना ॥ ऋणी बंधमवाप्नुयात् फलभोग्यं पूर्णकालं दत्वा द्रव्यं च सामकं ॥ य

दिप्रकर्षितं तत्स्यात् तदा न धनभाग्धनी । ऋणी च न लभेद्बंधं परस्परमतिं विनेति । अस्या
र्थः फलं भोग्यं यस्यासौ फलभोग्यो बंधः आधिः स च द्विविधः सवृद्धिमूल्यापाक
रणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र सवृद्धिमूल्यापाकरणार्थे बंधे पूर्णकालं
पूर्णः कालो यस्यासौ पूर्णकालः समाप्नुयाद्दणी यदा सवृद्धिकं मूल्यं फलद्वारेण
धनिनः प्रविष्टं तदा बंधमाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थे तु बंधं सामकं
दत्वाप्नुयाद्दणी समं मूल्यं सममेव सामकं अस्यापवादमाह यदि प्रकर्षितं तत्स्यात्
तद्बंधकं प्रकर्षितमतिशयः पितं वृद्धैरत्याधिकं फलं यदि स्यात् तदा न धनभाग्धनी सा
मकं लब्ध्वा नेत्र धनी मूल्यमदत्वैव ऋणी बंधमवाप्नुयादिति यावत् अथ च प्रकर्षि
तं तद्बंधकं वृद्ध्येच्छ पर्याप्तं तदा सामकं दत्वापि बंधं न लभेताधमर्णो वृद्धिशेषमपि
दत्वैव लभेतेत्यर्थः पुनरुक्तमथ अत्रापवादमाह परस्परमतं विना उत्तमर्णाधम
र्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तं परस्परानुमतौ तु ऋणमपि बं

धकेयावन्मूल्यदानमुपभुक्तेधनीनिकृष्टमपिमूल्यमात्रदानेनैवाधमर्णौलभतइति
केणादानप्रकरणं। उपनिधिंप्रत्याह।। वासनस्थमनाख्यायहस्तेन्यस्ययदर्प्यतेतद्द्रव्यंत
दौपनिधिकंप्रतिदेयंतथैवतत्।। निक्षेप्यद्रव्यस्याधारभूतंद्रव्यांतरंवासनंकरंडका
दितत्स्थंवासनस्थंयद्द्रव्यंरूपसंख्यादिविशेषमनाख्यायाकथयित्वामुद्रितमन्यस्य
हस्तेरक्षणार्थेविश्रंभादर्प्यतेस्थाप्यते। तद्द्रव्यमौपनिधिकमुच्यते। यथाहनारदः। अ
संख्यातमविज्ञातंसमुद्रंयन्निधीयते। तज्जानीयादुपनिधिंनिक्षेपंगणितंविदुरिति। प्र
त तिदेयंतथैवतत्। यस्मिन्स्थापितंतेनयथैवसमुद्राद्युपेतं। तन्नराजदैवकतस्करैः
तमुपनिधिंराजादैवेनोदकादिनातस्करैर्वापहृतेनष्टेनदाप्योसौयस्मिन्नुपाहितंध
निनएवतद्द्रव्यंयदिजिह्मकारितेनभवति। यथाहनारदः। ग्रहीतुःसहयोर्थेननष्टोन
ष्टःसदायिनः। दैवराजकृतेतद्वन्नचेत्तज्जिह्मकारितमिति। तस्याप्यपवादमाह। भ्रेषश्चे
न्मार्गितेदत्तेदाप्योदंडंचतत्समं। स्वामिनामार्गितेयाचितेयदिनददातितदातितद्दत्त

दुश्चरकालेयद्यपिराजादिभिर्न्नैबानाशः संजातस्तथापितद्द्रव्यंमूल्यंकल्पनयाधनिने
ग्रहीतादाप्योराज्ञेचतत्समंदंडं भोक्तारंप्रत्याह आजीवन्स्वेच्छयादंड्योदाप्यस्तंचा
पिसोदयंयः स्वेच्छयास्वाम्यननुज्ञयोपनिहितंद्रव्यमानीयस्यूपभुंक्तेव्यवहरत्वाप्रयो
गादिनात्मार्थमसावुपभोगानुसारेणचदंड्यस्तंचोपनिधिंसोदयमुपभोगेसच्छादि
कव्यवहारेसत्यभंधनिनेदाप्यः वाद्धप्रमाणेचैकंशतमिति एतच्चभक्षितेद्रव्ये
उपेक्षाज्ञाननष्टेनुत्तेवैवविशेषोदर्शितः भक्षितंसोदयंदाप्यः समंदाप्यमुपेक्षितं किं
चिन्नयूनंप्रदाप्यस्याद्द्रव्यमज्ञाननाशितमिति किंचिन्न्यूनमितिचतुर्थांशहीनं उ
पनिधधर्मिन्याचितादिष्वपिदिदिति दिशति याचितान्वाहितन्यासविक्षेपादि
ष्वयंविधिः विवाहद्युत्सवेषुवस्त्रालंकारादियाचित्वानीतंयाचितं यदेकस्यहस्ते
निहितंद्रव्यंतेनाप्यनुपश्चादन्यस्यहस्तेस्वामिनेदेहीतिनिहितंतदन्वाहितं न्यासोना
मगृहस्वामिनोदर्शयित्वातत्परोक्षसेवगृहजनहस्तेप्रक्षेपोगृहस्वामिनेसमर्पणीयः

यमिति । समं वक्षं तु समर्पणं निक्षेपः । आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय
न्यस्तस्य । स्पष्टवर्णादेः प्रतिन्यासस्य च परस्परप्रयोजनापेक्षया न्यासे त्वदीयरक्षणी
यमयेदं त्वदीयं रक्ष्यत इति न्यस्तस्य ग्रहणं । यथाह नारदः । एष एव विधिर्दृष्टो याचितान्वा
हितादिषु । शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव चेति । एतेषु याचितादिषु यं विधि
रुपनिधेर्यः । प्रतिदानादिविधिः स एव वेदितव्यः । इति निक्षेपप्रकरणं । प्रमाणं लि
खितं भुक्तिः साक्षिणश्चेति कीर्तितमित्युक्तं तत्र भुक्तिर्निरूपिता । सांप्रतं साक्षिस्वरू
पं निरूप्यते । साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति । यथाह मा[illegible]ः । समक्षदर्शनात्सा
क्ष्यं श्रवणाच्चैव सिध्यतीति । स च द्विविधः कृतोऽकृतश्च । साक्षित्वेन निरूपितः कृतः
अनिरूपितोऽकृतस्तत्र कृतः पंचविधो ज्ञेयोऽकृतः षड्विध इत्येकादशविधः
यथाह नारदः । एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः । कृतः पंचविधो ज्ञेयः षड्वि
धोऽकृत उच्यत इति तेषां च भेदस्तेनैव दर्शितः । लिखितः स्मारितश्चैव यदृच्छाभिज्ञ

नुः

12

एवच ॥ गूढश्चोत्तरसाक्षी च साक्षी पंचविधः स्मृतः ॥ तत्र इति लिखितो नाम स्मारितः पत्र
कारूढ इति ॥ स्मारितपत्रकारूढ इत्यस्य विवरणं तेनैव दत्तं यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा का
र्यं पुनः ॥ स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते इति यस्तु यदृच्छयाऽऽगतः साक्षी
क्रियाते स यदृच्छाभिज्ञः ॥ अनयोः पत्रानारूढत्वेऽपि तद्दत्तेनैव दर्शितः ॥ प्रयोजनार्थमा
नीतः प्रसंगादागतश्च यः द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकाविति तथा अ
र्थिनाऽत्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटं यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यते इति
तथा साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञित
इति षड्विधस्याप्यसत्तस्य भेदो नारदेन दर्शितः ॥ ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणां
कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः । कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षि
ण इति ॥ प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थं लेखकः प्राड्विवाकश्च सभ्याश्चैवा
नुपूर्वशः ॥ नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृता इति ॥ ते साक्षिणः कीदृकियं

(१०३)

तश्च भवंतीत्याह ॥ तपस्विनो दानशीलाः कुलीनःसत्यवादिनाःसत्यवादिनः । धर्मप्रधा
नाऋजवः पुत्रवंतो धनान्विताः ॥ त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः ॥ यथा
जाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ तपस्विनः शीलाः दाननिरताः कुलीनाः महाकु
लप्रसूताः सत्यवादिनः सत्यवदनशीलाः ॥ धर्मप्रधाना नार्थकामप्रधानाः ऋज
वोऽकुटिलाः पुत्रवंतः धनान्विताः सुवर्णादिधनयुक्ताः ॥ श्रौतस्मार्तक्रियापरा नि
त्यनैमित्तिकानुष्ठानरता एवंभूताः पुरुषास्त्र्यवराः साक्षिणो भवंति ॥ त्रयोऽवरान्यूना
येषां ते त्र्यवरास्त्रिभ्यो वर्जितभवंति ॥ परतस्तु यथाकामं भवंतीत्यर्थः ॥ जातिमनतिक्र
म्य यथाजाति जातयो मूर्द्धावसिक्ताद्याः अनुलोमजाः प्रतिलोमजाश्च तत्र मूर्द्धावसि
क्तानां मूर्द्धावसिक्ताः साक्षिणो भवंत्येवमंबष्ठादिष्वपि द्रष्टव्यो वर्णमनतिक्रम्य यथा
वर्णं । वर्णा ब्राह्मणादयः तत्र ब्राह्मणानां ब्राह्मणा एवोक्तलक्षणा उक्तसंख्याकाः
साक्षिणो भवंति ॥ एवं क्षत्रियादिष्वपि द्रष्टव्यं ॥ तथा स्त्रीणां साक्ष्ये स्त्रिय एव कुर्युः ॥ छ ॥

यथाह मनुः। स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति। सजातिसवर्णे संभवे सर्वस्मृद्धी वा क्रिसिक्रा

दयो ब्राह्मणादय। श्च सर्वेषु स्मृद्धीवासित्र्यषु ब्राह्मणादिषु च यथासंभवं साक्षिणो भवन्ति।

७ उक्तलक्षणामसंभवे षु स्मृद्धीवंसि प्रतिसेधरहितानामन्येषामपि साक्षित्वप्रतिपा

दनार्थः मसाक्षिणोक क्रव्यात्तिच पंचविधा नारदेन दर्शिताः। असाक्ष्यपि हि शास्त्रेषु

दृष्टः पंचविधो। वचनाद्दोषतो भेदात्स्वयमुक्तोमृतान्तर इति। केषुनर्वचनादसाक्षिण

इत्यत आह। श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः। असाक्षिणस्ते वचनान्नात्र हेतुरु

दाहृत इति। तापसा वानप्रस्थाः आदिशब्देन पितृ विवदमानादीनां ग्रहणं। यथाह संखः

पित्रा मीनैर्विवदमान गुरुकुलवासि परिव्राजक वानप्रस्थ निर्ग्रंथाः असाक्षिण इति दो

षादसाक्षिणो दर्शिताः। स्तेनाः साहसिकाश्चंडाः कितवा वधकास्तथा असाक्षिणस्ते दुष्टत्वा

त्तेषु सत्यं न विद्यत इति। चंडाः कोपनाः कितवा द्यूतकृतः। भेदादसाक्षिणश्च स्वरूपं तेनैव द

र्शितं। साक्षिणां लिखितानां च निर्दिष्टानां च वादिना। तेषां मे को न्यथावादी भेदात्सर्वे नसा

क्षिणः इति तथा स्वयमुक्तिरूपं चोक्तं स्वयमुक्तिरनिर्दिष्टः स्वयमेवैत्य यो वदेत् सूचीत्युक्तः
सशास्त्रेषु न स साक्षित्वमर्हतीति मतांतरेऽपि लक्षणमुक्तं। योऽर्थः श्रावयितव्यः स्यात्त
स्मिन्नसति वार्थिनि। कृतद्वदनुसाक्षित्वमित्युपसाक्षी मतांतरे इति। येनार्थिना प्रत्यर्थि
ना वा साक्षिणः इति। तस्मिन्नर्थिनि प्रत्यर्थिनि वा अप्रसत्ति मत्ते अर्थे वा निवेदितं साक्षी क
कस्मिन्नर्थे कस्मिन् वाक्त्ते तेषां साक्ष्यं वदत्विति मतांतरं साक्षी न भवंति। यत्र तु मुमूर्षुणा स्व
स्य नवपित्रा पुत्रादयः श्राविता अस्मिन्नर्थे मी साक्षिणः इति तत्र मतांतरेऽपि साक्षी प
व्याहर्तव्यः पतांतरोऽर्थिनिष्क्रांते मुमूर्षुश्राविता इति तथा श्राविता नुत्तरेणापि यत्स्वेषु
धर्मसहितः मतोऽपि तत्र साक्षी स्यात् षड्विधा चाहिता दिष्टाति। वा नेता न साक्षि
णो दर्शयति। स्त्रीबालवृद्धकितववन्मत्तोन्मत्ताभिशस्तकारंगावतारिपाखंडिकूटकृद्विक
लेंद्रियाः पतिताः साथ्यसंबंधीसहायरिपुतस्कराः साहसी दृष्टदोषश्च निर्धूताद्यः स
साक्षिणः स्त्री प्रसिद्धा बालोऽप्राप्तव्यवहारः वृद्धोऽशीतिकापरः वृद्धग्रहणं वच

ननिषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणार्थं॥ कितवः क्षदेवी॥ मत्तः पानादी
नां उन्मत्तो ग्रहाविष्टः॥ अभिशस्तोऽप्युक्तो ब्राह्महत्यादिना॥ रंगावतारी चारणः॥ पाषं
डिनो निर्ग्रंथरतयः॥ कूटकृत्कपटलेख्यादिकारी॥ विकलेंद्रियः श्रोत्रादिरहितः॥ प
तितो ब्रह्महारिदि॥ आप्त— हृत्॥ अर्थसंबंधी॥ विप्रतीपद्यमानार्थसंबंधी॥ सहायएक
कार्यः॥ रिपुः॥ शत्रुः॥ तस्करसेन॥ सहसी त्वबलावष्टंभकारी॥ दृ दृ दोषो दृष्टविरुद्धवच
नः॥ निर्धूतो बंधुभिस्त्यक्तः॥ आद्यशब्दादन्येषामपि स्मृत्यंतरोक्तानां दोषाद्दसा
क्षिणां भेदाद्दसाक्षिणां स्वयमुक्ते मत्तो नरस्य वस्महंणं स्तेतस्त्री बालादयः॥ साक्षि
णो न भवंति॥ बंधवाः साक्षिणेयाइत्यास्यापवादमाह॥ उभयानुमतः साक्षी भवः
कोपि धर्मवित्॥ सा न दृष्टं कं नियतमिति कधर्मानुष्ठायी धर्मवित्तमः एकोप्युभ
यानुमतश्चेत्समरी भवत्यपि शब्दान्नद्वावपि श्रोत्तस्मार्तक्रियापराइत्येवसरणाम
पि धर्मविच्चेत्समानं॥ तथापि तेषामुभयानुमत्यभावेऽपि साक्षित्वं भवत्येकस्य द्वयोर्वा

वं

भयानुमत्येव साक्षित्वं भवेत्तीर्थवत्स्यवरग्रहणं । तथाहि नोदाहृतशीलादित्यस्यापवाद
माह । सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे । संग्रहणे स्त्री निवक्ष्यमाणलक्षणे नितेषु
सर्ववचनात् निषिद्धास्त्रयः प्रमतिग्रहारहिताश्च साक्षिणो भवंति । दोषादसाक्षिणो भेदा
दसाक्षिणः स्वयमुक्तिश्चात्रापि साक्षिणो न भवंति । मनुष्यमारणं चौर्यं परदाराभिमर्श
नं पारुष्यमुभयं चेति सहसंस्याश्चतुर्विधमिति वचनात् । यद्यपि स्त्रीसंग्रहणादि चौर्यपा
रुष्याणां साहसत्वं तथापि तेषां बलावष्टंभेन जनसमक्षं क्रियमाणानां साहसत्वं रह
सि क्रियमाणानां तु संग्रहादिशब्दवाच्यत्वमिति । तथा साहसान्यप्युपादाने । साक्षि
श्रवणमाह । श्रावयेद्वापि प्रातिवादी समीपगान् । अर्थिप्रत्यर्थिसान्निध्ये साक्षिणः सम
वेतान् नानासमेताः पृष्टाः प्रब्रूयुरिति गौतमवचनात् । वक्ष्यमाणान् श्रावयेत् । तत्रा
पि कात्यायनेन विशेषो दर्शितः । सभान्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसंनिधौ । प्राड्विवाको
नियुंजीत विधिनानेन सांत्वयन् देवब्राह्मणसान्निध्ये साक्षिणां अवेइतः । द्विजान् उदङ्मुखा

न्यायवाक्येव श्रुचिः श्रुचिन् । आद्यमाक्षिणः । एवं लिंगस्पर्शपार्थेमेरौ समस्तानित्तैवारा दिता

न्विक्रांतार्थान्पृथक्पृथक् इति । तथा ब्राह्मणादिषु श्रावणे मनुना नियमो दर्शितः सत्ये

न शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोबीजकांचनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति । ब्राह्मणं

अन्यथा ब्रुवतः सत्यं ते नश्यतीति शापयेत् । क्षत्रियं वाहनायुधानि तव विफलानीति ।

गोबीजकांचनानि तव विफलानीति वैश्यं । शूद्रमन्यथा ब्रुवतः तव सर्वाणि पातकानि

भविष्यंतीति शापयेत् । अत्र चापवादस्तेनैव दर्शितः । गोरक्षकान्वाणिजकांस्तथा

कारुकुशीलवान् । प्रेष्यान्वार्धुषिकांश्चैव विप्राञ्छूद्रवदाचरेत् । एतच्च विप्रग्रहणं

क्षत्रियवैश्ययोरप्युपलक्षणार्थं । कुशीलवा गायनाः । प्रतिवादिना साक्षिदूषणे दत्ते प्र

त्यक्षयोग्यदावरोषदात्न्यादिषु तथैव निर्णयः । अयोग्येषु तु तद्वचनात्क्षौकतञ्च नि

र्णये न साक्ष्यं तेरेणोक्तिना नीवस्था । यदि साक्षिदोषमुद्भाव्य सस्यंधयनुं नशन्तोक्तिप्रतिवा

दी । तदा मोसाय तु सारणं दंडः । अथ साधयति तदा न साक्षिदण्डः । यथाह । अभाव

यत्सर्वं शक्यो वक्तुं साक्षिणां स्फुटं ॥ भाविता साक्षिणो वर्ज्याः साक्षिधर्मनिराकृता इति गर्हि
ष्टेषु च सर्वेषु साक्षिषु दुष्टेषु पूर्वपक्षी क्रियांतरनिरपेक्षस्तदा पराजितो भवति । जितः
स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा ॥ यदि वादी निराकांक्षः साक्षिसत्ये व्यवस्थित इति
स्मरणात् । साक्षीकोक्षासाक्षिपत्तरमवलंबेतेत्यभिप्रायः ॥ कथं श्रावयेदित्याह । यया
तत्कृतांल्लोका महापातकिनां तथा ॥ अग्निदानां च लोका ये बालघातिनां ॥ स तां
सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ॥ सुकृतं यत्त्वया किंचिज्जन्मांतरशतैरपि ॥ तत्स
र्वं तस्य जानीहि यं पराजयसे मृषा ॥ पातकोपपा-कमहापातककारिणां अग्निदानां
स्त्रीबालघातिनां च ये लोकास्तान्सर्वान् स अवाप्नोति यः साक्ष्यमनृतं वदेत् । तथा जन्मां
तरशतेषु कृतं कृतं तत्सर्वं तस्य भवति यस्तेनानृतवदनेन पराजितो भवतीति श्रावये
दिति संबंधः ॥ एतच्च शूद्रविषयं द्रष्टव्यं शूद्रं सर्वैस्तु पातकैरिति शूद्रे सर्वपातकश्रावण
स्य विहितत्वात् । गोरक्षकादिद्विजातिविषयं च गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान्

स

अनेकजन्मार्जितसुकृतमस्यमहापात ---- उकादिफलप्राप्तेश्वानृतवानमात्रेण
नुपपत्तेः। साक्षिसंत्रासार्थमिदमुच्यते॥ यथाह नारदः॥ साराणैर्धर्म्मवचानैः सत्यमहा
त्म्यकीर्त्तनैः॥ अनृतस्यापवादैश्च भृशमुत्रासयेदिमान् इति॥ यदानुश्राविताः साक्षि
णः कथंचिन्न ब्रूयुस्तदा किं कर्त्तव्यमित्यत आह॥ अब्रुवन्हि नरः साक्ष्यमृणं सदशबं
धकं॥ राज्ञा सर्वं प्रदाप्यस्स्यात्षट्चत्वारिंशकेऽहनि॥ यः साक्ष्यमंगीकृत्यश्रावितस्सन् कथं
चिन्न वदति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः सदशबंधकं दशमांशसहि
तं दशमांशश्च राज्ञो भवति राज्ञा धर्माधिकारी दाप्यः साधितादृशकं शतमित्युक्तत्वात्
एतच्च षट्चत्वारिंशत्तमेऽहनि प्राप्ते वेदितव्यं तेनोऽर्वाग्वदन्नदाप्यः इदं च व्याध्याद्युपद्र
वरहितस्य यथाह मनुः॥ त्रिपक्षाद ब्रुवन्स्वाक्ष्यमृणादिषु नरोऽगदः तदृणं प्राप्नुयात् सर्वं दश
बंधं सर्वशः इति॥ अगादष्टति राजदैवोपद्रवाविरहोपलक्षणं॥ यस्तु जानन्नपि साक्ष्यमेवं न अं
गीकरोति तं दोषात्मानं प्रत्याह॥ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः स तुल्यः कूटसाक्षिणां पा

यः स तुल्यो दंडेन विवाह्यः यः पुनर्नेराधमो विप्रतिपन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न
ददाति नागरिकरोतिसकूटसाक्षिणां तुल्यः पापैः तुल्यो दंडेन च ॥ कूटसाक्षिणां च दंडं व
क्ष्यति कूटसाक्षिणश्च दंडयित्वा पुनरेवं वारः प्रवर्त्तनीयः कृतेपि कौटसाक्ष्ये विवादो नि
वर्त्तनीयः यथाह मनुः यस्मिन्यस्मिन्विवादे तु कूटसाक्ष्यं कृतं भवेत् । तत्तत्कार्यं निव
र्तेत कृतं चाप्यकृतं भवेदिति ॥ साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह द्वैधे बह
नां वचनं समेषु गुणिनां तथा । गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः । साक्षिणां द्वैधे विप्र
तिपत्तौ बहूनां वचनं ग्राह्यं समेषु समसंख्येषु द्वैधे गुणसंपन्नानां तेषां वचनं ग्राह्यं यत्र
पुनः कतिपये इतरे बहवस्तत्रापि गुणिनामेव वचनं ग्राह्यं उभयानुपपत्तौ साक्षि
भवेदेकोपि धर्मविदिति गुणातिशयस्य मुख्यत्वात् यत्तु मेधातिथिना साक्षिणः इत्युक्तं तत्स
र्वेषां पित्रादिमातृ विशेषविषयं ॥ साक्षिभिश्च कथमुक्ते जयः कथं वा पराजय इत्य
त आह ॥ यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत् । अन्यथावादिनो यस्य ध्रुवस्तस्य

स्यपराजयइत्यवगन्तिसंख्यादिवाविषिष्टं साक्षिणः सत्यां वदंति सत्यमेव जानीमो वयमिति
सजीयी भवेत् । यस्य पुनर्वादिनः प्रतिज्ञामन्यथा वैपरीत्येन मिथ्यीतदितवयस्य वा
दिनप्रतिज्ञांस्य पराजयौ ध्रुवौ निमित्यर्थः । यत्रतु प्रतिज्ञार्थस्य विस्मरणादिभावाभावौ
साक्षिणो न प्रतिपादयंति । तत्र प्रमाणान्तरेण निर्णयः । कार्यो नवराज्ञा साक्षिणः पुनः
पुनः पृष्टव्यस्वभावोक्तमेव वचनं ग्राह्यं । यथाह स्वभावोक्तवचनं स्तेषां ग्राह्यं यद्दोषव
र्जितं । उक्तेऽनुसाक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनरिति । अन्यथा वादिनो यस्य ध्रुवस्त
स्य पराजय इत्यस्यापवादमाह उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः द्विगुणा वान्यथा
ब्रुवः कूटाः स्युः सर्वसाक्षिणः । पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये त्वभिप्राये प्रतिज्ञार्थवैपरि
त्येनाभिहितेयद्यन्ये पूर्वेभ्यो गुणवत्तमा द्विगुणा वान्यथा प्रतिज्ञातार्थानुगुण्येन साक्षि
साक्ष्यं ब्रूयुस्तदा पूर्वे साक्षिणः कूटमिथ्यावादिनो भवेयुः नन्वेतदनुपपन्नं । अर्थिप्रत्य
र्थिसमासमापत्तिभिः परीक्षितः प्रमाणाः भूपैः साक्षिभिः निर्णिदेदत्तेप्रमाणान्तरान्वेष

णेऽनवस्थादोषप्रसंगात्। निर्णीतेऽव्यवहारेऽनुप्रमाणमफलत्वं भवेत्। लिखितं साक्षिणो वापि
पूर्वमावेदितं न चेत्। यथार्थकेषु धान्येषु निष्फलाः प्रावृषो गुणाः। निर्णीतव्यवहारानु
प्रवेशे प्रमाणमफलत्वं तथेति नारदवचनाच्च। उच्यते यदार्थी प्रतिज्ञातार्थस्यान्तरात्मसाक्षिके
पि नानाविप्रलब्धदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेन प्रमाणमन्यमानः साऽ
क्षिष्वपि तेषु संकल्पयति तदाप्रमाण्यान्वेषणे केन वार्यते। उक्तं च। यस्य च करणं दुष्टं यत्र
च मिथ्येति प्रत्ययः स एव समीचीन इति। यथा चक्षुरादिकरणेन ज्ञानस्यान्यथाभासयेऽर्थवि
संवादात् तत्र नितरां तस्य ज्ञानस्याप्रामाण्येन करणदोषकल्पना तस्येदापि साक्षीपरीक्षा
तिरेकेण वाक्यपरीक्षोपदेशात्। साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेत्। कात्याय
नेनाप्युक्तं। यदा शुद्धा क्रिया न्याया तदा तद्वाक्यशोधनं। शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धो
ऽर्थ इति स्थितिरिति। क्रियासाक्षिलक्षणेनार्थसंबंधने नोमारत्ते न्याया यदा शुद्धस्या
दा तद्वाक्यशोधनं। साक्षिवाक्यशोधनं कर्तव्यं वाक्यशुद्धेश्च सत्यार्थत्वं प्रतिपादनेन

सत्येनशुद्धत्तेवाक्यमितिस्मरणात् एवंशुद्धायाःक्रियायाःशुद्धाच्चवाक्याद्यःशुद्धोऽवगतो
ऽर्थःसशुद्धस्तयाभूत् इतिस्थितिरीदृशीमर्यादा न्यायवेदिकारणदोषबाधकप्रत्ययाभा
वेसत्यचेतथएवार्थइत्यर्थः ननुस्वयमर्थिनाप्रमाणीकृता-साक्षिणोतिक्रम्यकथंक्रियां
तरंप्रमाणीक्रियतेनेषदोषः यतःक्रियांबलवतीमुक्तादुर्बलांयोबलंवत्ते सजयेवह्रते
सभ्यैःपुनस्तांनानुयात्क्रियामिति कात्यायनेनजयावधारणोत्तरकालंक्रियांतरपरिग्र
हनिषेधोक्तजयावधारणोक्रियांतरपरिग्रहोदाहृतः नारदेनी
जयावारणोत्तरकालमेवप्रमाणांतरंनिषिद्धंप्रागपितस्माद्युक्ते
पिसाक्षिभिःसक्ष्ये ऽप्रपरितुष्यताक्रियांतरंगीकर्त्तव्यामितिस्थितं एवंस्थितेपद्याभिहित
वचनेभ्यः साक्षिभ्योगुणवत्तमाद्विगुणावापूर्वनिर्दिष्टप्रसन्नाहिताःसाक्षिणःसंति त
दात्तएवप्रमाणीकर्त्तव्यास्वभावेनैवयद्धमुस्तङ्गात्यंव्यवहारीक -मित्यस्य सर्वव्यवहा
रशेषन्यात् निर्णीतेव्यवहारेप्रमाणमफलंभवेत् लिखितंसाक्षिणोवापिपूर्वमावेदि

तेन चेद्दित्तं नानद्दवचनाच्च ॥ पूर्वं निर्दिष्टानामसंभवे त्वनिर्दिष्टा अपि तथाविधाः साक्षि
णः ग्राह्याः ॥ न दातव्यं ॥ संभवे साक्षिणः प्राज्ञो दैविकीं वर्जयेत्क्रियामिति स्मरणात् ॥ एषाम
संभवे दिव्यप्रमाणं कर्तव्यं ॥ अतः परमपरिनिष्पन्नाप्यर्थिनानप्रमाणान्तरमन्वेषणीयमव
चनादिति परिसमाप्य नाम व्यवहारः ॥ यत्र तु प्रत्यर्थिनः स्वप्रत्ययविसंवादित्वेन साक्षि
वचनानस्याप्रामाण्यमन्यमानस्य साक्षिनुद्देषारोपणेनापरितोषः ॥ तत्र प्रत्यर्थिनः क्रियो
पन्यासावसराभावात्सप्ताहाद्वाह्निकदैविकराजिकव्यसनोद्भवेन साक्षिपरीक्षणं कर्त
व्यं ॥ तत्र च दोषावधारणे साक्षिणो वादी स्वदोभूतसर्वं दाप्याः सारानुसारेण दंडनीयाश्च
अथ दोषानवधारणं ॥ तदा प्रत्यर्थिना तावता संतोष्टव्यं ॥ यथाह मनुः ॥ यस्य दृश्येत सप्ता
हान्तु क्तवाक्यस्य साक्षिणः ॥ रोगोऽग्निर्ज्ञातिमरणं दाप्यो दमं च स इति ॥ एतच्च यस्योचुः साक्षिणः स
त्यां प्रतिज्ञां स जयी भवेत् ॥ इत्यस्यापरिनिष्पन्नप्रत्यर्थिविषये अपवादो द्रष्टव्यः ॥ केचित्तु क्ते
ष्वपि साक्षिभिः ॥ साक्ष्यमित्येतद्वचनमर्थिना निर्दिष्टेषु साक्षिष्वर्थ्यनुक्तत्वमभिहितं — सुराद

प्रत्यर्थिगुणवत्तमात्तु द्विगुणा बहवो साक्षिणः पूर्वोक्तविपरीतं वादयन्ति । तदा पूर्ववादिनः
साक्षिणः । वदाम्यस्तिव्याघाते पक्षे तु । तदसत् । प्रत्यर्थिनः क्रियानुपपत्तेः । तथा ह्यर्थी नाम
साध्यस्यार्थस्य निर्देष्टा । तत्र तत्र पक्षे तदभाववादि प्रत्यर्थी तत्राभावस्य भावसिद्धिसापे
क्षसिद्धित्वात् । भावस्य चाभावसिद्धिनिरपेक्षसिद्धित्वात् भावस्यैव साध्यत्वं युक्तं नाभा
वस्य स्वरूपेण साक्ष्यादि प्रमेयत्वाभावात् । अतश्चार्थिन एव क्रियायुक्ता । अपि चोत्तरा
नुसारेण सर्वत्रैव क्रिया निर्णीतास्मरणे । प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियां
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेदिति । न चैकस्मिन् व्यवहारे द्वयोः क्रियानु—
स्मिन्विवादे नुपपत्त्या द्वादिनो द्वयोरिति स्मरणात् । तस्मात् प्रत्यर्थिनः साक्षिणो गुणव
त्तद्विगुणा वन्ध्याया भूयुरित्यनुपपन्नं । अथ मतं यत्र द्वावपि भाव प्रतिज्ञावादिनौ म
दीयमिदं दायादप्राप्तमिति पूर्वापरकालविभागानाकलितमेव वदतस्तत्र द्वयोः सा
क्षिसत्त्वे कस्य साक्षिणो ग्राह्या इत्याकांक्षायां द्वयोर्विवदतोरर्थद्वयोः सत्सु च साक्षि

षुपूर्वपक्षोभवेद्यस्यभवेयुस्तस्यसाक्षिणइतिवाननयः॥ पूर्वंनिवेदयतितस्यसाक्षिणो
ग्राह्याइतिस्थितेः॥ तस्यायमपवादः॥ उक्तेपिसाक्षिभिः॥ साक्ष्यइति॥ अत्रचपूर्वोत्तर
योर्वादिनोःसमसंख्येषुसमगुणेषुसाक्षिषुसत्सुपूर्ववादिनःसाक्षिणःप्रष्टव्याः॥ यदो
त्तरवादिनःसाक्षिणोगुणवत्तमाद्विगुणावातदाप्रतिवादिनसाक्षिणःप्रष्टव्याः
एवंचनाभावस्यसाधत्ताः उभयोरपिभाववादिषुन्याच्चतुर्विधोत्तरविलक्षणान्या
यप्रवृत्तेःउदाहरणेनक्रियाव्यवस्था॥ एकस्मिन्व्यवहारेयथैकस्यार्थिनःक्रियाद्वयं
परमत्ते॥ तत्रवादिप्रतिवादिनोःक्रियाद्वयेऽप्यविरोधइति॥ तदाप्याचार्योनानुमन्य
ते॥ उक्तेपिसाक्षिभिःसाक्ष्यइत्यपिशब्दादर्थात्प्रकरणात्॥ दास्यार्थस्यानवगमादित्यलंप्र
संगेन॥ कूटसाक्षिणोदर्शितास्तेषांदंडमाह॥ पृथक्पृथग्दंडनीयाः॥ कूटकृत्साक्षि
णस्तथा॥ विवादाद्द्विगुणंदंडंविवास्योब्राह्मणःस्मृतः॥ योधनदानादिनाकूटांसा
क्षिणःकरोतिसकूटकृत्साक्षिणश्चयेतथाकूटास्तेविवादात्पराजयेयोदंडस्तत्र

२

६०

तत्रोक्तस्तद्दंडं द्विगुणं पृथक्पृथगेकैकशो दंडनीयाः ॥ ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वा
स्यो न दंड्याः ॥ एतच्च लोभादिकारणविशेषापरिज्ञानेऽभ्यासे च द्रष्टव्यं ॥ तल्लोभा
दिकारणविशेषपरिज्ञानेऽनभ्यासे च मनुनोक्तं ॥ लोभात्सहस्रं दंड्यः स्यान्मोहात्पू
र्वं च साहसं ॥ भयाद्द्वौ मध्यमौ दंडौ मैत्र्यात्पूर्वं चतुर्गुणं ॥ कामाद्दशगुणं पूर्वं क्रोधा
त्तु त्रिगुणं परं ॥ अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव त्विति ॥ तत्र लोभोऽर्थलिप्सा
मोहो विपर्ययज्ञानं ॥ बालिश्यं ज्ञानानुत्पादः सहस्रादिषु तांम्रिकाः पणा गृह्यंते ॥ त
था कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान् धार्मिको नृपः ॥ प्रवासयेद्दंडयि~~त्वा~~
त्वा ब्राह्मणं तु विवासयेदिति ॥ एतच्चाभ्यासविषयं कुर्वाणानिति वर्तमाननिर्देशा
त् ॥ त्रीन्वर्णान् क्षत्रियादीन् पूर्वोक्तं दंडयित्वा प्रवासयेन्मारयेद्वयं शास्त्रे प्रवास
स्य मारणे प्रयोगाद्दस्य वधे शास्त्रे रूपत्वात् ॥ तत्र प्रवासनमोष्ठच्छेदनं जिह्वाछे
दनं धनाद्वियोजनं ॥ कौटसाक्ष्यानुसारेण द्रष्टव्यं ॥ ब्राह्मणं तु दंडयित्वा विवास

येत्स्वराष्ट्रान्निष्कासयेत् । यद्वा - विवासयेद्वा समी - - । विगतो विवासः प्रवासः संकरोती
तिणिचि कृते णाविष्टत्प्रातिपदिकस्येति टिलोपे रूपं । कान्नग्नी कुर्यादित्यर्थः । अ
थवा वसत्यस्मिन्निति वासो गृहं विवासये इयमहं कुर्यादित्यर्थः वासत्ति ब्राह्मणस्या
पि लोभादिकारणविशेषापरिज्ञाने अनभ्यासे च तत्र तत्रोक्तोऽर्थदंड एव । अभ्यासे
त्वर्थदंडो विवासनं चेत् तत्रापि जातिद्रव्यानुबंधाद्यपेक्षया विवासनं नग्नीकरणं ग
र्दभांकनं देशान्निर्वासनं चेति व्यवस्था द्रष्टव्याः । लोभादिकरणविशेषापरिज्ञाने ऽ
नभ्यासे चाल्पविषये तु स्मात्स्वेव ब्राह्मणस्यापि क्षत्रियादिवदर्थदंड एव महाविषये
तु देशान्निर्यासनमेवात्राप्यभ्यासे सर्वेषामेवमनुक्तं द्रष्टव्यं । न च ब्राह्मणस्य दंडो
नास्तीति मंतव्यं । अर्थदंडाभावे शारीरदंडे च निषिद्धे स्वल्पेप्यपराधे नग्नीकरणग
र्दभांकनकरणविप्रदारणदंडाभावे पापोप्रसज्येत् । चतुर्णामपि वर्णानां प्रायश्चि
त्तमकुर्वतां । शारीरं धनसंयुक्तं दंडं धर्म्यं प्रकल्पयेदिति स्मरणात् । तथा सहस्र

ब्राह्मणो दंड्यो गुप्तां विप्रो बलाद्व्रजन्निति स्मरणात् । यत्तु शंखवचनं त्रयाणां वर्णानां
धनापहारवधबंधक्रिया विवासनांककरणं ब्राह्मणस्येति । तत्र धनापहारः सर्वस्वा
पहाराविवक्षितो वधसाहचर्यात् । शारीरस्त्ववरोधादिजीविनांतः प्रकीर्त्तितः काकि
ण्यादिवर्य्यदंडः सर्वस्वांतस्तथैव चेति वसर्वस्वहरणायाः सहपाठात् । यदप्युक्तं राज्ञा
देनं बहिः कुर्यात्समग्रधानमक्षतमिति तत्राकृतमाहसाविषयं शारीरस्तु ब्राह्मणस्य न
कदाचिद्भवति । न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि व्यवस्थितमिति समान्येनमनुस्मरण
त् । तथा ब्राह्मणवधाद्भूयान्नाधर्मो विद्यते भुवि तस्मादस्य वधं राजा मनसापि न चिंत
येदिति ॥ ७ ॥ अपि च यः साक्ष्यं श्रावितोन्येभ्यो निह्नुते तं तमो वृत्तः सदाप्याष्टगुणं दंडं ब्रा
ह्मणं तु विवासयेत् । यत्तु साक्षित्वमंगीकृत्यान्यैः साक्षिभिः सह साक्ष्यं श्रावितः सन्निगदका
लेत्तमौ वरणाद्राक्रौंतावत्तस्तं साक्ष्यमन्येभ्यः साक्षिभ्यो निह्नुते नाहमत्र साक्षि भवामी
ति सचिवापराजयेयो दंडस्तमष्टगुणं दाप्यः । ब्राह्मणं पुनरष्टगुणाद्व्ययं दंडदानासाम

र्थं विवासयेत्। विवासनं च नग्नीकरणगर्हणगदेशान्निर्वासनलक्षणं विषयानुसारेण द्रष्टव्यं। इ
तरेषां त्वष्टगुणो दंडो दंडासंभावस्य जात्युचितकर्मणा निगडबंधरे कारागृहप्रवेशादि द्रष्टव्यं।
एतच्च पूर्वश्लोकेप्यनुसर्त्तव्यं। यदा सर्वे साक्ष्यं निह्नुवते तदा सर्वे समानदोषाः। यदा तु साक्ष्यमुक्त्वा
पुनरन्यथा वदंति तदानुबंधाद्यपेक्षया दंड्याः। यथाह कात्यायनः। उक्त्वान्यथा ब्रुवा
णाश्च दंड्याः स्युः पूर्वोक्तान्नियता इति। न चान्येनोक्ताः साक्षिणोपि नरहस्यानुसर्त्तव्याः।
यथाह नारदः। न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः। भेदयेन्नैव चान्येन हीयेतैवं समाच
रन्निति। साक्षिणामवचनमसत्यवचनं च सर्वत्र प्रतिषिद्धं तदपवादार्थमाह। वर्णिनां हि
वधो यत्र तत्र साक्ष्यनृतं वदेत्। यत्र वर्णिनां शूद्रविट्क्षत्रियविप्राणां सत्यवचने वधः संभा
व्यते तत्र साक्ष्यनृतं वदेत्। अनेन च सत्यवचनप्रतिषेधेन साक्षिणः पूर्वप्रतिषिद्धम
सत्यवचनमवचनं चाभ्यनुज्ञायते। यत्र शंकाभियोगादोषसत्यवचने चान्यतरस्य
वधस्तत्र नृशंसीभावाभ्यनुसाराजा यद्यनुमन्यते। अस्पराजाक्षमथ्याकथन। न मुंच

त्तितद्दोमेद्दादसास्त्रैन्चंकर्त्तव्यं॥ तस्याप्युक्तंभवेसत्यमेववदितव्यमनृतवचनेवर्णिविधत्तो
षोः॥ सत्यवनदोषसत्यवचनेनुवर्णिविधदोषएव॥ तत्रचयथाशास्त्रप्रायश्चित्तंप्रकर्त्तव्यं
व्यं॥ तर्ह्यसत्यवचनन्हमीभावेचशास्त्राभ्यनुज्ञात्मान्ययायाभावइत्यत्तआह॥ तत्या
नायानिर्वाप्यश्चरुः॥ सारस्वत्तोद्विजैःतत्पावनायान्चनृतवचनावचननिमित्तप्रत्यवायपरिहा
रायसारस्वतश्चरुर्द्विजैरेकैकशोनिर्वाप्यःप्रकर्त्तव्यः॥ सरस्वतीदेवतास्येतिसारस्वतः॥ अ
नवस्थावितांतरूपपक्षनुदनेचसशास्त्रप्रसिद्धइहायमाभिसंधिः॥ साक्षिणामनृतवचन
मवचनंचप्रतिषिद्धं॥ तदतिक्रमनिमित्तमिदंप्रायश्चित्तं॥ नचमंतव्यंसाक्षिणामनृतवचनाव
चनाभ्यनुज्ञानेपिसाधारणानृतवचनावचनप्रतिषेधा॥ तिक्रमनिमित्तप्रत्यवायस्य
तादवस्थ्यादभ्यनुज्ञावचनमनर्थकमितियतः साक्ष्यनृतवचनावचन॥ योर्भयत्रप्रत्य
वयोसाधारणानृतवचनावचनयोरन्यतीयामित्यर्थेवदभ्यनुज्ञावचनं॥ यद्यपिभूय
सोनिवृत्त्यान्यतीयानुप्यानुषंगिकोऽपिप्रत्य॥ वायोननिवर्त्तयैतइतिगम्यते॥ एतदे

वान्यत्रप्राश्नेषुवर्णिविधाशेकार्यापाथ्याद्दीवामनन्तवचनावचनाभ्यनुज्ञानंवेदितव्यंन
वतत्रप्रायश्चित्तमस्ति । प्रतिषेधांतराभावात् । निमित्तांतरेण कालांतरे ऽर्थितन्यावग
मेपिसाक्षिणमन्येषां चदंडाभावोस्मोद्देववचनादवगम्यतइति इसाक्षिप्रकरणं ॥ भुक्ति
साक्षिणौ निरूपितौ सांप्रतं लेख्यं निरूप्यते तत्र लेख्यं द्विविधा भवनज्ञानपदं चेति शासनं
निरूपितं ज्ञानपदमयेधायते तच्च द्विविधं स्वहस्तकृतं चेति तत्र स्वहस्तकृतमसाक्षिमत्सा
क्षिकमनयोश्चदेशाचारानुसारेण ——पं यथाह नारदः लेख्यं तु द्विविधं ज्ञेयं स्वहस्त
तान्यकृतं तथा । असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोरिति तत्रान्यकृतमाह यः कश्चिदर्थो
निष्णातः स्वरुच्या तु परस्परं लेख्यं तु साक्षिमत्कार्यं तस्मिन् धनिकपूर्वकं धनिकाध
मर्णयोर्योर्थो विपादिः परस्परं स्वरुच्या इयता कालेनैव स्वेमूलं तु साक्षिमत्कार्यं तत्र नितावद्दे
वयमितीयवक्तौ प्रतिमासं वृद्धिरित्येवं व्यवस्थितः तस्मिन्नर्थे कालांतरे विप्रतिपत्तौ व
स्तुतत्त्वनिर्णयार्थं लेख्यं साक्षिमदुक्तलक्षणसाक्षिभिर्युक्तं धनिकपूर्वकं धनिकप्

र्वकास्मिंस्तद्धनिकपूर्वकं । धनिकनामकलेखनपूर्वमितियावत् । कार्यकान्तव्यमुक्ता
लक्षणाः साक्षिणो कर्त्तव्याः । कञ्चेनुकम्मामलेखनपूर्वयकान्तं कार्यसिध्यर्थं तस्यसाक्षि
णः प्रवर्त्तेत्तेविवादेषुस्वकर्तृत्वंबाधलेख्यकमितिस्मरणात् ॥ अपिवसमासामतदार्थि
हर्नामजातिस्वगोत्रकैः । सब्रह्मचारिकात्मीयपितृनामादिचिह्नितं । सम्यसंवत्सरःमा
माश्चैत्रादि स्वगोत्रं वासिष्ठादिगोत्रमेतैःसमादिभिश्चिह्नं तं तथासब्रह्मचारिकं,
बह्वृचादिशाखाप्रयुक्तं गुणनामबह्वृचः कठइति आत्मीयपितृनामधनिकर्णि
कपितृणांनामा आदिग्रहणाद्व्यजातेत्तिसंख्यानारादेग्रहणं एतैश्चचिह्नितं लिखेत्कार्यं
मितिगतेसंबंध ॥ किंच समासोऽर्थिस्वहस्तेननिवेशयेत् मतंमेऽमुकपुत्रस्ययदत्रो
परिलिखितं धनिकाधमर्णयोर्योऽर्थः ॥ स्वहस्ताव्यवस्थितत्तस्मिन्नर्थेसमाप्तेलि
खितेऽदृणी अधमर्णोनामात्मीयंस्वहस्तेनास्मिन्लेख्ययदुपरिलिखितंतन्ममामुक
--वस्यमतमभिप्रेतमितिनिवेशयेत्पत्रेलिखेत् ॥ तथासाक्षिणश्चस्वहस्तेनपितृना

मकपूर्वकं ॥ अत्राहममुकसाक्ष्या लिखेयुरिति ते समाः ॥ अस्मिन्नवेत्थ्येयसाक्षिणो लिखि
तात्तेष्यात्मीयपित्रतामलेख्यनपूर्वकमस्मिन्नर्थेऽहममुको देवदत्तः साक्षी लिखहस्ते
निकेको शालिखेमुक्तेव समाः ॥ संख्यातोगुणेन कर्तव्याः यद्यधर्मेणः साक्षी वालि
पिज्ञोन भवतीसद्धर्मज्ञेन्येन साक्षीवसाक्ष्यं तारणसर्वेसाक्षिसंज्ञी ॥ धोत्वमत्तं लेखये
त् ॥ यथाहनारदः ॥ अलिपिसङ्गणीयः स्यात्स्वमतंतुमलेखयेत् ॥ साक्षी वा साक्षिणोन्ये
न सर्वसाक्षिसमीपत इति ॥ ७ ॥ अपि च उभयाभ्यार्थितेनैतन्मया ह्यमुकस्सुना लिखितं
ह्यमुकेनेति लेखकोन्नेततो लिखेत् ॥ ततो लेखको धानिकर्णिकाभ्यां प्रार्थितो नमया
मुकेन देवदत्तेन विष्णुमित्रसूनुनैतद्धन्नेख्यं लिखितमित्येतो लिखेत् ॥ सोप्रतं स्वकृतं ले
क्षमाह ॥ विनामिसाक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ॥ तत्प्रमाणं स्मृतं लेख्यं बलोपाधि
कृतादृते ॥ बलेन बलात्कारेण उपाधिना लोभक्रोधभयमदादिभक्षणेन यत्कृतं मन्त्रा
क्षिभिर्बलोपधीकृता तस्माद्विना नारदोप्याह ॥ मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च

६४

(126)

पत्र ॥ तदप्रमाणं लिखितं भयोपधिकृतं तथेति लिहितेन स्वहस्तेन तत्परकृतं वलेख्यं देस्याचारा
नुसारेणं संबंधकव्यवहारे बंधकवद्व्यवहारेयुक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपे
न च लेख्यमित्ते तावन्नपुना ॥ साधुशब्दैरव्यवस्तिस्वकादेशभाषया पलेखनीयं यथाह नारदः ॥ दे
शाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणं गोप्याधिभोग्याधिकालकृतमित्यादि तद्व्यक्तं विस्प
ष्टं यस्मिन्स्तद्व्यक्ताधिविधिलक्षणं ग्रथीनां क्रमः क्रमस्थाक्षराणि अविलुप्तानि क्रमाक्षरा
णि यस्मिंस्तदविलुप्तक्रमाक्षरं तादृशं यत्लेख्यं प्रमाणं राजशासनवन्न साधुशब्दनियमोत्र
त्याभिप्रायः ॥ लेख्यप्रसंगेन लेख्यारूढमृणं त्रिभिरेव देयमित्याह ॥ ऋणं लेख्यकृतं देयं पुरु
षैस्त्रिभिरेव तु ॥ यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं तथा लेख्यकृतं तथादर्नं तत्सुत्रतत्सुतै
स्त्रिभिरेव देयं न चतुर्थ्यादिभिरिति यस्य त्तेः ननु पुत्रपौत्रैर्ऋणं देयमित्यविशेषेण मात्रं त्रिभि
देयमिति नियतमेव बाढं न स्येवो सर्गस्य पत्रारूढं स्ली विषयेस्म त्यं तर प्रभवामपवादाशंका
पन्नाननुमिदं वचनमारब्धं ॥ तथा हि पत्रलक्षणमभिधाय कात्यायनेनाभिहितं एवं कालम

तिक्रांतं पित्रणे दाप्यते क्षणमित्यत्रोच्चं पत्रात्सूद्भरणप्रक्रांतकालमपि पित्रणसंबंधे दाप्यते ।
अत्रापि ऋणमिति बहुवचनानिर्देशात् कालमभिक्रांतमिति वचनाच्चतुर्थ्यादिर्वाप्यत इति
प्रतीयते । तथा रिक्तेनापि लेख्यं पत्र्यमर्द्धस्मत्स्वलेनाभंतस्याविनिर्दिष्टोदिति । अत्रापि यस्य
हस्ते पत्रमस्ति तस्य ऋणलाभ इति सामान्येन चतुर्थ्यादिभ्योपि एणलाभोस्तीति प्रतीयते । अतश्चैतद्दा
शं कानि वृत्त्यर्थमेतद्वचनामिति युक्तं वचनद्वयं च योगीश्वरवचनानुसारेण योजनीयं यस्मा
पवादमाह । आधिमुच्यते तावद्यावन्न प्रदीयते संबंधकेपि पात्रारूढक्षणे त्रिभिदेयमि
त्यतिपाहरणायाकरणानिधिका[illegible]ऋणाख्या हरेणाप्यनिधिकारप्राप्तानिवृत्तं मुच्यते या
वचवर्षेन पंचमेन चारूढं नादीयते तावदेव धिमुच्यते इति वदता संबंधकरूपणायाकरणे
चतुर्थ्यादेरप्यधिकारादर्शितः । नचैतदष्टकत्वामतेकलभ्यो अन्यो न नश्यतीति सत्येतदाप्यर
स्मिन्न सत्यपवादावचने पुरुषत्रयाविषयमेकष्यादिति सर्वमनवद्यं ॥ ६ ॥ प्रासंगिकं परिसमाप्य
प्रकृतमेवानुसरति देशांतरस्थे दुर्लेख्ये नष्टेन्मष्टे हृते तथा । भिन्ने दग्धेथवा छिन्ने लेख्यमन्य

न्त

तु कारयेत् । व्यवहाराक्षमे पत्रे पत्रांतरं कुर्यादिति विधीयते । व्यवहाराक्षमं चैतत्पत्रं वादि
तद्देशांतरस्थे पत्रे दुर्लेख्ये दुष्टानि संदिग्धलेख्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि
पदानि वा यस्मिंस्तत् दुर्लेख्यं तस्मिन् दुर्लेख्ये व्यनष्टकालवशेन जन्मष्टमांघिदौर्बल्यादिना
मर्दिते लिप्यक्षाराद्दते तस्करादिना भिन्ने विदलिते दग्धे प्रज्वालिते छिन्ने द्विकृते सति भ
वति । एतच्चार्थिप्रत्यर्थिनोः परस्परानुमत्यां विमत्या तु व्यवहारप्राप्तौ देशांतरस्थपत्रान
यनाद्यपेक्षया कालो दातव्यः । दुर्लेख्ये वा विद्यमाने वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः का न
र्यः । यथाह नारदः । लेख्ये देशांतरन्यस्ते शीर्णे दुर्लेख्ये हृते सतस्तत्कालकरणमसतो दृष्टद
र्शनमिति । सतो विद्यमानस्य पत्रस्य देशांतरस्थस्यानयनाय कालकरणं कालावधिर्दात
व्यः । असतः पुनर्विद्यमानस्य पूर्वे परस्परसाक्षिणो दृष्टदर्शनं व्यवहारपरिसमाप्ते कार्यः ।
यदा तु साक्षिणो न भवंति तदा दिव्येन विनिर्णयः कार्यः । अलेख्यसाक्षिके दैवी व्यवहारे वि
निर्दिशेदिति स्मरणात् । एतच्च जानपदं व्यवस्थापत्रं । राजकीयमपि व्यवस्थापत्रमीदृश

मेवभवति ॥ इत्याद्युक्तिरोषः राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा ॥ राजकीयस्य तं तेन्व्यंस
र्वेस्वार्थमस्मा ॥ त्सिद्धिरिति मितथाम्यं द्वपि राजकीयं जयपत्रकं रद्दवाशिष्टेनोक्तोयतोपन्यस्तसाध्यार्थ
संयुक्तं सोत्तरक्रियं ॥ ---सावधारणकं चैव जयपत्रकमिष्यते ॥ प्राड्विकादिहस्तांकमुद्रितं रा
जमुद्रयासिद्धर्थे ------वादिनेदद्याज्जयिने जयिपत्रकमिति ॥ तथा सभासदोपि मतं मे ॥ अमु
कपुत्रस्येति स्वहस्तं दद्युः सभासदश्चाये तत्रस्मा इति शास्त्रविदः स्मृती ॥ यथा लेख्यविधौ तद्दत्त्व
हस्तं दद्युरेव तदाविभिमनुस्मरणात् ॥ सभासदां च परस्परानुमतिव्यतिरेकेण व्यवहारो निःश
ल्यो भवति ॥ यथाह नारदः ॥ यत्र सभ्यो जनः सर्वः सर्वं साध्वेतदिति मन्यते ॥ स निःशल्यो विवदः
स्यात्सशल्यस्त्वन्यथा भवेदिति ॥ एतच्च चतुष्पाद्व्यवहार एव च ॥ साध्यये साध्यमर्थं यच्चतुष्पादा
न्वितं च यत् ॥ राजमुद्रांकितं चैव जयपत्रकमेष्यत इति स्मरणात् ॥ यत्र तु हीनता यथा ॥ अन्य
वादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ॥ आहूतप्रपलायी च हीनः पंचविधः स्मृत इति ॥ तत्र च
न जयपत्रकमस्ति अपि तु हीनपत्रमेव तत्र कालांतरे दंडप्राप्त्यर्थं जयपत्रे सुप्राड्याय विधिसि

द्वार्थमिति विशेषः ॥ लेख्यसंदेहे निर्णयनिमित्तान्याह । संदिग्धे लेख्यशुद्धिः स्यात्

स्वहस्तलिखितादिभिः । युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतु

भिः ॥ शुद्धमशुद्धं चेति संदिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेनालिखितं

यदन्येल्येन्तरं तेन शुद्धिर्यदि दृश्यान्यक्षराणि भवंति तदा शुद्धिः स्यादित्यर्थः । आदिशब्दात् साक्षि

लेखकस्वहस्तलिखितानां संवादाच्छुद्धिरिति । युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देशकालपुरुषाणां

द्रव्येण सह संबंधप्राप्तिः । अस्मिन्देशेऽस्मिन्कालेऽस्मिन्पुरुषस्येदं घटत इति युक्तिप्राप्तिः । क्रि

यात साक्ष्युपन्यासः । चिह्नमसाधारणं श्रीकारादिसंबंधः । अर्थिप्रार्थिनोः पूर्वमपि परस्प

र विश्वासेन दानग्रहणादिसंबंधः । आगमो स्य तावतोऽर्थस्य संभावितः प्राप्त्युपाय एत

एव हेतवः एभिर्हेतुभिः संदिग्धलेख्यशुद्धिः स्यादित्यन्वयः । यदा तु लेख्यसंदेहे निर्णयो न जाय

ते तदा साक्षिभिर्निर्णयः कार्यः । यथाह कात्यायनः । दूषिते पत्रके वादी तदारूढां दर्शयेदिति

साक्षिसंभवविषयमिदं हारीतवचनं । न मयेतत्कृतं पत्रं कूटमेतेन कारितं । अधारितन्यतत्पत्र

13

मर्थं दिव्येतनीस्पदिति ॥ एवं ऋणाधिते पत्रे ऋणेच दातव्ये प्राप्ते यदा तस्मिमेकस्य ऋणोदातुमसामर्थ्य
स्तदा किं कर्त्तव्य ॥ मित्यत आह ॥ लेख्यस्य पृष्ठे ॥ भित्तेवेत्त दत्वा दत्वर्णिको धनं ॥ धनेचोप
गतं दद्यात्स्वहस्तपरिचिह्नितं यदाधमर्णिकः ॥ लेख्यसकलमृणं दातुमसमर्थस्तदा शक्त्यनुसा
रेण दत्वा पूर्वकृतस्य लेख्यस्य पृष्ठे दद्यात् ॥ अभिलिखेत् ॥ एतावन्मया दत्तमिति ॥ उत्तमर्णो वा उ
पगतं प्रतं ध[illegible]लेख्यमिति ॥ कथं स्वहस्तपरिचिह्नितं स्वहस्तलिखिताक्षरचिह्नितं यथो
पगतं प्रवेशपत्रे स्वहस्तलिखितचिह्नितं अधमर्णायोत्तमर्णो दद्यात् ॥ ऋणानुकृतस्य हते ले
ख्ये किं कर्त्तव्यमित्यत आह दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् ॥ क्रमेणास्य कृते देवा
चाक्षे ॥ क्रमेण दत्वा स[illegible]वे कृतं लेख्यं पाटयेत् ॥ यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तच्छु
द्ध्यै ॥ अधमर्णेनान्या विशुद्ध्यर्थमन्यल्लेख्यं कारयेत् उत्तमर्णमधमर्णः पूर्वोक्तक्रमेणोत्तमर्णो
विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः ॥ ससाक्षि[illegible]के ऋणोक्षरं ते दातव्ये किं कर्त्तव्यमित्यत
आह ॥ साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकं यत्तु ॥ ससाक्षिकमृणं तत्पूर्वसाक्षिसमक्ष

दे

त्रि

मेवदद्यात् इतिलेख्यप्रकरणं ॥ त्रिविधंसाक्षिभुक्तिलक्षणंविधं मानुषंप्रमाणमुक्तंयथा
वसरप्राप्तंदिव्यंप्रमाणमभिधास्यन्तुलाग्न्यापइत्यादिभिराद्यैः पंचभिःश्लोकैर्दिव्यमान
कंकथयतितत्रतावद्दिव्यान्याहदेशाति तुलाग्न्यापोविषंकोशो दिव्यानीहविशुद्धतुला
दिनिकोशांतानिपंचादिव्यानिहधर्मशास्त्रेविशुद्धयेसंदिग्धस्यार्थस्यसंदेहनिवृत्तयेदात
व्यानीति नन्वन्यान्यपितंदुलादीनिदिव्यानिसंति धाटोऽग्निसदृकंचैवविषंकोशस्तथै
व तंदुलाश्चैवदिव्यानिसप्तमस्तप्तमाषकइतिपितामहस्मरणादतः कथमेतावंत्ये
वेत्यतआह महाभियोगेष्वेतानिएतानिमहाभियोगेष्वेवनान्यत्रेतिनियम्यते नपुन
रिमान्येवदिव्यानीतिमहत्त्वावधिंवक्ष्यति नन्वल्पाभियोगेऽपिकोशोऽस्त्येव कोश
मल्पेऽपिदापयेदितिस्मरणात् सत्यं कोशमत्तुलादिषुपाठेनमहाभियोगेष्वेवेतिनिय
मार्थः किंतुलाचवंमाभियोगेपिप्राप्त्यर्थः अन्यथाशंकाभियोगएवस्यात् अवष्टंभा
भियुक्तोनोघटादीनिविनिर्दिशेत् तंदुलाश्चैवकोशश्चशंकास्वेवनसंशयइतिस्मर

णात्॥ महाभियोगेषु शंकितेषु सावष्टंभेषु वा विशेषवणे प्राप्तापवादमाह ॥ शीर्षकस्थेभियो
क्तेति एतानि तुलादीत्यभियोगक्तारिशीर्षकास्थोभियुक्तस्य भवन्ति शीर्षकः शिरो व्यवहार
स्य चतुर्थः ॥ पादो पराजयलक्षणस्तेन च दंडो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थस्तत्रयु
क्ते दंडभागस्त्वर्थः ततोर्थी लेखयोस्सद्यप्रतिज्ञानार्थसाधनं इति राज्ञा भावप्रतिज्ञावादि
नः ॥ ९९ ॥ एवं क्रियेति व्यवस्थादर्शितातदपवादमाह ॥ रुच्याभियोक्ताभियुक्तयोः ॥ पर
स्परसंप्रतिपत्त्यान्यतरो अभियोक्ता वा दिव्यं कुर्यादितरो अभियुक्तः ॥ शिरः शारीरमर्थदं
डं वा वर्तयेद्दंगी कुर्यात् ॥ अस्य मानित्संधिः ॥ नमानुषे प्रमाणे वा दिव्यं प्रमाणमावैकगोच
रं अप्रतुष्ट भावाविशिष्टेणगोचरेयत्ति ॥ अतश्च मिथ्योत्तरे प्रत्यवस्कंधे चात्यधर्थि प्र
त्यर्थिनोरन्यतरस्य ध्यायादिव्यं भवतीति ॥ अस्माभियोगे महाद्यपयोगे संकाशावष्टंभयो
रप्यविशेषणको शोभवतीति ॥ अल्पाभियोगे महाभियोगे संकाशावष्टंभयोरप्यविशेष
णकोशो भवतीत्युक्तं तुलादीनि विशेषांतानि तु महाभियोगेष्वेव साचष्टं भवेतीति नियं

च

मोदर्शितः । स्तत्रावष्टंभाभियोगे स्वैवाचारपापवादमाह । राजद्रोहाभिशंकायां ब्रह्महत्यादिपाका
भिशंकायां चाशिरस्यापि नाविनापङ्क्लादीनि कुर्यान महाभियोगे महाचर्यशंकायां चयथा
हन्नास्त्राजाभि । शाकिताना चनिर्दिष्टानां चदस्युभिः । आत्मापशुद्धिपराणं चादिव्यदेयं प्रो
विते । ति तदुक्तापुनरेऽन्यचौर्यशंकायामेव । चौर्यं तु तंदुलादेयात्तान्यवेति निश्चयइतिपिता
महवचनान् । सप्तमाषस्तु कृतानि च । स्पर्शोऽभिसं महाचौर्यविषयासत्यवाहनशास्त्राणिगो
वानुकनकानिवा । देवतापितृपादस्पर्शदत्तानिसुकृतानि च । स्पर्शोऽभिशंशेशिपुत्राणांदा
रणं स्वहृदो नश्वा । आभियोगेषु मेघेषु कोशपानमथापि वा इत्यत्तेसपथ्यो शोक्य मनुनाश्वल्प
कारिणा इति नारदादिस्मरणात् । यद्यपि मानुषप्रमाणा निर्णिमस्यानिर्णीयकयत्तदि
व्यामित्ति लोकप्रसिध्या शपथानामपि कालांतरनिर्णयनिमित्तेभ्यो घटादिभ्यो भेदेनव्य
पदेशो ब्राह्मणपरिव्राजकवशाकोशस्यकरावपत्त्वेपि घटादिषु पाठो महाभियोगाविषय
त्वेनापि ष्टंभाभियोगाविषयत्वेन च घटादिसमान्नतुल्समेतन्तरं निर्णयनिमित्तेन तंदुलानां

नत्तमावस्यवसमनंतरे निर्णयनिमित्तत्वेप्यल्पविषयत्वेनशंकाविषयत्वेनचद्घटादिवैल
क्ष्यण्यान्मेष्वपावद्इतिसंतोषव्यंदता निवदिव्यानिपरवर्जयेन्नितदपिलिखितसामंतादिसद्भा
वेदिव्यानिपरिवर्जयेदितिव्याख्येयंननु विवादांतरे व्यपमाणेतरसद्भावेदिव्यानामनवका
शएवसत्यमरणादिषुकृत्नक्षणसाध्यपन्यासेर्थिनाकृतोपिप्रत्यर्थिपादिंदंडाव्ययगमाव
ष्टंभेनदिव्यवैमवलेवततदादिव्यमपिमवतिसा क्षिणमासपदोषसमेवा दिव्यस्यचानिर्दोष
त्वेनवस्तुतत्त्वमिषयत्वात्नतृणन्यायाद्यधर्मत्स्य यथाहनारदः तत्रसत्योस्थितोधर्मोव्यवहा
रस्तु तत्त्वार्थ त्रित्वविषयत्वा रस्तुसाक्षिणीदैवसाध्येपोहृषेषीनत्नेरव्यं वाप्रयोजयेदितिरथा
वरेषुविवादेषुप्रार्थिनादंडावष्टंभेनदिव्या वत्नेवलेकृतेपिसाक्ष्यादिदृष्टप्रमाणसद्भावेनदिव्यं
ग्राह्यमितिविकल्पनिराकरणार्थस्थावरेषुविवादेषुइत्यादिपिभामरवचनेनात्यंतिकादि
व्यानिराकरणार्थोलिखितमात्स्थावरमावेस्थावरविवादेषुनिर्णयप्रसंगात्तु ६६ किंच
पूर्वोद्धरूपोचितसुदितेन्स्तु० वैसवैलक्षण्यानदिव्यग्राह्यहिणमा द्रुपत्स्यपस्यसत्यानांचब्राह्म

णां सन्निधौ सर्वाणि दिव्यानि कारयेत्परिवाक त्रिरात्रोषितायवा नित्यं दिव्यानि देयानि
शुचये वा इसस्येइत्युपवासं विकल्पयितमहेतोक्तः यत्नवदत्नुवन्महाकार्यो रोगमद्दिवाकः
समाचरेत् अध्वरषु यथोर्वषः सोपवासोन्यायाज्ञाघेतिपितामहवचनात् अत्रयपथापि
पूर्वोदयरत्यविशेषणोक्तं तथापि शिष्टसमाचारमानुचारे दिव्यानि देयानि तत्रापि पूर्वाह्ने वघ
टो भवेत् मध्याह्ने तजलं देयं घर्मतत्त्वमभीप्सता दिव्यमस्यनु पूर्वाह्ने कोसत्सु हि विधीयते रा
वि त्रौ नुपविशि मेषं दयनषाल्न इति पितामहो विशेषो द्रव्यः अनुक्तवेला विशेषाणां तु लतत्त ते
माषप्रभृतीनां पूर्वाह्ने एव प्रदानं पूर्वाह्ने सर्वदिव्यानां प्रदानं परिकीर्तितं इति सामान्येन
नारदे स्मरणात् अहनि त्रिधा विभक्ते प्रथमो भागः पूर्वाह्णो मध्याह्नस्तृत्तरमो परान्हः तथा
पचोयिकालविशेषो विप्रतिषेधमुखेन दर्शितः विधिमुखेन तत्र अत्रः शिशिरहेम
न्तो वर्षाश्चैव प्रकीर्तिताः इति शरद्ग्रीष्मेनु तत्र हेमन्ते शिशिरे विषं चैत्रो मार्गशिरश्चैव वैशाखश्च
श्वत्थैव च एते साधारणमासा दिव्यानाम विरोधेनः कोशस्तु सर्वदा देय तुलायास्सर्वा

कालिकातिकोशास्त्रहरणम्मूर्यस्यपथ्यानामुपलक्षणंनेदुत्तानांयनविशेषानभिधाना
त्सार्वकालिकेचप्रतिसेवसुखेपिनशीतेशोयन्सुहि: ॥ त्याज्यकाले-ग्निशोधनंनप्रावृषि
विषंदद्यान्माविन्नेननत्लोनद्यानवराह्नेनसंध्यायांनमध्याह्नकद्दावनेतिनाशितेतोयशुद्धी
स्यादितपत्रशातशस्त्रोनहेमन्तशिशिरत्ववर्षासुणस्त्रहरणंनोष्मनोष्मकालेग्निशोधनमित्यत्रो
ष्मकालनशरदेनचग्रीष्मशरद्दोविधान ॥ नयेस्यापिपुनर्निषेधव्यावरार्थमयोजनंतवक्ष्यते ॥
९७ ॥ अधिकारव्यवस्थमाह ॥ स्त्रीबालमात्रनाजीवर्धोवस्थाविशेषानादरणावत्ता ॥ प्राबोडु
शाद्भूषात्संज्ञविशेषानादरेणवर्द्धाशीतकावर ॥ अंधोनेत्रविकलः ॥ पंगुपादविक
लोवधारणोविषस्यायवावक्रपरिमाणः ॥ सप्तैवपश्शूद्रस्यशोधनार्थमवंतिब्राह्मणस्य
हत्वाविधानाच्छूद्रस्ययवासप्तविषयस्येतिविषधानाद्ग्निजेच्छ्वंवेतिक्षात्रियवैश्यविष
येयुक्तयस्तदेवस्पष्टीकृतापितामहेनब्राह्मणस्यघटोदेये ॥ क्षात्रियस्यहुताशनः ॥ वैश्यस्य
सलिलंप्रोक्तंविषं ॥ शूद्रस्यदापयेदितियनस्मादिनोदिव्यानीवस्मरणंसहत्तानामरशा ॥

तीनां व्याधितानां तपस्विनां स्त्रीणां च न सर्वं दिव्यं यदि धर्ममपेक्षन्ते इति दुर्व्याख्यानन्तर
कुर्यादिति किं कल्प्यमित्यपेक्षायां एतदुक्तं भवति । अवष्टंभाविधियोगे वृद्धादीनां मामियोक्त
त्वाभियोज्यत्वाम्भवे दिव्यानि तेषामभियोज्यत्वेप्यभियोक्तृत्वे एव दिव्यं परस्पराभियोगे
त्वविकल्प । एवं तप्राप्तिं तुलैवेत्यनेन नियम्यन्ते तथा महापातकादिशंकाभियोगे वृद्धा
दीनां तुलैवेति । एतच्च वचनं सर्वदिव्यसाधारणेषु मार्गशीर्षचैत्रवैशाखेषु वृद्धादीनां
सर्वदिव्यसंभवधानेनियामकं तथा पार्थिवनवसर्वकालं स्त्रीणां तुलैवेति स्त्रीणां तु न विषं
प्रोक्तं न चापि सलिलं स्मृतं घटकोशादिभिस्तासां तत्त्वं विवरयेद्विदिति विषसलिलव्यतिरि
क्त घटकोशात्व्यादिभिः शुद्धिविधानात् । एवं बालादिष्वपि योजनीयं तथा ब्राह्मणानां
मपि तसाकालिक स्तुलादि नियमः सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते सर्वाण्येता
नि सर्वेषां ब्राह्मणस्य विषं विनेति पितामहस्मरणात् तस्मात्साधारणे काले वृद्धादि
वसमग्नि विषयो विकल्पः ब्राह्मणत्वाग्निरेव न कदाचिद्विषं । ब्राह्मणस्य विषं विनेति

प्रतिषेधात्‌ग्रीष्मशरदोस्तु सलिलमेवयेषां तु व्याधिविशेषणाग्न्यादिनिषेधः कष्टी नां व
र्जयेदग्निं सलिलं (त्वा)सकाशिनां पित्तश्लेष्मचतानित्यं विषतत्परिवर्जयेदिति तेषां अग्न्या
दिकं नेपि साधारणं तुलाद्येवादिघ्यमवर्जितथा तोयमग्नं विषचैव ... त्यथ्यं वालेनात
ष्णीमिति वचनादुर्वीनामपि सर्वेप्यापि विप्रतिषेधादुक्तकालानतिक्रमेणनीती वयो
वस्थाविता निर्दिष्टानि दिव्यानि महाभियोगे षेर्वतानीत्युक्तं २८ तत्राभियोगस्यपद
पेक्षं महत्वेत्वदिदानीमाह पणस्य सहस्रादर्वाक्फलं विषं तु ... नननकारयेतन्न
मध्यवर्तिजलमपियथोक्तं तुलादीनि विधाता — कष्टेषु दापयेदिति अत्र कोश
स्याग्रहणं कोशमन्येपि दापयेदित्यल्पाभियोगेपि तस्यस्मरणात्‌ एतानि चात्वारिदिषाप
णसहस्रात् — वमवर्तिनात्पर्थः नवन्चर्वागप्यग्न्यादीनि पीतामहेन दर्शितासहस्रेतु
घटं दद्यात्सहस्राईनयायसं अर्द्धस्याअर्द्धे तु सलिलं तस्याईंतु विषदू मंतामिति सत्यं तत्रैहव्य
वस्थापतद्र्व्यापहारे पातित्यं भवाति तद्विषयं वितासहवचनं मित्तरद्र्व्यविषयं योगस्थरव

चनेमन्येतवच्चनद्दयं स्तेयसाहसविषयं आयद्रव्येन विशेषोदर्शितः कात्यायनेनादत्तस्यापह
बोऽत्रप्रमाणं माषांस्तुपञ्चादिव्यं तत्रकल्पयेत् स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् सर्वद्रव्य स
प्रमाणं तु ज्ञात्वा हेमकल्पयेत् हेमप्रमाणयुक्तं तु यदा दिव्यं प्रयोजयेत् ज्ञात्वा संख्यां सुव
र्णानां शतनाशे विषं स्मृतं अशीतेस्तु विनाशे वै घटं द्यैच हुताशनं षष्ट्या नाशे जलं देयं
चत्वारिंशत्तिवैघटं विंशद्दं विनाशेत्र कोशकोशपानं विधीयते पञ्चाधिकस्य वा तांशत
तोऽर्द्धार्धदं तुल्लाः ततोऽर्द्धार्द्ध विनाशे हिस्यशेत्सुत्राद्मल्लिकान् ततोऽर्द्धार्द्ध विनाशे तत्लौऽ
किकाः श्चक्रियाः स्मृताः एवं विचारयन् राजाधार्म्मयैः स्यान्नहीयते यतेइति ज्ञात्वा सं
ध्यासुवर्णानां मित्यत्रसुवर्णोशावः षोडशमाषाः सवर्णस्तुक्तपरिमाणवचनः नास
ह्याद्दूरेत्कालमित्यत्रत्राग्निकवणसहस्त्रेवोधव्यं नरत्नेनपद्रोहेपातके वैतानि दिव्या
नुक्तिजत्कर्पनाम्सहस्त्राद्दूरेत्कालमित्यतआह नृपद्रोहेषुमहापातभियोगेचसद्रा
द्रव्ये संख्यामनपेक्ष्यैवैतानि दिव्यानि कुर्युरुपवासादिनाश्चयः स्मृताः तेषांदेवेविशेषोपि

नरदेवनोक्तः ॥ सभाराजकुलद्वारदेवायतनचत्वरे विषयो निश्चलः ॥ पूज्यो धर्मात्म्यो न्त
पनैरितिनिवेयो घटव्यवस्थाकात्यायनेनोक्ता ॥ इंद्रस्थाने भिशस्तानां महापातकिनां न
णां नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् ॥ प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ॥ प्रतो
ज्येषु तेषु कार्येषु सभामध्ये विदुर्बुधाः ॥ ग्रस्य श्यो धमद्दासानां म्लेच्छानां पापकारिणां ॥ प्राति
लोम्यप्रसूतानां निश्चयो न तु राजनि तत्प्रसिद्धानि दिव्यानि प्रयोगमाह ॥ संशये तेषु निर्दिशे
दिति ॥ इति मुच्यमानत्वकाः ॥ ९९ ॥ एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं घटा
दिव्यानां प्रयोगमाह ॥ तुलाधारणतोलनेपि विरूढं तिलवर्णिकारप्रसृतयस्तैः प्रतिमानेन
मृदादीनां समीभूतः समीकृतस्तुलामिश्रितो लक्षविरूढाभियुक्तोभियोक्तृवादिव्यकारी ले
खां कृत्वा पमनसंनिविष्टेन प्रतिमानसमीकरणं दशायां शिक्यतलेवास्थेस्तस्मिन् पोड्लेः
ख्यानां कापित्वा चतारितस्तुलामंत्री मंत्रयेन प्रार्थयता नेन मंत्रेण हे तुले त्वं सत्यस्थानमसि पु
रा प्रादिसुरैर्देवैर्हिरण्यगर्भप्रभृतिभिर्निर्मिता इत्यादिना वतस्मात्सत्यं त्वं ह दिधार्थस्य

स्वरूपे वदर्शयाकल्पाणि रोमनेस्माश्रया न्मां विमोचय हे मातर्यं घटं पापकृदसत्यवाद्यस्मि
ततो मां त्वमधो नय अथ शुद्धः सत्यवाद्यस्मि ततो मामूर्ध्वं गमयेति प्रसिद्धं चीकस्पृतः । लोभिमं
त्रास्मत्पं तरोक्ताः । अपं तु दिव्यकारिणः । जयपराजयलक्षणं तु मंत्रलिंगादेवावगम्यते
इति न दृष्ट्याद्यकपटानि र्माणं पुनर्नारा रोहणाद्यर्थासिद्धमेवपि नामहन्नारदादिभिः । स्पष्टीकृ
तं तद्यथा छित्वा तपाक्षेपं वक्षं प्रवं च मंत्रपूर्वकं प्रणम्य लोकपालेभ्यस्तुला कार्या मनागाषाभिः
मंत्रः सौम्यो वानस्पत्यश्छेदने जप्य एव च चतुरस्रा तुला कार्या दृढा त्रासीत थैव च । कटकानि
वदेयानि त्रिषु स्थानेषु तार्थवत् । चतुर्हस्ता तुला कार्या पादौ चोपरि तत्समौ । अंतरं तु तयोर्हस्तौ
भवेदध्यर्द्धमेव वा । हस्तद्वयं निखेयं तु पादयोरुभयोरपि तोरणे । च तस्याः कार्ये पार्श्वयोरुभ
योरपि घटादुच्चतरे स्यातां नित्यं दशभिरंगुलैः । अचले वा वक [illegible] तोरणाभ्यामधो
मुखौ मन्मयो सूत्रसंबद्धौ घटमस्तकचुंबिनो प्रान्मुखो निश्चलः कार्यः शुचौ देशे घटस्तथा
शिक्यसमासक्तं त्यपार्श्वयोरुभयोरपि प्रागुखान् कल्पयेद्रश्मी शिक्ययोरुभयोरपि पश्च

मेतो तोलयेत्कुन्देनन्यास्मिन्स्नातिकांहृतां पिटकं पूरयेत्तास्मिन्निष्कास्त्रावयांबुभिः ॥ अत्रच
भ्रांतिकैः हकाग्रावयांभ्युमो विकल्पः परीक्षकानयोः कृत्यास्तुत्यामानविशारदाः ॥ वणिजो
हेमकराश्वकोष्ठपकाराश्चस्थेयचकार्यः ॥ परीक्षकैः नित्यसबलंसमोघटत्तदकंचप्रदीत
व्यंघटस्योपरिर्वेदितोः ॥ यस्मिन्लभ्नवल्लीनेतो यंसविसेयसमोघटः ॥ तोलयित्वानरं पूर्वंपश्च
तमबान्तारयेन्नघटोतुत्कारयेन्नित्यंपताकाध्वजशोभितंततः ॥ आवहयेद्देवा विधिनानेनमं
त्रविष्यादित्रत्यंदेवोषेश्चगंधमाल्यानुलेपनैः ॥ प्राङ्मुखप्रांजलिर्भूत्वा शाविंडिवाकस्ततावदेत् ॥ एत्स्थो हि भगवान्धर्मः अस्मिन्नूदिव्येसमाविशेसहितोत्नो कपालैश्च वज्रादित्यमरु
द्गणैः ॥ आवाह्यानुघटेधर्मंपश्चादंगानिविन्यसेत् ॥ इदं पूर्वेत्तुसंस्थाप्यप्रेतेसंदक्षिणे तथा व
रुणंपश्चिमभागेकुवेरंचोत्तरे तथा ॥ अग्न्यादिकोणकपालांश्चकोणभागेषु विन्यसेद्द्रः ॥ पीतो
यमः श्यामोवरुणः स्फटिकप्रभः कुवेरस्तु स्तवर्णाभः तथैवनिर्ऋतिश्यामो वायुर्धूम्रप्र
शस्यते ईशानस्तु भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ॥ इंद्रस्य दक्षिणे पार्श्वे वस्तोराधयेद्दु

धः धरो ध्रुवस्तथा सोमश्चापश्चैवानिलोनलः । प्रत्यूषश्च प्रभासश्च वसवश्चाष्टौ प्रकीर्त्तिता दे
वेशो श्शापयो मध्ये आदित्या नो तथा धनं । धातार्यमा वामित्रश्च वरुणोंशो भगस्तथा । इन्द्र
विवस्वान् सवा वपर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः । इत्येते द्वा
दशादित्या नामभिः परिकीर्त्तिताः । आग्नेयपश्चिमभागे तु रुद्राणामयनं विदुः । वीरभद्रश्च
शंभुश्च गिरिशश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः । भुवनाधीश्व
रश्चैव कपाली च विशांपतिः । स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः । प्रेतेशरक्षाम
ध्ये वा मातृस्थानं प्रकल्पयेत् । ब्रह्माणी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री
चामुण्डा गणसंयुता । निर्ऋत्युत्तरे भागे गणेशायतनं विदुः । वरुणस्योत्तरे भागे मरुत्स्थानमु
च्यते । गगनः स्पर्शनो वायुरनिलो मारुतस्तथा । प्राणः प्राणेशजीवौ च मरुतोष्टौ प्रकीर्त्तिताः ।
धनस्योत्तरे भागे तु दर्भामावाहयेद्बुधः । एतासां देवतानां तु स्थानं प्राक् पूजनं विदुः । ऋषावसा
नां धर्मोपदत्वा च वीचीद्विकं क्रमात् । प्राच्यादि पश्चादगानां ऋषीणां ऋषीणां तमुपकल्पयेत्

135

गंधादिकांनिवेद्यांतांपरिकल्पीप्रकल्पयदिति ॥ अत्रचतुःनोपताकाश्चध्वजानंकृतां।विधि
यतश्चामेद्राहोतिमंत्रेणधर्म्मोपार्थंप्रकल्पयामिनः ॥ इत्यादिप्रयोगेण अर्घ्यपाद्याचमनीय
मपर्काचमनीयस्तानस्त्रयज्ञोपवीताचमनीयमुकुट कटकादिभूषांतंदत्वाइंद्रादीनांदुर्गा
नानाप्रणवाद्यैः स्वनामतिस्तुर्थ्यंतेनामंत्रैरर्घ्यादिभूषांतंपदार्थानुसमयेनदत्वाधर्माय
गंधपुष्पधूपनैवेद्यानिदत्वाइंद्रादीनांगंधादितिपूर्ववधात ॥ गंधपूर्वविधातगंधपुष्पानि
वघटपूजायांरक्तानिकार्याणि ॥ यथाहनारदः ॥ रक्तैर्गंधैश्चमाल्यैश्चदध्यपूपाक्षतादि
भिः अर्घयेत्तुघटंपूर्वंततः शेषांस्तुपूजयेदिति ॥ इंद्रादीनांविशेषातामिधानाद्यस्यान्नामं
रक्तैर्न्यैर्वापूजनंमितिपूजाक्रमः ॥ एतच्चसर्वंप्राड्विवाकः कुर्यान्नयथोक्तयोग्यद्विकाकस्ततो
विप्रोवेदवेदांगपारगः श्रुतकृतापसंपन्नः शांतचित्तोविमत्सरः सत्यसंधः शुचिर्दक्षः
सर्वप्राणिहितेरतः उपोषितः शुद्धवासाः कृतदंतानुधावनः ॥ सर्वासांदेवतानांतुपूजांकु
र्यात्विधिः तथास्यान्त्वग्निश्चतुर्भिश्चतस्रुदिक्षुलौकिकेग्नौहोमः कार्यःयथाहः चौत्तु

शे।

(१४८)

दिश्च तथाह्वानः कर्त्तव्यो देवतागणैः ॥ आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥ सावित्र्या प्रणवे
न च स्वाहान्तेनैव होमयेत् ॥ प्रणवादीं कां गायत्रीमुच्चार्य पुनः ॥ स्वाहाकारान्तं प्रणवमुच्चार्य
समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादित्यर्थः ॥ एवं हुत्वा नान्तं चैव पश्चाद्विधानान्तरमा
मेयुक्तमर्थं वक्ष्यमाणमन्त्रसहितं पत्रे लिखित्वा तत्पत्रं संशोध्य शिरोगतं मन्त्रश्च ॥ आदित्यचन्द्रौ
निलो नलश्च द्यौर्भूमिरापो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य
वृत्तमिति ॥ एतच्च धर्मावाहनादि शिरसि पत्रारोपणान्तमनुष्ठानं कांडं सर्वदिव्यासाधारणं
यथोक्तं ॥ इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् ॥ आवाहनं च देवानां तथैव परिकल्पयेत् ॥ इ
ति ॥ अनन्तरं प्राड्विको घटमामन्त्रयते ॥ घटमामन्त्रयेत्तद्वै विधिनानेन शास्त्रवित् ॥ इति स्मरणात् ॥
मन्त्रश्च दर्शितस्तेन घट ब्राह्मणमसृष्टः परीक्षार्थं दुरात्मनां ॥ धकारः धर्ममूर्त्तिस्त्वं टकारात् कुटि
लं तरं ॥ धृतो भावयसे यस्माद् घटस्तेनाभिधीयसे ॥ त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ॥ त्वमे
व सर्वं जानीषे न विदुर्यानि मानवाः ॥ व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति तदेनं संश

७५ स्मिन् शिरोवस्थितपत्रकं मिति स्मरणात् । आरोपितं विनाडीपंचकं यावत्तावत्स्थापयेत् ३

याद‍स्माद्धर्म्मात्तस्माद्धर्म्मात्त्वमर्हसीति सोध्यस्तु त्वं तुले सत्यधामासीत्यादिना पूर्वोक्तेन मंत्रेण
तुलामंत्रयते अनंतरं शाङ्खवाकः शिरोगतपत्रकां शोध्यं अभियुक्तं यथास्थानं यथासं
निवेशं च घटमारोपयन्ति पुनरापवेत् तत्कालपरीक्ष्यां च ज्योतिःशास्त्राभिज्ञः कुर्यात् ज्यो
तिर्विद्ब्राह्मणः श्रेष्ठः कुर्यात्कालपरीक्षणं विनाड्यः पंच विज्ञेयाः परीक्षाकालकोविदै
रिति स्मरणात् दशगुर्वक्षरोच्चारणकालः प्राणः षट्प्राणः विनाडीत्येकवदन्ववर्णो
प्राणः षट्प्राणास्तु विनाडिका तासां यथा घटीघटीनां षष्ट्याहोरात्रं तत्तु त्रिंशद्दिनं तास्मि
न्काले श्च सिद्धिपरीक्षणार्थं श्वचयः पलषाराजांतियोग्याः तेवशुद्धाशुद्धी कथ्यते। यथो
क्तं पितामहेन। साक्षिणो ब्राह्मणाः श्रेष्ठा यथा दृष्टार्थवादिनः ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या
स्तत्क्रयेण नसंति साक्षिः सर्वशुद्धोऽशुद्धिनिर्णयकारणं चात्र तुलितो यदि वर्द्धेत शुद्धः स्यान्नसंश
यः समो वा हीयमानो वा न विशुद्धो भवेत्तरः इति यत्र पितामहवचरं तं अल्पदोषः समो ज्ञेयो बहुदो
षस्तु हीयते इति तत्र यद्यपि अभियुक्तस्यार्थस्याल्पत्वं च न दिव्यन च धारयितुं प्राक्तेन तथा

पिसघटमातिपूर्वत्वेनामात्यात्वे । प्रसक्तन्मात्तिपूर्वत्वेन चमलत्वामित्ति दृढप्रायश्चित्तात्व
त्वमवधार्यतेयदावानुपलक्ष्यमाणे दृष्टकारणएवकच्छादीनोद्वेदो भंगोवा भवतितदाप्य
शुद्धिरेववयच्छेदेस्मृत्लांभंगेघटकर्कयोस्तव्यारुच्छेदेक्षे भंगेचतथैवाशुद्धिमाद्दितिस्मरणात्
कक्ष्यंशिकतत्लंककर्कटैनत्लांतयोः शिक्याधारा विषयद्वक्रापयसकोत्लकौककर्कटस्यमणसे
नितौप्रक्ष्टः पादस्तंभयोः रूपनिविष्टस्तद्धारयदः पद्दानुदरूपंभारणेकणधां भंगह्लादाप
नरारोययेन् शिक्यादि छेदभेगेषुपुनरारोयदैवेतरामितिस्मरणात् तत्त्वाच्चिकपुरोदितावा
र्योदाक्षेणाभिरखतोषयेत् एवंकार्यपि तारानीमुत्काभेणमनोरमान् महतीकीर्तिमाप्नो
तिब्रह्मभूयायकल्पतोयदात् कुलक्षणोघटं तथैवस्थापयितुमिच्छति तदीवायसाधयधा
तनिरासार्थ्यकेवाराद्दिसहितांशान्तो कृतविशालामधितं शुभ्रांघटशालांनुकारयेत् ऽ
यत्रस्थानोपहन्येतस्य विश्वाडालवायसैः तत्रैवत्लोकपालानादीसर्वदिक्ष्पनिवेशयेत् वी
जानीयावीह्लादीनो इतिघटदवेचिः सानिक्रमप्राप्तमन्त्रविधिमाहर्हृदिव्यमात्रको स्क

हस्तयोरंगनीन्द तयोन्यसेत तत्रैरंजलिमोपूर्णं पंचरत्नयोस्तपूर्णे । समैरितिस्मरणात् ॥ एतानव प

शाधारणधर्मैषसमुच्चनाविधानोक्तधर्मोवाहनादिशेरः ॥ पत्रारोपणंतत्तविधयत्तेसत्य
वसमर्चनाविधौविशेषः ॥ विमृज्य ब्रीहेर्विमर्दितानिधार्षेताब्रीहयः ॥ करत्याययेनासौ विमर्दि
तब्रीहिस्तस्यकरोजक्षायित्वातिलकालकबपणाकेणादिस्याने बुल्लकरसादिनोक
पित्वायाथाहनास्द्दः ॥ हस्तक्षातेषुसर्वेषुकुपद्धेसपदानीन्यावितिः अनंतरंसप्तास्वपत्रा
णिहस्तसहीतानिसूत्रेणमावद्धेरूपेडावंतपचकाप्ययत्राणिशपूर्णकृत्वोव्यवेष्टयद
त्यर्थः सूत्राणिचसंपूर्णकृत्तानिनवंतिचेचेष्टयास्मितेहस्तोत्सप्तामिसूत्रतंतमिरितिना
रदवचनात् ॥ तप्यासप्तशामीपत्रणीस्थलपत्राणिशामीपत्राणिस्थलपत्राणिशामीप
त्राण्येवप्यासतानदूर्वीयाः ॥ सप्तपत्राणिदध्यक्तरवासतान्यसेदितिस्मरणात् ॥ तप्याकुसु
मानिन्याविन्यसेत् ॥ अश्वत्थपत्राण्युपरिविन्यसेत्सप्तपिप्पलपत्राणि ॥ अक्षितसंगुल्लम
योमयंपिंडंतुतापयेदग्नौपंचाशामलिकंसमाभिरहितेसर्वतस्समवृत्तंश्लक्ष्णंचतथाष्टां
गुल्लायामं ॥ अश्वहीनंसमंकृत्वा अमितिपितामहस्मरणात् ॥ अग्निवर्णमग्निसदृशमुतयो

ह १

७६

१५८

सताष्वत्रयात्सत्पुराकृतामिति अस्यार्थः सहश्रुद्धर्व्यस्तत्र ॥ ओहं पिंडमुदकेनिक्षिप्य तत्तीर्थे ७

तेसमनोद्दाधिहृत्तयोनिक्षिपेतत्रसूत्रेणावेष्टनं तयोतिधितामहवचनान्समनसः पुष्पाणि यदपिलसरणो
अयक्तांतनुवारिण्यां मर्कं पत्रैस्तसमामि । अंतर्हितं हरन् श्रद्दत्वदधः सहामेयद्दहतितत्रहस्वत्पयत्रा भावेव
कंपत्रेनुपत्राणिहस्तयोनो । स्वेबेद्वुधइति ३ कर्तुरग्निमिमंत्रेणमाहरि अग्ने त्वं सर्वभूतानांज
रायजोऽजचेदजेद्वीस्तानां अतः शरीरांतरेचरां । शेत्रयपयपुष्पाधान्नादीनां पावकत्वेनवर्त्तसेपावकं
शुद्धिहेतोकवेक्रोतदर्शिन सात्विवत्पुण्यपापेभ्यः सत्यंशूद्दिपुण्यपापेभ्य इति त्पक्रोपेपंचपुण्यपापा
भ्यवेशसत्यं शृहिदर्शयेत्यर्थः । अथ पिंडत्रिभिस्तापैस्तनैसदेशानुधरतअग्नानीतेकर्तापश्चिममंडलेअ
श्रुत्वेक्षिप्तते नेनमंत्रेनाग्निमिमंत्रयतो । यथाहनरदः अग्निवर्णमयः पिंडसस्फुलिंगं मुरंजितं तापेत्तत्तीर्थे
तापेसंतप्येतदेशेनगृहीत्वाधरत अग्नीतेसत्पत्पुरस्कृतंसत्पशाद्युतंत्वेन्नेसर्वभूतानामामीत्यादिमंत्रक
तांशृत्यादितिप्राद्विवाकुस्तमंडलभूमाणाद्वाक्षिणंप्रदेशेलौकिकमाग्निमपसमाधावान्ययेपावका
पत्याहे त्याहेनाहेतरप्रातंयदुपान् । शोत्पर्यजदुपादग्नौशनरसतामितिस्मरणात् । हुत्वावाधस्मिरग्ना
वपापिंडे प्रक्षिप्यतस्मिंस्तापमानेधर्मद्दनादिरवस्यंतपूर्वान्कं । विधिविधाय्यत्तापेवर्तमामेपः । पिंड

स्यमग्निमेभिर्मंत्रैरभिमंत्रयेत्त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादि
नां न वस्योहि भूतानां ततो वेत्सि जगच्च भुवनं चापि भूतानि वेत्सि तस्मात्पावक उच्यते ॥ पापेषु दृश्यसे मानमर्त्त्येभ्यो
न्नवपावक। अथ वा शुद्धभावेषु रीतो न वहुताशने। त्वमग्ने सर्वेस्मात्तमा~~यकनक~~ उच्यते भूतानां मे तं श्वराशि
मां स्तिवत्। त्वमेव देवजानीषे न विदुर्याण्मानुषः ॥ व्यवहारामेरास्तयो मानुषः ॥ शुद्धिमच्छति तो देवेन सशयाद्
रमाद्धर्मेण तस्मान्न मर्हसीति ४ अपि चैतस्य कर्त्रेरिसुक्त व तत्त्वमग्ने सर्वभूतानामित्याद्यभिमंत्रणं कृतवतः लो
हे लोहविकारं पिंडं वासत्पलिकं पंचाशत्पलसमं तं समभिद्धरहितं सर्वतश्च समवृतं श्लक्ष्णं च तथा ष्टांगु
लायामं प्राश्लिष्टानं समं कृत्वा अष्टांगुलमयोमयं पिंडं ततो पयेदग्नौ पंचाशत्पलिकं समभिद्धरहितं स
र्वतश्च समवृतं श्लक्ष्णं च तथाष्टांगुलायामं प्राश्लिष्टिनं समं कृत्वा अष्टांगुलमयोमयं पिंडं तापये
दग्नौ पंचाशत्मिलिकं समाभ्रिरहितं सर्वतश्च समवृतं श्लक्ष्णं च तथाष्टांगुलायामं प्राश्लिहानां समं कृ
त्वा अष्टांगुलमयोमयं पिंडं ततापयेदग्नौ पंचाशत्पलिकं समाभ्रिरहितं सर्वतश्च समवृतं श्लक्ष्णं च
तथाष्टांगुलायामं प्राश्लिष्टिनं समं कृत्वा आमिभिपितामहस्मरणात् ॥ अग्निवर्णमग्निसदृक्षुस्त्तयो ९५५

152

हस्तयोरश्वत्थपत्रं दद्यात् दूर्वाद्यंतरे तयोन्यसेन्निक्षिपेत् प्राड्विवाक ॥ प ॥ ततः किं कुर्यादि
त्यत आह ॥ स्मरणान्तं ॥ अग्निवर्णाय सप्तपुरूषस्तं तप्तलोहपिंडं अंजलौ नागरहीत्वा सप्तमं
डलानि शनैर्व्रजेत् ॥ एवंकारेण मंडलेषु तपादन्यासमंडलानि शनैर्व्रजेदित्युक्तं तत्रैकैकमंड
लं किंप्रमाणमेकमंडलयोरंतरं ॥ किंपत्प्रमाणं कमित्यत्र आह ॥ षोडशांगुलं विहाय द्वा
त्रिंशदंगुलकं ज्ञेयं मंडलं तावदंतरं षोडशांगुलानीयस्य तत् षोडशांगुलकं षोडशांगुल
प्रमाणं मंडलं बोद्धव्यं मंडलं मंडलयोरंतरमध्ये तावदेव षोडशांगुलकानि मंडलांतराणि
न्यसप्त वाच्य प्रमाणानि ॥ एतदेव नारदेन परिसंख्यायोक्तं ॥ द्वात्रिंशदंगुलं प्राहुर्मंडलान्मंडलांत
रं ॥ अष्टाभिर्मंडलैरेवमंगुलानां शतद्वयं चत्वारिंशत्समधिकं भूमेरंगुलमानतः इति ॥ प्रथम
र्थः ॥ अवस्थानमंडलान्षोडशांगुलानि तरमन्यमंडलं द्वितीयादेकमेवं द्वात्रिंशदंगुलं तेनैवं दे
मस्थानमंडले षोडशांगुलेन ग्राह्यानि वसप्तमंडलानि द्वात्रिंशदंगुलानि एवमष्टाभिर्मंडलै
स्त्यावेरादाधिकं शतद्वयं भूमेरंगुलमानतो गुलमानमिति सर्वा विभागेव स्पष्ट ॥ अग्नि

ल्पपक्षेवस्थानमंडलंषोडशांगुलं। चैशपक्षात्रिंशदंगुलप्रमाणानां सप्तानां सन्तरालमंडल
र्म्भागानां एकमेकं भागं विधाविभक्तं तालं भागान् षोडशांगुलप्रमाणांतर। विशापमंडले
र्म्भागेषु षोडशांगुलप्रमाणेषु अंगुलपदप्रमाणात्रिसप्तमंडलानि कार्याणि। यथा तेनैवोक्तं
मंडलस्यप्रमाणंतुकुर्यात्तदन्यदशांगुलि यत्पितामहोक्तं कारयेन्मंडलाष्टेषु रस्थानचतथा। प्र
थमंमंडलाद्वाह्ये द्वितीयंचारुणंस्मृतं। तृतीयंवायुदैवत्यंमित्रादित्याविदोविदुः चतुर्थपम
देवतं। पंचमंचैन्द्रदैवत्यंषष्ठंकौबेरमुच्यते सप्तमंतोमदैवत्यंसावित्रत्वष्टमंस्मृतं। नवमंसर्वदै
वत्यंमित्रादित्याविदोविदुः द्वात्रिंशदंगुलंप्राहुर्मंडलान्मंडलांतरं। प्रष्टाभिर्मंडलैस्त्वेमंगुलानांशा
नास्ति कस्य तमर्घयेदिति ७० ॥ तस्य प्रक्षालकं प्रत्याहर्तुं शरणं नान्यौरादिहस्तस्थं द्रव्यमनेन मदीय १

मेति तदात्मदोषपरिहाराय क्रयेण ॥ धयित्वा द्रव्यं द्रव्यमहत्य ॥ अत्रस्यं हृत्तं तं शोधं यत्र
मस्तिय कर्मदत्ताप्रदानिकं मम्मेति चलत्व्योति धानदृयं दानाख्ये व्यवहारपदमभिधीयते
तत्स्वरूपं च नारदेनोक्तं ॥ दत्त्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति तद्दत्ताप्रदानिकं नाम व्यव
हारपदं हितद्दिति ॥ असम्यग्विहितमार्गाश्रयेण द्रव्यं दत्त्वा पुनर्ग्रहीतुमिच्छति यस्मिन्वि
वादपदे तद्दत्ता ॥ प्रदानिकं दत्तस्य अप्रदानं पुनर्हरणं यस्मिन्नु दानाख्ये तद्दत्ताप्रदानकर्मे
प्रतिदा ॥ निकं नाम व्यवहारपदं विहितमार्गाश्रयत्वेन तत्प्रातिपदहृमूतं तद्देव व्य
हारपदं तद्दत्तानपकर्मेति च देयादेयादिभेदेन चतुर्विधत्वमाह नारदः ॥ अथ देयम
देयं च दत्तं चादत्तमेव च व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विध इति ॥ तत्र देयमित्यवि
विद्ध दानक्रियायोग्यमुच्यते ॥ अदेयं पश्चात्तमाविनिषिद्धतया वादेनानर्हं यत्पुनः प्रकृ
तिस्थेन दत्तमव्यावर्तनीयं तद्दत्तमुच्यते ॥ अदत्तं तु यत्प्रत्याहरणीयं तत्स्वरूपं तेदिदं संक्षे
पतो निरूपितमाह ॥ स्वमात्मीयं कुटुम्बाविरोधेन कुटुम्बानुपरोधेन कुटुम्बभरणक

शिष्टमिति यावत्तस्य स्वत्वात् ॥ तद्द्रव्यस्यावश्यकत्वात् ॥ तथा च मनुः ॥ वृद्धौ च माता पितरौ सा
ध्वी भार्या सुतः शिशुः ॥ अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीदिति स्वकुटुम्बाविरोधेनेत्य
नेन देयमनकं विदर्शयति स्वं दद्यादित्यनेन चास्वभूतानामस्वा इति तथा वित्तकापिस्ताधार
णनिक्षेपाणां पंचानामदेयत्वं व्यतिरेकतो दर्शितं ॥ यत्तु नारदेनोष्टविधं च
मदेयानामुक्तं अन्वाहितं याचितकमाधिः ॥ साधारणं च यत् ॥ निक्षेपः पुत्रदाराश्च सर्वस्वं
चान्वये सति ॥ आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ॥ अदेयान्याहुराचार्या यच्चान्यस्मै प्र
तिश्रुतमिति ॥ एतद्दैदेयत्वमात्राभिप्रायेण न पुनः स्वत्वाभावाभिप्रायेण पुत्रदारसर्व
स्वप्रतिश्रुतेषु स्वत्वस्य सद्भावात् ॥ अन्वाहितादीनां स्वरूपं प्रागेव प्रपंचितं ॥ स्वं दद्यादित्यने
नस्वारक्षतादेरपि स्वविशेषेणादेयत्वाप्रसंगे प्रतिषेधमहदारसुतादत्ते दारश्च्यातिरिं
कृत्वा दद्यात् सदारसुतेभ्य इत्यर्थः ॥ तथा पुत्रपौत्रानुवृत्तत्वे विद्यमाने सर्वधनं न दद्यात् ॥ पु
त्रानुत्पाद्य संस्कृत्य वृत्तिं चैषां प्रकल्पयेदिति स्मरणात् ॥ तथा हि रत्नाकरादिकमन्यस्मै प्र

तिश्रुतं मन्यस्मै न देयं ॥ एवं दारसुतादिव्यतिरिक्तं यमुक्तं प्रसंगाद्देयधनमन्वहरणे कार्यं तत्
स्य सर्वेण । इत्येवदातृमनोस्थितस्य दर्शयितुमशक्यत्वात् ॥ एवं प्रासंगिकमुक्त्वा प्रकृतम
नुसरन्नाह ॥ देयं प्रतिश्रुतं चैव यद्यस्मै धर्मार्थं प्रतिश्रुतं तस्मै देयमेव यद्यसौ धर्मान्न
च्युतो न भवति ॥ प्रत्युतेन पुनर्न दातव्यं ॥ प्रतिश्रुत्वाप्यधर्मसंयुक्ताय न दद्यादिति गौ
तमस्मरणात् ॥ दत्त्वा वापहरेत्पुनस्तस्यार्थं मार्गेण यद्दत्तं षोडशप्रकारमपि प्रस्ताद्दत्तीय
मेवेत्यर्थादुक्तं भवति नारदेन वदत्तं सप्तविधप्रोक्तं मदत्तं षोडशात्मकमिति प्रतिपादयद
तादत्तयोः ॥ स्वरूपं विवृतं ॥ पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः ॥ स्त्रीशुल्कानुग्रहार्थं
च दत्तं दानविदो विदुः ॥ अदत्तं तु भयक्रोधशोकवेगरुजान्वितैः ॥ तथोत्कोचपरिहासव्य
त्यासछलयोगतः ॥ बालमूढास्वतंत्रार्त्तमत्तोन्मत्तापवर्जितं ॥ कर्ता ममेदं कर्मेति प्रतिला
भेच्छया न यत् ॥ अपात्रे पात्रमित्युक्तो कार्ये वाधर्मसंहिते यद्दत्तं स्यादविज्ञानाददत्तमिति
तत्स्मृतमिति ॥ अयमर्थः ॥ पण्यस्य क्रीतद्रव्यस्य मूल्यं दत्तं भृतिर्वेतनं कृतकर्मणे दत्तं तुष्टचं

द्दिचारणादिभ्यो दत्तं स्नेहानुबद्धदुहितृपुत्रादिभ्यो दत्तं प्रत्युपकारार्थं उपकृतवते प्रत्युपका
रस्वरूपेण दत्तं स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो दत्तं पक्षानुग्रहणार्थं दरिद्रार्थं दत्तं त
देतत्सप्तविधमपि दत्तमेव न प्रत्याहरणीयं भयेन च बंदिग्राहादिभ्यो दत्तं क्रोधेन पुत्रादि
वैरिणि पातनेच्छया अन्यस्मै दत्तमेवं पुत्रमरणादिनिमित्तशोकावेशेन दत्तं उत्कोचेन कार्यप्र
तिबंधनिरासार्थं अधिकृतेभ्यो दत्तं परिहासेन उपहासेन दत्तं एकोऽपि स्वं द्रव्यमन्यस्मै
ददाति अन्योऽपि तस्मै ददातीति दानव्यत्यासः छलयोगतः दत्तं शतमभिसंधाय सहस्रमिति
परिभाष्य ददाति बालेनाप्राप्तषोडशवर्षेण मूढेन लोकवेदानभिज्ञेन अस्वतन्त्रे
ण पुत्रदासादिना आर्तेन रोगाभिभूतेन उन्मत्तेन वातिकाद्युन्मादग्रस्तेन अपव
र्जितं तथायं मदीयं इदं कर्म करिष्यतीति प्रतिलाभेच्छया यद्दत्तं अपात्राय चतुर्वेदाय च
तुर्वेदोऽहमित्युक्तवते दत्तं यज्ञं करिष्यामीति वचनेन याचित्वा द्यूतादौ विनियुंजानाय दत्तमि
त्येवं षोडशप्रकारमपि दत्तमित्युच्यते प्रत्याहरणीयत्वात् स्वदत्तामपमतो दाप्यस्व

स्तेनात्र संशयः इति कात्यायनस्मरणात् । तथेदमपरं शाक्येयार्थवचनं सर्व वि वि
वादसाधारणं योगाद्यमनविक्रीतयोगदानप्रतिग्रहं यस्यावाप्युपाधिपश्येत्तत्सर्वं वि
निवर्तयेदिति योगभयाधिः योगेन नोपाधिविशेषेणाधिविक्रयदानप्रतिग्राहीः क्र
तोस्तु तदुपाधिविगमे क्रयादीन विनिवर्तयेदित्यस्यार्थः पुनः षोडशः प्रकारमदेयद
त्तं गृह्णाति यश्चादेयं प्रयच्छति तयोर्दण्डो नारदेनोक्तः गृह्णात्यदत्तं यो लोभाद्यश्चादेयं
प्रयच्छति अदेयदायको दण्ड्यस्तथादत्तप्रतिच्छक इति इति दत्ताप्रदानिकं नाम प्र
करणं क्रीतानुशयः क्रयं कृत्वा तत्स्वरूपं च नारदेनोक्तं क्रीत्वा मूल्येन यः पण्यं क्रे
ता न बहु मन्यते क्रीतानुशय इत्येतद्विवादपदमुच्यते इति तत्र यद्यस्मिन्नहनि प
ण्यक्रीतं तस्मिन्नेवाह्नि तत्प्रविकृतं प्रत्यर्पणीयमिति तेनैवोक्तं क्रीत्वा मूल्येन यः
पण्यं दुःक्रीतं मन्यते क्रयी विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतमिति द्विती
यादि विनेतु प्रत्यर्पणे विशेषस्तेनैवोक्तः द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमाव

हेशाहद्विगुणं गुणं हनत्तीयेह्नि परतः ॥ केचनत्वदन्ति ॥ क्रयोनुशयेन कर्त्तव्य इत्यर्थः ॥ र
तत्त्वबीजादिव्यतिरिक्तोपभोगविनश्वरमोविषयं ॥ बीजादिक्रये पुनरन्यएव प्रत्यर्पणाव
धिरित्याह ॥ अयोलोहः ॥ वाह्यो बलीवर्द्दादिः ॥ रत्नं मुक्ताप्रवालादि ॥ स्त्री दासी ॥ दोह्यं महिषा
पुमान् दासः ॥ एषां बीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः ॥ प
रीक्ष्यमाणश्च बीजादौ यद्यसम्यक्त्वबुध्यानुशया भवति तदा दशाहादिष्वेवाप्यसरण
वत्क्रियान्निवर्त्तिपुनस्तूर्द्धमित्युपदेशप्रयोजनं ॥ पठमनुवचने क्रीत्वा विक्रीय वा किंचि
दस्येहानुशयो भवेत् ॥ सोन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत चेति ॥ तदुक्तं लोष्टादिव्य
तिरिक्तोपभोगाविनश्वरगृहक्षेत्रयानशयनादिविषयं ॥ सर्वं चैतदपरीक्षितक्रयः
यत्पुनापरीक्षितं न पुनः प्रत्यर्पणीयमिति ॥ समयं कृत्वा क्रीतं तादृक्क्रीतं न प्रत्यर्पणी
यं ॥ तदुक्तं ॥ क्रेता पण्यं परीक्षेत प्राक्स्वयं गुणदोषतः ॥ परीक्ष्याभिमतं क्रीतं विक्रेतुर्न
भवेत्पुनरिति ॥ दोत्सादि परीक्षाप्रसंगेन स्वर्णादेरपि परीक्षणमाह ॥ वह्नौ प्रत्याताप्य

मानेसुवर्णं चेन्न क्षीयते । अतः कटकादिनिर्माणार्थं यावत्सुवर्णं कारहस्ते प्रक्षिप्तैना
वत्तु लिंगितैः प्रत्यर्पणीयं । इतरथा क्षयं । इतरथा क्षयं दाप्यो दंड्यश्च । रजते तु । शतपले
प्रताप्यमाने कलद्वयं क्षीयते । अष्टौ त्रपुसी।ति सीसे वा शतमित्यनुवर्तते । त्रपुणि सीसे
च शतपले प्रताप्यमाने अष्टौ पलानि क्षीयंते । अत्रापि शतमित्येव कांस्यस्य तु तत्रपुता
म्रयोर्मिश्रत्वात्तदनुसारेण क्षयः कल्पनीयः । अतोऽधिकक्षयकारिणः । शिल्पिनो दंड्याः । क
चित्कंबलादौ वृद्धिमाह । स्थूलेत्यौर्णसूत्रेण यत्कंबलादि क्रियते । तस्मिन्दशतत्र द
शपला वृद्धिर्वेदितव्या एवं च कार्पाससूत्रनिर्मिते पटादौ वेदितव्यं । मध्येनेति सूक्ष्म
सूत्रनिर्मिते पटादौ पंचपला वृद्धिः । सूक्ष्मसूत्ररचिते त्रिपला वृद्धिर्बोद्धव्या शतं च अप्रक्षा
लितवासोविषयं । इत्यांतरे विशेषमाह । कार्मिकं कर्मणा चित्रेण निर्मितं । यत्र निष्पन्ने
पटे चक्रस्वस्तिकादिक चित्रसूत्रैः क्रियते तत्कार्मिकमित्युच्यते । यत्र प्रावारादौ रोमा
णि वध्यंते स रोमवधः । तत्र त्रिंशत्तमो भागः क्षयो वोद्धव्यः । कौशेयकाशप्रभवे वाल्कले

गुवक्षस्याग्निर्भित्तेषुवद्धृशास्तो नस्त्ता:॥ किं तयाहृयनार्थे कविंशादिभ्यो दत्तं तवेदं यथा
त्यादेयं॥ इत्यानस्मात् प्रतिरुप्येक्षत्र राङ्कप्रतिवाद नाशकेः॥ सामान्येन तत्त्वशास्त्रगाद्धिसानो
पायमायमार॥ शासौ सौमा दौरुक्लेममष्टेहासमुवागोद्व्याणां कुशलानां दृव्यवद्धिक्षयाभिसा
देशं कालमुपभोगं तथा नष्टद्रव्यस्यवेला वत्तेसारासारतां च परीक्ष यत्क्वचनमपति॥ तदृसे
शायं शिल्पिनो दृष्टः॥ इति क्रीतानुशयनप्रकरणं॥ सोपुरं अभ्युपेत्याशुश्रूषां त्वं मभि
रं विवादपमाभिविधाठमुपक्रमेत्तत्तत्त्वरूपं नारदे नोक्तं॥ ठभ्युपेत्य न शुश्रूषां य
स्तां न प्रतिपद्यते॥ तादृवादपदं भिभ्युपेत्याशुश्रूषाख्यं॥ शुश्रूषकस्तत्त्वपंचप्रकार
शिष्यान्तेवासिभृतकौधिकर्मकृद्दास इति॥ तेषां माद्याश्चत्वारः कर्मकरा इत्युच्यन्ते
ते च शुभकारिणः॥ दासाः पुनर्गृहजातादयः पंचदशविधः शास्त्रोक्तस्योम नीषिभिः॥ चतुर्वि
धाः कर्मकाराः॥ तेषां दाशाश्च पंचकाः शिष्यान्तेवासिभृतकर्मकारिणस्तात्शिष्यस्तथा
त्वाधिकर्मीकृत्य॥ एतो कर्मकरास्तेषां दासास्तु गृहजातादयः सामान्यमस्वतंत्रत्वमेषा

मा दुर्मनाबिणः॥ जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च॥ कर्मापि द्विविधं ज्ञेयमशुभं शु
भमेव च॥ अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतं॥ गृहद्वाराशुचिस्थानमथ्यानन्तः॥ अशुभं
कर्म विज्ञेयं शुभमन्यदतः परमिति॥ तत्र शिष्यो वेदविद्यार्थी मूल्येन यः कर्म करोति स भृ
तकः॥ कर्म कुर्वतामधिष्ठाता॥ अधिकर्मकृत्॥ अशुचिस्थानं उच्छिष्टप्रक्षेपार्थं गर्तादिकं
अवाल्करो गृहमार्जितं वा वोद्वितिन्तवपस्थानं॥ उजत्तनेत्यागः भृतकश्चात्र त्रिविधः तदुक्तं
उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः॥ अधमो भारवाहः स्यादित्येवं त्रिविधो भृतः इति दासाः
पुनर्गृहजस्तथा क्रीतो लब्धो दायादुपागतः॥ दोलभ्रतस्तद्वदाहितः स्वामिना वपुः मोक्षि
तो महतश्चर्णाद्दु प्राप्तप्रत्यागतः॥ तवाहमित्युपगतः प्रव्रज्यावसितः कृतः॥ एकदासश्च विशेयपत्त
धे वडवया वडवाहृतः॥ विक्रेता चात्मनः शास्त्रे दासाः पंचदश स्मृताः॥ गृहे दास्यां जातो गृहजा
तः॥ क्रीतो मूल्येन लब्धः प्रतिग्रहादिना॥ दायादुपागतः पित्रादिदासः॥ अनाकालभृतो
दुर्भिक्षे यो दासत्वाय मरणाद्रक्षितः॥ आहितः स्वामिना धनग्रहणेनाधितो नाम॥ ऋणमो

यनेन दासत्वमभ्युपागतस्तेन दासः । युद्धप्राप्तः समरे विजित्य गृहीतः पणे जितः यथा
ऽहमस्मिन् विवादे पराजितो ऽहं तदा त्वदासो भवामीति परिभाष्य जितः । विवाहहमित्युपाग
तः तवाहं दास इति स्वयं संप्रतिपन्नः । प्रव्रज्यावसितः कृतः एतावत्कालं दास इत्यभ्युपग
तमितः भक्तदासः सर्वकालं भक्तार्थमेव दासत्वमभ्युपगम्य प्रविष्टः । वडवाहृतः दासी
तया हृतस्तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः यः आत्मानं विक्रीणीते । आत्मविक्रेत्येवं पंचद
शप्रकाराः । स्वयं कृतो भक्तदासो गृहजः । कृतदत्रिमोपेत्यकोदं इ दासत्वसंपेते दासयोनयः इ
ति स्वविधत्वमुक्तं । तेषां सत्त्वप्रतिपादनार्थं न तु परिसंख्यार्थं तत्रैषां । शिष्यान्तेवासिभृतकाधि
कर्म्मकृद्दासानां मध्ये शिष्यवृत्तिः प्रागेव प्रतिपादिता । आह तत्र वाप्यधीत लब्ध्वा वास्मै निवेदि
दयेत्यादिना । अधिकर्म्मकभृतकानां तु वेतनादानप्रकारे वक्ष्यते । योपावकुतते कर्म्म
तावत्तस्य तु वेतनामित्यादिना वासां तेवासितोस्तु धर्मविशेषं वक्तुमाह । येनाद्दलात्कुष्टे
मेनयो दासीकृतः परस्मै रस्यकस्य विक्रीतः । चौरापहृतविक्रीता येच दासीकृतवतोर् राजा

नाः प्राहितोयश्चेद्दत्वाधनिनोत्वाधनिनोतमर्णाश्रितः तस्यानिःक्रियतासाउदुकस्यप्रत्यर्पणमुच्यते नारदेनाविशेषोपुक्तः अनाकाल
तो दास्यान्मुच्यते गोयुगं दद्दर्शातेलक्षितं वदुर्भिक्षेन मुतद्धुच्येत कर्म्मणाव्यक्तः स्वोक्षेवणात्सयोगकदाभमन्नः स्तुमुच्यते आहितोऽपि
धनं दत्वा तु ६

१८३५

मोचयिष्यामि दास्यं ते बुद्धिर्न्नेष्यते इति ॥ चौर्याद्युद्धवत्त्वस्य स्वामिनः प्राणान् यः प्रदसिरक्षत्य
सावपि मोचनीयः ॥ तदिदं सर्वदासानां सर्वरणं दास्यानिराकरणं ॥ यो वैषां स्वामिनं कश्चिन्मोक्ष
येत् प्राणसंशयात् ॥ दासत्वात् स विमुच्येत पुत्रभागं लभेत चेति नारदस्मरणात् ॥ भक्तदा
सादीनां प्रातिस्विकर्मापि मोक्षकारणमुच्यते ॥ अनाकालभृतो भक्तदासभुक्तस्य त्यागाद्दास
भक्तस्य त्यागाद्दासभावात् तस्य स्वामिदत्तं यावदुपभुक्तं तावद्दत्वा मुच्यते ॥ आहितरणे दो
निवृत्तिः ॥ ऋणान् यद्गृहीत्वात्तामौँ पद्येन मुद्धरेत् ॥ ऋणानुशोदपं दत्वा ऋणी दास्यात् प्रमु
च्यते इति ॥ तवाहमित्यभ्युपगतयुद्धप्राप्तपणजितकृतकं वडवाहृतानां च प्रातिस्वि
कं मोचनकारणं तेनैवोक्तं ॥ तवाहमित्युपगतो युद्धप्राप्तः पणेजितः ॥ प्रतिशीर्षप्रदानेन
मुच्येरंस्तुल्यकर्म्मणा ॥ कृतकालाभ्युपगमात् कृतकोपि विमुच्यते ॥ निग्रहात् वडवाया
स्तु मुच्यते वडवाहृत इति ॥ दासेन सह संभोगान्निरोधोदित्यर्थः ॥ तदेवं गृहजातक्रीतल
धदायप्राप्तानां विक्रियणे ॥ स्वामिप्राणदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेण मो

१३५

क्षो नास्ति । विशेषकारणानभिधानात् । दासमोक्षश्चानेन क्रमेण कर्त्तव्यः स्वं दासमिच्छेद्यः कर्तु
मदासं प्रीतिमानसः । स्कंधादादाय तस्यासौ भिंद्यात्कुंभं सहांभसा । साक्षताभिः सपुष्पाभिर्मूर्द्धन्यद्भिरवा
कीरत् । अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमथोत्सृजेदिति । तेनैवोक्तं । प्रव्रज्यावसितस्य तु मो
क्षो नास्तीत्याह । प्रव्रज्यासंन्यासिनः प्रच्युतः अतः अपक्रांतप्रायश्चित्तत्वे राज्ञ एव दासो
भवति । मरणमेव तद्दासत्वस्यान्तो नान्यथा प्रतिमोक्षमोक्षोस्ति । वर्णापेक्षया दास्यव्यवस्था
माह । ब्राह्मणादीनां वर्णानामानुलोम्येन दास्यं ब्राह्मणस्य क्षत्रियादयः । क्षत्रियस्य वैश्य
शूद्रा इत्येवमानुलोम्येन दासभावो भवति । न प्रातिलोम्येन स्वधर्मत्यागिनः पुनः परिव्राजक
प्रातिलोम्येनापि दासत्वमिष्यत एवेत्याह नारदः । वर्णानां प्रातिलोम्येन दासत्वं न विधी
यते । स्वधर्मत्यागिनोन्यत्र दारवत्तु दासता इति । अंतेवासिधर्ममाह । अंतेवासी गुरो
र्गृहे कृतकालं वर्षचतुष्टयं आयुर्वेदादिशिल्पशिक्षार्थं त्वद्गृहे वसामीति यावदंगीकृतं
कालं वसेद्यद्यपि वर्षचतुष्टयादर्वागेव तद्विद्याप्रेक्षेमारोल्पविषयः । कथं निवसेत् । गु

रुप्राप्तभोजनः॥ गुरोः सकाशात्प्राप्तभोजनं येन स तथोक्तः भक्तफलप्रदः॥ तस्याः शिल्पस्य फल
माचार्योऽपहरत्वातीति तत्फलप्रदः॥ एवंभूतो वसेत् नारदेन विशेषोऽत्र दर्शितः॥ स्वशि
ल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया॥ आचार्यस्य वसेदंते कृत्वा कालं विनिश्चितं॥ आ
चार्यः शिक्षयेदेनं स्वगृहे दत्तभोजनं॥ न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत्॥ शिक्ष
यमसंदुष्टं यश्चाचार्यः परित्यजेत्॥ बलाद्वासयितव्यः स्याद्वधबंधौ च सोऽर्हति॥ शिक्षितो
ऽपि कृतं कालमंतेवासी समापुयात्॥ तत्र कर्म च यत्कुर्यात्तदाचार्यस्यैव तत्फलं॥ गृही
त शिल्पं समयं कृत्वाचार्यं प्रदक्षिणं॥ शिक्षतश्चानुमान्यैनमंतेवासी निवर्तत इति॥ [?]
व धशारोऽत्र नाडतार्थः॥ दासात्पत्वाल्प संप्रतिसंपद्यातिक्रमः॥ कथ्यतो मस्य च लक्षणं
नारदेन व्यतिरेकैमुखेन दर्शितं॥ पाखंडनेगमादीनां स्थितिः समयः स्यानपाकर्माऽत्राहि
वादपदं स्मृतमिति॥ पारिभाषिकधर्मेण व्यवस्थानं समयस्तस्यानपाकर्म अव्यति
क्रमः परिपालनं॥ न व्यतिक्रमप्रमाणं व्यवहारपदं भवतीत्यर्थः॥ तदुपक्रमार्थं किं

१३६

चिदाह । राजा स्वपुरे दुर्गे देशस्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणानुपस्थापयित्वा
तद्ब्राह्मणजातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद्भूहिरण्यादिसंपन्नं च कृत्वा स्वधर्म्मो व
र्णाश्रमनिमित्तश्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान्ब्राह्मणान्ब्रूयात् ॥ ४ ॥ ए
वं नियुक्तैस्तैर्यत्कर्त्तव्यं तदाह । श्रौतस्मार्त्तवर्णानुपमर्द्देन समयानिष्पन्नो यो धर्म्मो गोप्रचा
रोदकरक्षणदेवगृहपालनादिरूपः सोऽपि यत्नेन पालनीयः । तथा राजा च निजधर्म्माविरोधे
नैव यः सामयिको धर्म्मो यावत्पथिकं भोजनं देयमस्मद्देशात्तिमंडले तुरंगादयो न प्रस्था
पनीया इत्येवरूपः सोऽपि रक्षणीयः ॥ ७ ॥ एवं समयधर्म्मः पालनीय इत्युक्त्वा तद्व्य
तिक्रमाद्दोषं दंडमाह । यः पुनर्गणस्य ग्रामादिजनसमूहस्य संबंधि साधारणं द्रव्यमपहरति
संवित्समयं तत्समूहकृतं राज्ञा कृतं वा यो लंघयेदतिक्रामेत्तद्दीयं च सर्व्वधनमपहृत्य स्व
राष्ट्रात्प्रवासयेन्निष्कासयेत् । अयं च दंडोऽनुबंधाद्यतिशयेन द्रष्टव्यः । अनुबंधाल्पत्वे
तु यो ग्रामदेशसंघानां कृत्वा सत्येन संविदं । विसंविदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत् ॥

निगृह्य दापयेदेनं समयव्यभिचारिणं । चतुः सुवर्णान् षण्निष्कान् शतमानं च राजतमिति मनुवु
त्तिपादितदंडोतो निर्वासनं च चतुः सुवर्णनिष्कशतमानानां चतुर्णां मन्यतमो जातिशक्त्य
द्यपेक्षया कल्पनीयः ॥ ७ इदं चैतैः कर्तव्यमित्याह गणिनां मध्ये समूहहितवादिनः शीला
त्तद्वचनाभिनिरस्तु सरणीयो ॥ ७ अन्यथा दंड इत्याह यस्तु गणानां मध्ये समूहकार्यनि
वृत्त्यर्थं स्वपार्श्वप्राप्तान् गणिनो निवर्तितान्नी स्वप्रयोजनात् दानमानसत्कारैः स्वयमप
रितोष्यत्तन्निवर्जयेत् ॥ ७ समूहदत्तापहारिणं प्रत्याह समूहकार्यार्थं महाजनो प्रेरितो रा
जपार्श्वे यद्वस्तु हिरण्यादिकं लभेत तद् प्रार्थितस्व महाजनेभ्यो निवेदयेत् अन्यथा लब्धा
देकादशगुणं दंडदापनीयः ॥ ७ एवं प्रकाराश्च कार्यचिंतकाः कार्या इत्याह श्रौत
स्मार्तधर्मज्ञा बाह्याभ्यंतरशौचयुक्ता अर्थलुब्धाः कार्यविचारकाः कर्तव्याः तेषां च न
मिश्लैरैः कार्यमित्येतदादरार्थं पुनर्वचनं ॥ ७ इदानीं त्रैविद्यानां प्रतिपादितं धर्मं श्रेण्या
दिष्वतिदिशन्नाह एकपायशिल्पोपजीविनः श्रेणयः नैगमाः यवेदस्याप्तप्रा

तत्त्वेन प्रामाण्यमिच्छन्ति पशुपतादयः। पाषंडीनो ये चेदास्य प्रामाण्यमेव नेच्छन्ति। नग्ना
श्वकसौगतादयः। गणेशादेः प्राप्तुधापारी नामेककर्म्मोपजीविनो। एषां चतुर्विधाना
मप्ययमेव विधिर्यो निजधर्म्माविरोधनेत्यादिनो प्रतिपादितः। एतेषां च श्रेण्यादीनां भे
दं वर्म्मो व्यवस्यात्स्य यो ऽस्ते तत्त्वरूपं नारदेनोक्तं। भस्यानां चेतनमस्योक्तो दानादानविधिः क्र
मः चेतनस्यानयाकर्म तद्विवादपदं स्मृतिमिति। प्रस्यार्थः समरणं चेतनस्य वक्ष्यमाणेष्वो
केषु क्तो दानादानविक्रमोयत्तद्विवादपदं तदुद्देन तच्यानयाकर्म्मेषु स्युतो तत्र निर्णा
र्णयमाह। गृहीतं चेतनं येन प्रसौष्यांगीकृतं त्यत तत्कुर्वन्। द्विगुणमृतिस्वामिने दद्या
त्। यदापुनरभ्युपगतं कर्म्म ग्रगृहीते एव चेतनेत्यजति तदा समं द्याप्व देतत्तप्राभ्युपगते
तावदाप्पोन द्विगुणं यद्दांगीकृतो भृतिं दत्वा बलात्कारयितव्यः कर्मोकुर्वन्प्रति
भृत्यकार्यो स्वामृतिं बलादिति नारदवचनात्य भृतिरपितेनैवोक्त। भस्याय चेतनस्था
कर्माख्यासायपाकृत्वेमं प्राय मध्येवसानेवाकर्मणे पादिनिर्दिष्टमिति। तेष्वभृत्ये

उपस्कर उपकरणं लांगलादीनां प्रग्रहमोक्षादिकं यथाशास्त्रं स्वामिरक्षणीयमितरथा कृष्या
दिनिष्पत्त्यनुपपत्ते ॥ ७ ॥ भृतिमारिमच्छिद्धियः ॥ अनाज्ञप्तकारिणं प्रत्याह । यस्त्विभृत्यः
यथोचितं विक्रियाद्युचितं देशे काले च यथोचितं विक्रियादि अकुर्वन् दर्पादिनोपेक्षयेत् । त
स्मिन्नेवावादेशे काले च लाभं अन्यथा यथाघतिशायसाध्यतया हीनं करोति । तस्मि
न् भृतके भृति हानं प्रति स्वामि नरच्छन्दो इच्छाभवेयावदिच्छति तावद्दद्यान्नपुनः सर्व
मेव भृतिमित्यर्थः । अदेशे पुनर्देशकालाभिसन्तयाधिको लाभः कृतस्तदा पूर्वपरिच्छि
ताया भृतेरधिकमपिधनं स्वामिनाभृत्याय दातव्यं । अनेकसाध्यकर्मणि भृति
दानप्रकारमाह । यदा पुनरेकमेव कर्मानियतवेतनभृत्याभ्यां क्रियामाणं उभयोरस्य
साध्यं वेदाभ्यामपि भवादृशाभ्यां । अपि शादाद्दुहितै रायियाति नपरेष्वैयार्थयितं तदा
धौ भृत्यौ यावत्कर्म करोति । तस्मै तत्कृत कर्मानुसारेण मध्यस्थकल्पितं वेतनं देयं
नेपुनः समं वन चावयवः कर्मणः । वेतनस्यापरिभाषितत्वाद्दान मित्ति मेतव्यो

सध्येतदुभाभ्यां कर्माणि निर्वर्त्तते ॥ यथा श्रुतं यावत् उभाभ्यां देयं ॥ न पुनः प्रत्येकं कृत्स्न
चेतनेनापि कर्म्मानुरूपं परिकल्प्यादेयं ॥ ऽप्रातुधायभारवाहकौ प्रत्याह ॥ न विधेसे राजदैवि
के ॥ यस्य मांडव्यसनमागच्छेद्यदि वा कदाचित् ॥ दायो यत्तत्रनस्येत्तु दैवराकृता हृतद्वितियः पुन
र्विवाहाद्यर्थमेगत्वं वर्तिवासरे प्रतितिष्ठमानस्य तत्प्रस्थानौपयिककर्म्मप्रासंगांगीकृत्य तदानी
मकरिष्यामीति प्रस्थानविघ्नमाचरति ॥ तदा सो द्विगुणं भृतिं दाप्यः ग्रंस्यतोत्कर्षहेतुक
कर्म्मनिरोधात् ॥ किंच प्रक्रांते ध्यवसिते प्रस्थाने विघ्नं कृत्वा गीकृतं कर्म्म यजात्यजत्यसौ भृ
तिसप्तमं नागे दाप्यः ॥ न तत्ते वा विषये प्रस्थानविघ्नकृदित्यादिना द्विगुणभृतिदानमुक्तम
दानीं सप्तयो भाद्विरोधः उच्यते ॥ भृत्यान्तरोपादानावसरसंभवे त्वांगीकृतं कर्मयस्त्यजति
तस्य सप्तमो भागः ॥ यस्तु प्रस्थानलग्नसमय एव त्यजति ॥ तस्य द्विगुणभृतिदानभृत्यवरो
धः ॥ यः पुनः पथि क्रांतेगमने वर्त्तमाने सति क्रम्यत्यजति ॥ स भृत्यजति समभृत्यस्तु चतुर्थभाग
दाप्यः ॥ ऽप्रर्धे पथे पुनः सर्वो दापनीयः ॥ यस्तु त्याजकः ॥ कर्म्मात्यजंतं त्याजयति स्वामी पूर्वो

क्तप्रदेशेषु वसाधिपूर्वोक्तसप्तमभागादिकं मत्स्योपदानीयः ॥ एतच्चाव्याधितविषयं ॥ म
त्यो नार्त्तो न कुर्याद्योदर्ष्याक्तकर्म्मपयादिति ॥ सदेशः कृतमूल्यानष्टौ न देयं तत्तस्य चेतनमिति
यदा पुनर्व्याधितो वागतस्तेन तदिवसानवरिगण्य पूरयति ॥ तदा तन्मूल्यं तत एव चेतनं प्रा
र्त्तस्तु कुर्य्याद्वाथ ॥ अन्यथा भाषितमादिनः ॥ सुदीर्घस्यापि कालस्य स्वेतनमेतत्तैव चैतामिति
मनुस्मरणान् ॥ यस्त्वयमगव्याधिः स्वस्थ एवालस्यादिना स्वारब्धं कर्म्म प्रत्यो नैन करो
ति ॥ परेण वा न समापयति तस्मै चेतनं न देयमिति ॥ यथाह मनुः ॥ यथोक्तमार्गः स्वस्थो वाय
तत्कर्म न कारयेत् ॥ न च तस्य चेतनं देयं मत्स्यानस्यापि कर्म्मयुम्यते ॥ इति चेतनदानादानप्रकर
णं ॥ अधुना द्यूतसमाह्वयाख्यं विवादमाक्रियते ॥ तत्स्वरूपं च नारदेनाभिहितं ॥ अधुना द्यू
तसमाह्वयो ख्यं ॥ अक्षाः पाशकाश्वर्णो दावाका क्रीडा अन्यर्म्मपादिकादेश्वलाकादन्तादिम
यो दार्वि चतुरस्राः ॥ अप्राण्यग्रहणाच्च तुरंगादिक्रीडासाधनं कर्तृणा रथ्यादिकं ग्राह्यं तेन रा
णिभिर्यद्देवन क्रीडायां पणपूर्विका क्रियते ॥ तद्रूपं यथाक्रमेण द्यूतसमाह्वयाख्यं विवाद

पदं द्यूतं च समाह्वयं चाप्रद्यूतं समाह्वयं तत्कं मनुना। अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते

प्राणिभिः क्रियमाणस्तु स विज्ञेयः समाह्वय इति॥ तत्र द्यूतसभाधिकारिणो वृत्तिमाह पर

स्परसंप्रतिपत्त्या कितवपरिकल्पितः पणो ग्लह उच्यते। तत्र ग्लहे ये शतिका

शतपरिमिता तदधिकपरिमाणा वा वृद्धिर्यस्यासौ शतिकवृद्धिः॥ तस्माद्धूर्तात्कितवात्स्वयंचक

शतमात्मवृत्त्यर्थं सभिको गृह्णीयात् पंचपणाः प्रायो यस्मिन्॥ शतं तत्पंचकं शतं॥ तद

स्मिन्वृद्ध्यायत्तामेत्यादितात्कन्॥ जितग्लहस्य विंशतितमं भागं गृह्णीयादितियावत्॥

सभाकितवनिवासार्थं यस्यास्ति सो सभिकः॥ कल्पितानक्षादीन् निष्ठीवनक्रीडोपकरणस्तु

दुयचितद्व्यायजीवी सभायामित्युच्यते॥ इतरस्मात्पुनरपि पूर्णशतिकवृद्धेः॥ कितवा

द्दशकं शतं जितद्रव्यस्य दशमं भागं गृह्णीयादियावत्॥ एवं क्लृप्तवृत्तिना सभिकेन किं

कर्तव्यमित्याह॥ स प्रसिद्धप्रच्छन्नेयजाध्यक्षसमन्वितेन सभिकसहितेः कितवसमासहि

केनवस्यजाभागेद्दत्ते राजा धूर्तो कितवप्रतिपन्नं जितपणं दापयेत्॥ अन्यथा प्रच्छन्ने

साभिकस्यहिते द्रव्ये राजभागे च कृते जितं पणं जेत्रे ग्राहयेत्॥ जयपराजयविप्रतिपत्तौ नि
र्णयोपायमाह॥ द्यूतं व्यवहारिणो द्रष्टारः॥ सभ्यास्त एव कितवा एव साक्षिणो नियोक्तव्याः न
तत्र श्रुताध्ययनसंपन्ना इत्यादिनियमोस्ति॥ साक्षिणश्च द्यूते द्यूतएव कार्याः॥ न तत्र स्त्रीबाल
वृद्धं कितवेत्यादिनिषेधोस्ति॥ कचिद्गुणो बुद्धो दंडः पूर्ववाक्ये पंचविंशते प्रकृतत्वात्तद
पेक्षया सार्धद्वादशपणात्मको द्रष्टव्यः॥ परभार्यास्तु पुनर्विशेषेण द्विगुणः॥ पंचविंशत्यपेक्षि
ये च पंचाशत्पणात्मको वेदितव्यः॥ तथोत्तमसाहसापेक्षयाधिकल्पितवत्स्वेषु दंडः॥ पंचाश
त्पणात्मक एव वर्णानां मूर्धावसिक्तादीनां च परस्पराक्षेपे दंडकल्पनामाह॥ वर्णा ब्राह्म
णादयः॥ जातयो मूर्धावसिक्तादयो वर्णाश्च जातयश्च वर्णजातयः॥ उत्तराश्चाधराश्च उत्तराधराः
वर्णजातयश्च ते उत्तराधराश्च वर्णजातयस्तु उत्तराधरैरिति विशेषे परस्परमाक्षेपे क्रियमाणे दंडस्य प्र
कर्षेण नयनं ह्रहणं वा वेदितव्य॥ तत्र दंडकल्पनं उत्तराधरैरिति विशेषोपादानादुत्तराधरभा
वापेक्षयैव॥ कर्त्तव्यमिति अवगम्यते॥ यथा मूर्द्धावसिक्तं ब्राह्मणाद्धीनं क्षत्रियादुत्कृष्टं वा

276

कुर्वन्ब्राह्मणः ॥ क्षत्रियाद्याक्षेपनिमित्तात्पंचाशत्पणदंडात्किंचिदधिकं पंचसप्तत्यात्मकं
दंडमर्हति ॥ क्षत्रियोपि तमाक्रुश्य ब्राह्मणाक्षेपनिमित्ताच्छतदंडाद्द्विहीनं पंचसप्ततिमेव
दंडमर्हतिमूर्द्धावसिक्तोपि तमाक्रुश्य तमेव दंडमर्हति ॥ मूर्द्धावसिक्ताम्बष्ठयोः परस्पराक्षे
पे ब्राह्मणक्षत्रिययोः ॥ परस्पराक्रोशनिमित्तकौ यथाक्रमेण दंडौ वेदितव्यौ ॥ एवमन्यत्राप्यूह
नीयं ॥ एवं सर्ववर्णविषये दंडमभिधाय ॥ वर्णानामेव प्रातिलोम्याक्षेपे दंडमाह ॥ अपवाद
अधिक्षेपाः प्रातिलोम्येनापवादाः ॥ प्रातिलोम्यापवादास्तेषु ब्राह्मणाक्रोशकारिणः ॥ क्षत्रियवै
श्ययोर्यथाक्रमेण पूर्ववाक्याद्द्विगुण पंचाशत्पणापेक्षया द्विगुणः ॥ शतपण
त्रिगुणः ॥ सार्द्धशतपणदंडो वेदितव्यः ॥ शूद्रस्य ब्राह्मणाक्रोशे ताडनं जिह्वाच्छेदनं वा यस्त्रिगुण
पक्षोपात्तपंचाशत्पणापेक्षया त्रिगुणः ॥ यथाह मनुः शतं ब्राह्मणमाक्रुश्य क्षत्रियो दंडमर्हति
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥ इति विट्शूद्रयोरपि क्षत्रियादनंतरैकांतर
योः स्वल्पान्यायपतनीयामर्द्धशतं च यथाक्रमेण क्षत्रियाक्रोशे वेदितव्यं ॥ शूद्रस्य च वैश्याक्रो

शेषात्। अनुलोम्येन तु वर्णानां क्षत्रविट्शूद्रविंशत्यर्द्धं त्रयोदशापणात्मके। यथाक्रमं ब्राह्मणो
दंडनीयः। तदुक्तं मनुना। पंचाशद्ब्राह्मणो दंड्यः क्षत्रियस्याभिसंशने वैश्ये स्यादर्द्धपंचाशच्छूद्रे द्वा
दशको दम इति। क्षत्रियेण वैश्यशूद्रे वाक्रुष्टे यथाक्रमं पंचाशत्पंचविंशतिकौ दमौ वैश्यस्य शू
द्राक्रोशे पंचाशदित्यूहनीयं ब्राह्मणराजन्यवत्। क्षत्रियवैश्ययोः रिति गौतमस्मरणात्। वि
ट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वदिति मनुस्मरणात्। पुनर्विष्णुनाक्षेपमधिकृत्याह। बा
ह्वादीनां प्रत्येकं विनाशे वाचके वाचा प्रतिपादिते तत्वाक्कुं छिन्नाद्यातिरेवं रूपे शत्यः श
तपरिमितो दंडो वेदितव्यः। पादनासादिषु आदिग्रहणात् स्फिगादिषु वाचिकेर्विना
शे तदिति दार्द्धिकः। तस्य शतस्यार्द्धं तदर्द्धस्यार्द्धोत्तदर्द्धं पंचाशत्पाणिको दंडो वेदितव्यः। किंच
पुनर्जरादिना क्षीणशक्तिस्तु वाङ्मात्रांगभंगकरो मादि दंडो तत्कालं तस्याशक्तस्य क्षेमाय
प्रतिभुवं दापनीयः। तीव्राक्रोशे दंडमाह। पातित्यहेतुभिर्ब्रह्महत्यादिभिर्वर्णेनामाक्षेपे
मध्यमस्साहसं दंड्यः। उपपातकसंबंधे पुनर्गोघ्नस्त्वमसीत्येवमादिरूपाक्षेपे प्रथमसाहं

संदंड्यः ॥ किंच ॥ त्रैविद्याः वेदत्रयसंपन्नास्तेषामन्योन्यावक्षेपे साहस्रो दंडः ॥ ये पुनर्ग्रामगण-
मुख्या वसिष्ठादीनां सामानां पूगाः संघास्तेषां आक्षेपे मध्यमसाहसं ग्रामदेशयोः प्रत्येकं क्षेपे
प्रथमसाहसो दंडो वेदितव्यः ॥ इति वाक्पारुष्याख्यविवादप्रकरणं ॥ दंडपारुष्यं कथ्यते
तत्स्वरूपं च नारदेनोक्तं ॥ परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः ॥ भस्मादिभिश्चोपघा-
तो दंडपारुष्यमुच्यते ॥ परगात्रेषु जंगमस्थावरात्मकद्रव्येषु हस्तपादायुधैः आदि-
ग्रहणाद्धूल्यादिभिर्यो अभिद्रोहो हिंसनं दुःखोत्पादनं तथा भस्मना आदिग्रहणाद्रजः ॥ पंकपु-
रीषादिभिरुपघातः स्पर्शनरूपं मनोदुःखोत्पादनं तदुभयं दंडपारुष्यं दंड्यते ॥ अनेनेति दं-
डो हि तस्मात्पारुष्यं विरूपाचरणं जंगमादिद्रव्यस्य तद्दंडपारुष्यं ॥ तस्य चावगूरणादि- दं
करणभेदेन त्रैविध्यमाह निधाय हीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात्तु तस्यैव त्रैविध्यं ते-
नैवोक्तं ॥ तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् ॥ अवगोरणनिःशंकपातनक्षत-
दर्शनैः ॥ हीनमध्योत्तमानां च द्रव्याणां समतिक्रमात् ॥ त्रीण्येव साहसान्याहुस्तत्र

कंटकशोधनमिति ॥ निःशंकं पातनं निःशंककरणं निःशंकप्रहरणं त्रीण्येव साहसानि त्रि
ण्येव महसाहसानि दंडपारुष्याणामन्यर्थः । तथा को दंडपारुष्ययोरदृष्टयोः । प्रवृत्तकलहयोः
मिथ्येयः क्षमतेन केवलं तस्य दंडभाव । किं तर्हि पूर्व एव । तथा पूर्वं कलहे प्रवृत्तस्य दंडगुरुस
मानयाश्वपश्चादिति । राज्ञो णमपराधे कृते सज्जनाएवा । दंडवधनाभिकारिणस्तेषाम
शकात्वेतान् । राजा पातयेत् । देवनार्थंमद्धा ादित्येवं पंच प्रकारा विधयस्तेनोक्ताः ६
विधिः पंचविधात्म कण्ठतयो नयोपरिपिपारुष्येऽसति सेरं माहुत्पत्ते कुद्धयोर्द्वयोः । सामान्यत्ते
यः क्षन्तमेदंडभाक्यो वर्तते । सर्वमाशास्त्ययेपत्तु नियतेस्यात्स्वदोषभाक् । पश्चाद्यः सोऽप्य
सत्कारात्पूर्वोऽभ्यधिकेवेतरः तु विनयो गन्नुदृयोराप न्नयोस्तत्स्यमनुवध्नान्नियः । पुनः स
नयोर्दंडमवाप्नोति पूर्वो वा यदि वेतरः । पारुष्ययोः प्रवृत्तयोः युगपत्संप्रवृत्तयोः । वि
शेषश्चेन्न लक्ष्यते विनयः स्यात्समस्तयोः । श्वपाकपंडचंडाल व्यंगेषु वधवृत्तिषु । हस्ति
प्रवात्यदासेषु गुर्वाचार्यनृपेषु च मर्यादातिक्रमे सद्यो घात एवानुशासनं । यमेन ह्यत्तिव

र्दैरनूनत्वेसत्वंजनेनरम्यु। सएवविनयकुर्य्यान्नतत्त्वविनयभाग्नरः। मत्ताद्युक्तेमनुष्या
णांधनमेषामत्तात्मकं॥ अत्रवृत्तानुघातयेद्रासानार्थदंडेमहंइयेदिति एवंमृत्तदंड
मानुष्यानिर्णयपूर्वकत्वाद्दंडप्रणयस्यतत्स्वरूपसंदेहेनिर्णयहेतुमाह। यथाकश्चिद्दहस्येहम
नेनाहतइतिराज्ञेनिवेदयति। तदाचिह्नैर्व्रणादिभिर्युक्तिरिग्वानरादिरूपगतैर्लिंगैर्युक्ता
कारणप्रयोगजनपर्यालोचनात्मिकया। आगमेननयजनप्रवादेनवशपथाद्दिव्येन
वा। कूटभिन्नकृतसंभवानाभयात्परीक्षात्कार्या। एवंविश्वसनेसाधनविशेषमाह। समेष्टे
वंपरगोत्रेषुद्विगुणस्तमेषुच। हीनेष्वर्द्धदमोमोहमदादिभिरदंडनं। भस्मनपाकेनरेणुनावा
पु। परस्परसंसत्यसोदशपंणंदंड्यंदाप्यः। अमेध्यमितिस्तत्वेश्लेष्मनखकेशावर्णविड्दूषिषिकामु
कोच्छिष्टादिकंचगृहते। पार्ष्णिपादस्यपश्चिमोभागः। निष्ठ्यूतंमुखनिःसारितंजलंतैःस्पर्शनेद
वींदशपरादिद्विगुणन्। द्विगुणोविंशतिपणोदंडेवेदितव्यः। पुरीषादिस्पर्शनेपुमः कात्याय
तेनविशेषःउक्तः। छर्दिमूत्रपुरीषाद्यैरप्ययः। चतुर्गुणःषड्गुणःकायमध्येस्यान्मूर्ध्नित्वष्टगुणः

(281)

स्मृतइति ॥ अद्यमं दण्डं साहसं कुलाष्टकमजानोगतं हंतिरा एवभृतः पूर्वोक्तो दण्डः सवर्णविश
षये द्रष्टव्यः ॥ परभार्याभिगमनाविशेषेण तस्योत्तमसाहसविधिस्यापि यथाधिकस्य तत्र तेषु पूर्वोक्ताद्दशापण
वेदीतव्यः ॥ मोहाच्छित्रवैकल्यामश्रोमयपानमन्योऽवस्थाविशेषः ॥ आदिग्रहणादुद्दावेशादि
कं एतैर्युक्तेन भस्मादिस्पर्शितेनेक्षतेऽपि दंडो न कर्तव्यः ॥ प्रातिलोम्यापवादे दंडमाह ब्राह्मणो गंपी
डाकरमब्राह्मणस्य ॥ क्षत्रियादेर्योदगं करचरणादिकं तच्छेत्तव्यं ॥ अत्र वैश्ययोरपि पीडां कुर्वतः
शूद्रस्यांगच्छेदनेमबधोनके नचिदंडगेनाहिंस्यान् ॥ श्रियां समं न्य ढैतव्यं तत्तदेवास्य ततोनैरणुशा
सनमिति ॥ हिंसाहिमात्रस्यापराधे शूद्रस्यांगच्छेदविधानात् वैश्यस्यापि ॥ क्षत्रियापुकारिणो
यमेव दंडस्तस्यन्यायत्वात् ॥ उद्गीर्णे वधार्थमुद्यते शस्त्रादि प्रथमसाहसो वेदितव्यः ॥ शूद्र
स्य पुनस्तदुरणेऽपि हस्तादिच्छेदनेमेव ॥ पाणिमुद्यम्य दंडं वा पाणिच्छेदनमर्हतीति मनुस्मरणा
त् ॥ उद्गीरणार्थ शस्त्रादिस्पर्शनेनतु मदर्द्धिकः ॥ प्रथमसाहसार्द्धं दंडो वेदितव्यः ॥ भस्मा
दिसंस्पर्शे पुनः ॥ क्षत्रवैश्ययोः प्रतिलोम्यापवादेषु द्विगुण त्रिगुणदमा इति ॥ वाक्पारुष्ये

हेन्यायेनकल्प्यः ॥ शूद्रस्यतत्रापिहस्तच्छेदएव ॥ अवनिष्ठीवतोदर्पाद्द्वावोष्ठौछेदयेन्नृपः
अवमूत्रयतोमेढ्रमवशर्धयतोगुदमितिस्मृत्यंतरस्मरणात् ॥ एवंप्रतिलोम्यापराधेदंडमपराधि
दंडमभिधायपुनः समानजातिमधिकृत्याह ॥ हस्तेपादेचताडनार्थं उद्गूर्णे ममच्चे यथाक्रमं
दशपणोविंशतिपणश्चदंडोविदितव्यः ॥ परस्परंवधार्थंशस्त्रे उद्गूर्णे सर्वेषांवर्णानांमध्यमसा
हसोदंडः ॥ किंच ॥ पादकेशांशुककराणामन्यतमंगृहीत्वायोरुचि ~~पीडाध्यासेतस्मिन्समुत्क्षिप्ते~~
दंड्यः ॥ पीडाकर्षांशुकावेष्टपादाध्यासश्चेवापीडाकर्षीअंशुकावेष्टयाध्यासंतस्मिन्
(ते) समुद्धिपेद्दंड्यः ॥ एतत्तुक्रमंवक्ति ॥ अंशुकेनावेष्ट्यगाढमाध्यआकृष्ययः ॥ पादेनाघट्टयतितंशतंपणा
न्दमयेदिति ॥ किंचयःपुनः शोणितंविनानदृश्यतेमद्गुताडनंकाष्ठलोष्टादिभिः ॥ करोत्यसौद्वा
त्रिंशत्पणान्दंड्यः ॥ यदापुनर्गाढताडनेनलोहितंदृश्यतेतदाद्वात्रिंशतोद्विगुणंचतुःषष्टि
पणान्दंड्यः ॥ त्वङ्मांसास्थिभेदेननाविशेषमाह ॥ त्वग्भेदकः ॥ शतंदंड्योलोहितस्यच
दर्शकः ॥ मांसभेत्ताचषण्णिष्कान्प्रवास्यस्त्वस्थिभेदकइति ॥ करपाददंतस्यप्रत्येकंभंगेक

283

ष्ठौ नासासस्य च प्रत्येकं छेदकर्णौ रूढ व्रणस्योद्भेदनमन्त कल्प्यो यथा भवति तथा त्रिमध्यमसा
हसो विज्ञेयः ॥ अनुबंधादिना विपर्यस्यासाम्यमत्रापादनीयं ॥ किंच ॥ गमनभोजनभाषणनि
रोधं नेत्रस्य आदिपदग्रहणाज्जिह्वा घ्राणश्रोत्रादिभेदेन कंधरग्रीवा बाहु प्रसि ॥ सिव घ्न कृत्वः ते
षां प्रत्येकं भंजने मध्यमसाहसो दंडः ॥ प्रत्येकं वेदितव्यः ॥ प्रतिकूलत्वात्तेषां प्रतिलोम्यानु
लोम्यापरीधेय्येत्तस्यैव सवर्णविषये भिन्नस्य दंड आनत्य वाकानश्चाक्रमेण हानिं वृद्धिं च
कल्पयेत् ॥ वाक्पारुष्ये प्रोक्ताः प्रतिमनुलोमतः तस्य च दंडपारुष्येऽपि तोमहत्कार्यो ॥ यथा
मौसौत्रिमनुस्मरणान् ॥ कलहे वर्तमाने यद्येनापि हृतं तत्तेन प्रत्यर्पणीयं ॥ त्वचा हृतद्र● सा
न् द्विगुणत्वापहानिमित्तो दंडो देयः ॥ यो वस्य ताडनादुःखमुत्पादयेत्सतस्य व्रणरोपणादौ
वधार्थे च यो व्ययः ॥ क्रियते तं दद्यात् ॥ समुत्थामं व्रणरोपणं ॥ यस्मिन् कलहे यो दंडस्तं च दद्याद्धा
न समुत्थो व्ययः भगो व्ययमात्रं ॥ परगात्राभिद्रोहे दंडमुक्ता मुक्तानंतरं वाद्दिरंगोऽर्थे नशो दंडे
माह ॥ मुद्गरादिना कुड्यस्याभिघाते विदारणे द्वैधाकर ॥ णे च यथाक्रमं पंचपणो दशपणो विं

२

शान्तिपरणोऽणश्च दंडो वेदितव्यः । अवपातेनेत्युनः कुद्यस्थैतेन त्रयो दंडाः समुचिता याह्याः पुनः
कुर्यात्संपादाद्वा नार्थं बंधनं स्वामिने दद्यात् । अपेच परस्य हेतुः स्वजनं नंके टंकादि द्रव्यं प्रक्षिप
न् षोडषपणान्दंड्यः । प्राणहरं पुनर्विषभुजंगादिकं क्षिपन् मध्यमसाहसं दंड्यः । पश्वभि
द्रोहे दंडमाह । क्षुद्राणां पशूनां मजाविहरिणप्रायाणां ताडनेन दुःखोत्पादने सक्रूरावणो
णा स्वांगच्छेदने चात्र प्राणसंचाररहितं शृंगादिकं लक्ष्यते । प्रेणाक्षिकरचरणप्रमत्तीनि
शाखा चांगं शाखा चांगं तस्यच्छेदने द्वि [illegible] पणप्रभृतिर्दंडः द्वौ पणौ यस्य स दंडः स द्विपणः द्वि
द्विपणप्रभृतिर्णि दर्पस्य दंडग[illegible]णस्यासौ द्विपणः प्रभृतिः स च दंड [illegible] लिंगणा द्विपणाः ।
चतुष्पणः षट्पणोऽष्टपण इत्येवं रूपो न पुनर्द्विपणाद्विपणाश्चतुः पणः पंचपण इति कथ
मितिदुच्यते । अपाधगुरुत्वाच प्रथमे दंडान् गुरुतरमुपरितनं दंडं त्रितयमवगम्यते त
त्र चाष्ट तत्रित्वादि संख्यायाणवाभ्यासाश्चपरो न गुरुत्व संपादनमिति निश्चयं । किंच ।
तेषां महत्पशूनां [illegible]ितगच्छेदे नमरणे मध्यमसाहसो दंडः । स्वामिने च मूल्यं दद्यात् । स

हृपञ्चनांपुनर्गोगानघजिप्रभृतीनां महत्सु स्थानेषु ताडनलोहितश्चावरणादिभामितेषु । पूर्वो
क्ताद्दंडाद्विगुणो दंडो वेदितव्यः ॥ स्थावरान्निर्दिशन्हेदंडमाह । प्ररोहि प्रंकुरास्तद्वन्त्यः शाखा प्ररो
हिण्यो यासां ॥ छिन्ना पुनरुद्गताः प्रतिकांडं गृहे इति । ताः शाखा येषां डाहीनाते प्ररोहिणो हिशा
खिनस्तेषां सा वीछेदनेयन्तो मूलं न शाखा निर्गच्छति स स्कंधः । नस्य छेदने समूलं वृक्षच्छेदने
न यथाक्रमे ॥ विंशतिपरम्दंडो हास्य पूर्वस्मात्सर्वस्मादुत्तरो तारो दंडो द्विगुणगुण एत्तदुक्तं भव
ति । विशतिपरणश्चत्वारिंशत्परणोतिपरण इत्यत्र यो हस्वो दंडाय प्राक्रमं शाखो छेदनादिषु प
राधेषु भवतीति ॥ अप्ररोहिष्वनामेषूपजीव्यद्रव्याणां आम्रादीनां पूर्वोक्तेषु स्थानेषु पूर्वो
क्ताद्दंडा ॥ अनुपजीव्यप्ररोहिशाखिषु यहतेषु कल्पवृक्षविशेषं प्रत्याह । चैत्यादिषु जा
तीनां वृक्षाणां शाखाछेदनादिषु पूर्वोक्ताद्दंडाः सद्विगुणाः ॥ विश्रुते च पिप्पलपत्राशाद्विके
द्विगुणे दंड ॥ गुल्मादीनप्रत्याह । गुल्माः प्रतिदीर्घनिविडा ॥ मालत्यादयः गुच्छा ॥ अवहनी
रूपाः अप्रसरास्मसाया ॥ कुरंटकादयः ~~[illegible]~~ क्षुयाकरवीरादयः ॥ सरलप्रायाल्लताडी

व

२४५

288

र्थ्यपाधिनो द्राक्षातिमुक्तप्रभृतयः प्रतानी कीटप्ररोहरहिताः सरलवायिन्यः [struck out]
सारिवाप्रभृतयः ओषधयः फलपाकावसाना शालिप्रभृतयः विरुधः छिन्नाऽपि या
विविधप्ररोहन्ती गुडूचीप्रभृतयः एतेषां पूर्वोक्तेषु स्थानेषु विकर्त्तने छेदने पूर्वोक्ता दंडा
दंड्या वेदितव्याः इति दंडपारुष्यप्रकरणं संप्रति साहसं नाम विवादपदं व्याख्या
ख्यासुरक्ते तल्लक्षणं तावदाह सामान्यस्य साधारणस्य यथेष्टविनियोगानर्हत्वात् ऽ
विशेषणपरकीयस्य वा द्रव्यस्य धर्मस्यापहरणं साहसं कृतः प्रसभहरणं तु प्रस
ह्यहरणं छन्नापहरणेन हरणादि नियायपरतासिद्धं वलं सा आक्रोशं बोध्यं घ्यारा रजपुरुषे
तरजनसमक्षं यत्किंचित्मारणपरदारधर्षणादिकं क्रियते तत्सर्वं साहसमिति साहस
लक्षणं अतः साधारणपरधनयोर्हरणस्यापि बलात् दृष्टं मेन क्रियते [struck out] मारणत्वात्
साहसत्वमिति नारदेनापि साहसस्य निरूपाविवरणे अतः साधारणपरधनयोः सहसा क्रि
यते कर्म यत्किंचिद्बलदर्पितैः तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते इति ना

।दिरं साहसं स्तेयोऽथ वा रदंडपारुष्यस्त्रीसंग्रहणेषु व्यासक्रमपि वत्तन्दर्शो वहं सौ या धितोभि
धीतद्द इति दंडा । तिरेकार्यैपर[illegible]स्त्री ग विधानं तस्य वदं वैचित्र्यप्रतिपादनार्थं प्रथमादिभेदे
नत्रैवाध्यमामयाय तत्तं दृष्ट्वा क्षणे तेनैव विवृतं तस्य नास्ति विधं त्रेधं प्रथमं मध्यमं तथोत्त
तमं वेत्ति शास्त्रेषु तयोर्लक्षं लक्षणं पृथक् । फलमूलोफलोदकादीनां क्षेत्रेपकरणा
च । भंगाक्षेपोपमर्द्दाद्यैः प्रथमं साहसं स्मृतं नाम ॥ पश्चात्रपानानां गृहोपकरणस्य वा । एते
नैव प्रकारेण मध्यमं साहसं स्मृतं । व्यापादो विषशस्त्राद्यैः परदाराभिमर्षणं प्राणोपरोधि
यच्चान्यदुक्तमसौ साहसं । तस्य दंडाः क्रियापेक्षः प्रथमस्यावरं शतं वरा मध्यमस्य तु शास्त्रे
दृष्टयं च शतावरः । उत्तमे साहसे दंडः सहस्रावरः वधः । सर्वस्वहरणं पुरान्निर्वास
नांकने । तदंगछेद इत्युक्तो दंड उत्तमसाहसे इति वधादयश्चापराधानारतम्यात् उत्तम
साहसे समभ्याव्यस्थायोग्याः ॥ तत्र परद्रव्यापहारस्वरूपे साहसे दंडमाह तस्यापहर्तद्रव्यस्य मू
ल्यात् द्विगुणो दंडः । साहसं कृत्वा नामहं तत्कार्यमिति निह्नुते तस्य मूल्यद्विगुणो दंडो भव

१४६

तथासंदिष्टस्यातियत्तिशूतस्यार्थस्यादाता ॥ पंचमुद्रितंग्रहंमुद्घाटयति ५

ति ॥ एतस्मादेव विशेषे ॥ दंडमाह पिधानात्स्वगंयमसाहिसामान्यदंडविधानंरपहार
इत्यावतिरिक्तविषयंगम्यते ॥ साहसिकस्यप्रयोजितारंप्रत्याह ॥ यःसिंहेकुर्वीत्येवेवाचै
वकारयत्ससौसाहसिकंदंडात् ॥ द्विगुणंदाप्यायुः ॥ पुनरहंतुभ्यंधनंदास्येत्वंकुर्वित्येव
मुक्त्वासाहसंकारयतिसचतुर्गुणंदंडंदाप्यः ॥ अवधातिशापातसाहसीकविशेषंप्रत्याह
आर्यस्याहस्याचार्यादेराक्षेपमाक्रोशःक्रमेचयः ॥ करोतियश्चभ्रातुर्भार्यांताडयति तथा
स्वरंगृहक्षेत्रादिसंसक्तक्षेत्रस्वामिनांकुलिकानांस्वकुलोद्भवानां ॥ आदिग्रहणात्स्वग्रा
मस्वदेशवासिनांचयोपकर्त्ताते सर्वेपंचाशत्पणपरिमितेनदंडेनदंडनीयः ॥ किंच सर्वेपंचा
शत्पणपरिमितेनदंडनीयाः ॥ किंच ॥ नियोगेविनापिस्वेच्छयाविधवांगच्छतियोयादिनया
कुलैकदेयः ॥ शक्तोपिनानिधावपियश्चक्षाक्रोशंकरोतियश्चांडालोब्राह्मणादीनस्य
शतियश्चशूद्रप्रव्रजितादीन्दैवेपित्र्येचकर्मणिभोजयतियश्चायुक्तंमातरंग
हीब्राह्मणमितिशपथंकरोतियः ॥ अयोग्यएवशूद्रादिर्योगकर्माध्ययनादिकरोतियश्चबो

वलीवर्द्दः। मृद्गोपशाखासादय॥ तेषांयुक्त्वाप्यडजननशालकेविनाशक॥ वक्षम्पट्टपम्भनामि
तियावेद्दिबाधौषधप्रयोगेनवशीकरणेप्रलम्नयम्भनानांधानयितासाधारणद्रव्यस्यवंधकः।दा
सीगर्भस्वयाततपितापुत्रवपित्रादयोऽप्यत्यजनीयाःसंतः॥ अन्योन्यंयोऽन्यंतिसतेसर्वेप्रत्येकंपणशा
तदंडाहीभवति॥ इतिसाहसप्रकरणम्॥ साहसप्रसंगात्समहशीपराधेपुनेजकादीनांदंडमा
ह॥ निजकोवस्त्रस्यधावकः॥ सयदिनिर्णेजनार्थंसमर्पितानामिवासांसिहस्यमाच्छादयति तदा
सौपणत्रयंदंड्यः। यंपुनस्तानिविक्रीणाते॥ अवक्रयेवाकरोतिएतावत्कालमुपयोगार्थंवह्नं
दीयतेमह्यंचतस्माद्विरेतवद्दनदेयमितिएवंभारकंयोददाति आधित्वंवानयातित्वसुहृद्भ्यो
याचितंददाति॥ प्रत्येकंपणपराधेदशपणोदंडनीयः॥ तानिवस्त्राणिश्लक्ष्णशाल्मलिफलं
केक्षालनीयानिचवस्त्रस्यान्यदीयानिचवस्त्रगृहेवासपितव्यानतस्याद्देयः॥ शाल्मले
फलकेश्लक्ष्णेणेनिर्ण्याद्वासांसिनेजकः॥ नचवासांसिवासोभिर्हरेन्नचवासयेदितिम
नुस्मरणात्॥ यदापुनस्तानिप्रमादनाशयतितदानारदोक्तंदृष्टव्यंमूल्याष्टभागोही

यनलाक्षणच्छदोनस्यवासंसः द्विपादादित्रिनीयंपश्चानुद्दोर्तद्वैनेवच ॥ अर्द्धक्षयानुपरतः पारा
शायवधक्रमान् ॥ यावत्क्षीणद्दशंजीर्णस्याभिपमःक्षयरति ॥ अष्टपणक्रीतस्यसकृद्धौतस्यव
स्त्रस्यनाशितस्य अष्टमभागोनंसप्तमपरणं मूल्यं देयद्विधौतस्यरूपादेः ॥ एवंपणद्वयोजं त्रिधौत
स्य सकृत्पुनरस्तीः पादोनत्र्यंशन्यूनं चतुर्द्धौतं तस्यार्द्धं पादचतुष्टयंदेयं ॥ ततःपरं प्रतिनिर्णेजनंदापा
वयेतावशिष्टं मूल्यं देयं यावज्जीर्णस्यपुनर्नाशितस्य दृष्टा ततो मूल्यादानं ॥ अंतरेषतयाप्योकल
हेयः साक्ष्यमंगीकरोति पुनः कलहं निवारयति ॥ असौपणत्रयंदंड्यः ॥ अतस्त्वतयोः सपणेवि
वादे ॥ पणशतेप्रतिभूर्भवति ॥ असौ ॥ वक्तारमयोपःकलहंवर्द्धयति सोपित्रिपत्रिपणाद्द्य
गुणं चतुर्विंशतिपणं दंडनियः ॥ देयस्यादिष्टयमेवदंडोनुसरणीयः ॥ तुल्लातोल्लमद्दुङ्शासनं
पूर्वोक्तोमाणं प्रस्थद्रोणादिकं ॥ मुद्दोचिद्वितं वाणिजोपणमध्येणपरुंध्यतो ॥ विपक्रीणितांवा
धिद्दितादंडमुत्तमसाहसः ॥ येपूर्वाणिजोमिल्वोदेशतलरागतंपण्यमर्घेणहीनमूल्येनप्रार्थयमा
णउपरुंधयंति ॥ महार्घेणवाक्रीणतेतेषामुत्तमसाहसोदंडोविहितोमन्वादिभिः ॥ केनपुनर

र्घेण वणिजां लाभमित्यत आह ॥ राजनि स्थाप्यते यो ऽर्घः प्रत्यहं तेन विक्रयः । क्रयो वा निःस्रवस्तस्माद्वणि
जां लाभकृत् स्मृतः ॥ राज्ञा त्रिसंनिहिते सति पण्यानामर्घः स्थाप्यते तेनार्घेण प्रतिदिनं क्रयो वा का
र्यः ॥ विक्रयो वा निर्गतः स्रावो निःस्रावो विशेषस्तस्माद्राजनिरूपितार्घान्निःस्रवणः
स एव वणिजां लाभकारी न पुनः स्वच्छंदपरिकल्पितात् । मनुनाप्यर्घकरणे विशेषो द
र्शितः ॥ पंचरात्रे पंचरात्रे पक्षे मासे तथागते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप इति ॥ किंच स्वदेशपण्य
ये तु शतं वणिक् गृह्णीत पंचकं दशकं पारदेश्ये तु यः क्रयविक्रयी ॥ यः स्वदेशप्रतिपण्यं गृही
त्वा विक्रीणीते असौ पंचकं शतं पणशतं पंचकं लाभं गृह्णीयात् पारदेश्यात्तु नः ॥ पारदेशपण्यग्रह
णस्य दशपणं लाभं गृह्णीयात् । यस्तु पण्यग्रहणदिवस एव विक्रियः संपद्यते यः पुनः
कालांतरे विक्रीणीते तस्य कालोत्कर्षवशाद्यो लाभोत्कर्षः कल्प्यः ॥ एवं चार्घनिरूपितेन पणशतेन पंच
पणो लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविक्रये स्थापनीयः ॥ पारदेश्यपण्यविक्रये त्व
र्घनिरूपणप्रकारमाह ॥ पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवं ॥ अर्घोऽनुग्रहकृत्कार्यः क्र

तुर्विक्रेतुरेव च ॥ देशांतरादागतेषु पण्येषु देशांतरगमनप्रत्यागमनं भांडग्रहणशुल्कादिव्ययमेवपा
वानुपयुक्तोर्थः ॥ आवनमर्थं परिगणय्य पण्यस्य मूल्येन सह मिलयित्वा पण्यकरणशतेदृशावण
लाभं तु संपद्यते ॥ तथा केत्रिविक्रेतो मुग्रहकार्यरघौ राज्ञा स्थापनीयः ॥ प्रासंगिकं परिसमाप्यादं
नो विक्रेयानं सम्प्रदाने तद्द्विपापदमुच्यते ॥ तत्र विज्ञेयस्य चराचरभेदेन द्वैविध्य ॥ मध्ये
भावधनषड्विधत्वं तेनैवग्रन्थेन ॥ दितो के स्मिन् ॥ द्विविधं पण्यं जंगमं स्थावरं ॥ तथा षड्विधः त
स्य तद्बुधैर्हीनादिविधिः स्यात् ॥ गणितं गुणितं मेयं ॥ क्रियायास्तूपतः श्रियते ॥ गणिमं क्रमुकफ
लादि तु लीमं कुंकुमादि मेयं शाल्यादि क्रियया दोहादिरूपयोपलिक्षितं ॥ प्रतत्र्यमादेश्यादिरू
पतः ॥ पण्यांगनादि स्त्रियादिश्रीया ॥ दोह्यामरकं तप स्वरागादि त्येनषट्प्रकारमपि पण्यं
विक्रयासंप्रयतोर्दयमाह ॥ गृहीतमूल्यं यः पण्यं पके ॥ तं नैव प्रयच्छति ॥ सोदयं तस्यादाप्योसौ दिग्ला
भं वा दिग्गते ॥ गृहीतममूल्यं यः पण्यं विक्रेता तावान् ॥ गृहीतमूल्यं तयादि ॥ विक्रेता प्रार्थमा
नाय चप्रदेशाश्रीणि जेक्षेत्रे न समर्प्यति तं वपण्यं यादि क्रियकालेवद्मूल्यं सत्कालांतरे

अल्पमूल्यत्वेनैव लभ्यते तद्वाल्हासकृत्तोयः॥ दृष्टपण्यस्थावरजंगमात्मकसत्ते॥ नसादृत्तेपण्यं वि
क्रेतापनानीयः॥ यस्तद्धास्यह्रासकृत्तः॥ पण्यस्तोवयोनास्तिकिंतु॥ क्रयकालेपायवेदयत्नोमू
ल्यस्यैयमन्यकेतातनल्पानित्तिप्राणिपणोनादेव॥ तद्दातल्पपण्यमादाय॥ तस्मिन्नदेशविक्रिणी
तत्लाभस्तेनोदकेनसहितं॥ द्विकंइत्यादितद्वहिरूप्योदयो नयासहितंत्रैके॥ क्रेतृबोधयथाद्वाप
नीयः॥ यथाहनारदः॥ दर्घस्यैदवद्वियेनसोदैपंपण्यमावहेत्॥ स्थानिमामेषानियमोदिमाभ
द्विवारणमिति॥ यदात्वधर्मद्दत्वेनवाल्पस्पल्पूनभावस्तदा॥ तस्मिन्नेवस्वेगृहादिकेयत
पभोगस्तद्दस्मात्तिघ्रादिषणत्तेबोधः॥ कतृकन्वप्रसप्रसिद्ध॥ परिमाणद्रव्यथान्यूनत्वमानपि
कंवाइमादेरव्यावहारिकमुद्दितत्वंवातास्फाटिगर्भकं॥ न्यूनेकूटं॥ यस्याप्यकूटकमणी
नकपरीक्षीतुदाप्पकृत्तमसाह॥ यापुनर्द्रोणकपरीक्षितामाद्दिषर्ममेवद्दमाद्दिकं॥ लम्य
गीतिद्दत्तेसम्यग्वा॥ कूटकमिति॥ अस्याखुत्रमसाहसंदंड्यः॥ विक्रीसकंप्रत्याहयः॥ प्रमामिष
बथाअप्रायद्दीनामिसएवनार्थेविक्रीत्सितमोहमित्तितिर्यक्ध्रान्तष्परासपूरुषेणसुविक्रीतामा

न

वरत्ति ॥ असौ यथाक्रमं प्रथमं मध्यमोत्तरमसरूसंदंडनीय तत्रापि तिर्यगादिषु मूल्य विशेषेण व
र्णविशेषेणां प्रत्यासत्तिविशेषेण दंडस्य गुरुलघुभावः कल्पनीयः ॥ पुनर्बंधनानर्हमतपराजा
त्तपाविनावध्यात्ति पश्यवध्योव्यवहार्यमाह वमनिर्वत्वव्यवहारमेवोन्स्जस्य साधुत्तमस्पाद
संदाप्यः ॥ यः कुर्वीरिणिकुब्रीहिकाचोमाहेहे परायस्याष्टमभंशं कूटमानेन लपते ॥ यजमोबधद
व्यसेहोवत्तादिः ॥ किंच ॥ नविद्यतेवक्तुल्या नाहिपामित्तमच्चमीदिकैतद्रजातितस्मिन् आकरणे
विक्रेपार्थंगेधवर्णरसोहरसे चारणे नमूल्यापातिपसाहस्यपसंचारनेनयथा समद्विककामोदसचा
रणे नमत्तिकायो ॥ स्त्रगंधामालकमित्तिमा नौ चेन्मणिवर्णे पादनेभ्या ध्मा चर्मीतिस्फटिकम
णेवर्णे तरकर्णेन पद्मपणे इति ॥ कार्यमूत्रेण गुणेलकषोधानेच यहस्सूत्रमिति काषायसे वर्णे
त्कषोधानेन कौशेयमिति ॥ विक्रेयेस्यापादितसाहस्यस्य मद्य मोदः ॥ पणस्याष्टगुणोदंडो विधि
तव्यः ॥ मद्भेपिधानं मुद्हेन सद्वर्तत इतिसमुद्गकेर कडकं परिवर्तन व्यत्यासः ॥ योन्यदेव समुद्गानो
पूर्णकरंडकं दर्शयित्वाहस्तलाघवेनान्यदेव स्फटिकाम्पापूर्णं करंडकं समर्पयेत्तिकत्तरिका

रिकं कृत्रिमे कृत्वा विक्रयमाणं पि वा न पतति तस्य दंडः कल्पनावक्ष्यमाणा वेदितव्याः ॥ कृत्रिमकस्तू
रिकादि त्यम्भूतस्य पण्यस्य मूल्येन पण्यमूल्य वत्तिवत्तस्मिन् ॥ कृत्रिमविक्रीते पंचाशत्पणो दं
डः ॥ पणमूल्ये पुनः शतं हिरण्यं तदंड इत्येवं मूल्यवृद्धौ दंडवृद्धिरूह्या ॥ वणिजप्रसाह राजा
निरूपितार्घस्य ह्रासं वृद्धिं वा जानानोऽपि वाणिजः ॥ संभूयापि सिलित्वा रूपेण आराम कारीनां
शिल्पिनापि चित्रकारादीनां संस्थापां पीडाकरत्वनाम सत्वोभात्तकुर्वतः ॥ पणसहस्रं दंडनीयाः
किंच ॥ संभूय वा देश समुत्थं निवसनाद्री होपोविक्रेतुः ॥ तत्संहितं पण्यसहस्रो दाप्यः ॥ यथाह ना
रदः ॥ विक्रीय पण्यं मूल्येन यः क्रेतुर्न प्रयच्छति ॥ स्थावरस्य क्रयं दाप्यो जंगमस्य क्रियाफलं
मिति चित्रितस्वरूपभोगः क्षयवृद्धियते ॥ क्रेतुः संबंधित्वेन लक्ष्यमाणवात्रप्रमकुट्यप्यः ॥ सस्य
घातादिस्तयः तस्य तं उपहन्यते तथा पण्यं ह्येनापाद्यये तथा विक्रेतुः ॥ संबंधित्वेन लक्ष्यमाण
वात्रप्रम रेवसो नर्थो विज्ञेया संप्रयच्छति इत्यध्ये कृत्वा ॥ यदा वेसौ क्रेता देशांतरात्य
पण्यस्य न हरणार्थमागतस्तदा तत्परायमादापदेशांतरे विक्रीणन्नस्य तत्पोत्ता मस्तेमसहितं

298

पण्यं विक्रेता केवेशापयितव्यः । एवं च वक्रीनपण्यसमर्पणे नियमोनुशयाभावे द्रष्टव्यः । श
त्तित्वनुशये क्रेत्रा विक्रीपावा किंचिद्दिसादिमनुक्तं द्रष्टव्यं । किंच यदा पुनः सानुशयः केता
रण्यं जिघृत्वन्तिता दाविकेतमपि पण्यमन्यत्र विके । तं यदा पुनर्न विक्रेदीयमाणं क्रेतानगृ
ह्णातित वपण्यं राजदैवकोनेपहन्ते तदा केयुरेवासोहानिर्भवेत् । वण्याम्यहणन्तरूपेण केत्व्ये
षेण नाशितत्वात् । अपि च यदा पुनः क्रेता प्रार्थ्यमाणमपि वण्यं विक्रेता न समर्प्पयत्यजनानुश
योपितवराजदैविकेनोपहन्तं भवति तदा हानिर्विक्रेतुरेव अन्योन्यदेडप्पघन्यं वि॰ नंषष्ठ्याद्द
शं क्रेत्रे देयं । किंच यं पुनः विनैवानुशयमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं
वापण्यं । अप्राप्तदोषविक्रीणो तत्र दातन्यपण्यमूल्यादि द्विगुणो दण्ड्यो विनयं तावदेव तु नि
र्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति । मूल्यादिगुणं दाप्यो विनयं तावदेव हि इति सर्वत्रैवायं वि
धिर्द्दूमूल्ये परोढव्यः । अदत्वमूल्ये पण्ये वाङ्मात्रये त्रिविक्रे नियमकरिणे समयाद्दते प्रवृत्तौ
नानके श्रिद्दोषः । यथाहनारदः । दत्वमूल्यस्य पाण्यस्य विधेरेषप्रकीर्तितः । अनदत्तेत्य

त्रसमपात्ध्येकस्तौत्रविक्रेतुरविक्रयपडंति विक्रयानुशयोभिहितः ॥ क्रीतानुशयस्वरूपं प्राक्
प्रपंचितमधुना तदुभयसाधारणं धर्ममाह ॥ परीक्षितक्रेयपण्यानां क्रयोत्तरकालं क्रयका
लेऽपरिमाणतो वृद्धिमपश्यतां क्रेतॄणामनुकार्यः विक्रेतॄणां च महार्घे निबंधनस्य पण्यक्षयमप
रोक्ष्यतानामनुशयो न दापितव्यं वृद्धिक्षयपरिज्ञाने पुनः क्रेत्रोरनुशयो भवतीति व्यतिरेकादुक्तं भ
वति ॥ अनुशयकालावधिश्च नारदेनोक्तं क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी विक्रेतुः
प्रतिदेयं तत्तस्मिन्नेवाह्यद्वितीयेऽपि परतः क्रेतुरेव तद्भवेदिति ॥ अपरीक्षितक्रेयविक्रये पुनः य
न्यवैगुण्यनिबंधनानुशयावधिः दशैकपंचसप्ताहमासत्र्यर्धमासिकमित्यादिना दर्शितः य
व ॥ तद्दत्तया वा चोयुक्त्या वृद्धिक्षयपरिज्ञानस्यानुशयकारणत्वात् ॥ अवगम्यते ॥ यथा पण्यपरी
क्षाविधिवल्गीतः पण्यदोषाणामतः पण्यदोषस्य वृद्धिक्षयं कारणत्रितया वे अनुशयकाला
भ्यंतरेपि यद्यनुशयं करोति तदा पण्यषड्भागं दंडं दापनीयः ॥ अनुशयकारणसद्भावे त्वनुश
यकालातिक्रमेनानुशयं कुर्वतो यमेव दंडं षड्भागेनाविनश्वरेषु स्थिरार्थेषु अनुशयकाला

तिक्रमेणानुशयं कुर्वतो मनुक्तो दंडो द्रष्टव्यः ॥ परेण तु दशाहस्य न दद्यान्नापि दापयेत् ॥ आददा
नो ददच्चैव राज्ञा दंड्यः शतानि षट् ॥ इति विक्रीयासंप्रदानप्रकरणम् ॥ संभूयसमुत्थानं नाम
विवादपदमभिधीयते ॥ सर्वे वयमिदं कर्माभिमिलिताः ॥ कुर्म इत्येवंरूपा संप्रतिपत्तिः सम
वायस्तेन ये वणिक् नटनर्तकप्रभृतयो लाभलिप्सया प्रातिस्विकं कर्म कुर्वते बाला
भाला भौमुपचयोपचयो यथाद्रव्यं येन यावद्द्रव्यं पण्यग्रहणाद्यर्थं दत्तं तदनुसारेण सोऽपे
क्षाप्राधान्यगुणभावव्यवस्था ॥ लाभनवाप्य भागद्वयमस्यैको भाग इत्येवंरूपेयां संविदा समपे
न यथा संप्रतिपन्नौ वेदितव्यौ ॥ किंच तेषां भूयाप्रचरतां मध्ये यत्पण्यमिदमिष्टं तु व्यवहर्त्त
व्यमिति प्रतिषिद्धमाचरता यन्नाशितं अनादिष्टं अननुज्ञातं वा कुर्वाणेन तथा प्रमादस्ता री
न तया वायेन यन्नाशितं स तत्सर्वं वणिग्भ्यो दद्यात् ॥ यः पुनस्तेषां मध्ये चौरराजा
दिनिता व्यसनात्पण्यं पालयति स तस्माद्रक्षितात्पण्याद्दशमं भागं लभते ॥ इत्ययमपस्येपन्स्
ल्यं इत्यर्थस्य प्राक्षिवणाद्राजन्तो निरूपणाद्वे तो रसौ मूल्यादि द्वि घयद्राजयोग्यं माणिक्याच्च

८

रातितमंमंशं शुल्कार्थं गृह्णीयात् यत्पुनर्व्यासिद्धं अन्यत्र। नविक्रय्यमिति राजा प्रतिषिद्धं च
यद्राजयोग्यं माणिक्यादि प्रतिषिद्धमपि लज्ञाभ्योऽनिवेद्य लाभात्लाभेन विक्रीतं चेद्राज्ञा
गामिनस्तत्पदानं निरापक्षं तत्सर्वं पण्यं राजा हरेदित्यर्थः। यत्पुनर्वणिक् शुल्कपंचनार्थं
पण्यपरिमाणं निरापक्षं तत्सर्वं पण्यं राजा अपहरेदित्यर्थः। शुल्कग्रहणस्थानाच्चापसरति
यथा। स्पद्मस्यवेत्येवं विवादास्पदीभूते पण्यं क्रीणाति विक्रीणाति सर्वं पण्यं ग्रहणदंड
नीयाः। अपिच शुल्कं द्विविधं जलस्थलजं च स्थलजं अर्धप्रक्षेपणाद्विंशभागं शुल्कं न्यो
हरेदित्युक्तं जलजलजनुमानं विंशतिं तंपणं दानं तर रोस्यं पण्यं पौरुषेदं पर्येणं तरे पाद पशु
श्चयोध्यिपादार्धरिक्तकः पुमान। भांडपूर्णानि यानानि ताये दाष्यानि सारत्त रिक्तभांडा
नियान्विंचित्सुमांसश्चापरिच्छदाः इति। शुल्कादायप्रयेप्यमपरो विशेषः न। भिन्नंका
र्षापणं मासि शुल्केन विशीत्यवृत्तो नशिशोनद्गत्तो। नानेक्षस्तु बेन हृताच शेषेन श्रोत्रिस
नप्रवजितेनयन्नेदति। तीर्यतेऽनेनेति तरः। नावादिस्तऽजन्यशुल्केऽधिकृतस्तारिकः स

महास्थलो ऽस्वंशुल्के गृह्णीत तद्दाहदशाः ॥ चरणः न हंडनीयः वेश्मो वेश्मप्रतिवेश्मा इति स्ववेश्मा
श्रिमस्वंस्ववेश्मपार्श्वस्थो वाच्यते ॥ तत्र भवाः प्रतिस्वस्थाः सापणश्वते प्रातेप्रातिवेश्यपाश्व
ब्राह्मणप्रातिवेश्यो ऽन्येषां क्रूतयत्तसंपन्नानां श्राद्धादिषु विभवे सत्यमंत्रणे एतद्देवदशप
णत्समके दंडनं ॥ परासे ॥ भयकारिणो मध्येयः कश्चिद्देशोपन्नाम तरगतो मृतस्तद्दानदी
यमशौचादाः ॥ पुत्राद्यपत्यवर्गः ॥ बांधवा मातृपवर्गव्यतिरिक्ताः सपिंडा वा आगताः ॥ ते भय
व्यवहारिणो ये देशान्तराद्दागतास्ते वा गृह्णीतु युक्तेर्विना दाद्यभावे राजा [illegible] गृह्णीयात् ॥ वा
शब्द वचनाद्यादानो वकाशस्यक माधकारधशायत्ति ॥ पौर्वापर्यनिषेधो ऽस्य उपन्नो द
हितरइत्यादि प्रतिपादितएवात्रापि विज्ञेयाः ॥ शिष्यसब्रह्मचारिणा ॥ ब्राह्मणानिधीव
णि क्त्रातिश्च वचनप्रयोजनं ॥ वाणिजामपि मध्येयपिंडदानर्णदानादि समर्थः सगृ
ह्णीयात् ॥ समर्थ्यो विशेषेपुनः सर्वे वणिजः संसृष्टिनो विभुस्य गृह्णीयुः ॥ तेषामप्यभावे
दशवर्षं दायाद्यागमनं प्रतिक्ष्य ॥ नागते तेषां स्वयमेव राजा गृह्णीयात् ॥ न निंद नारदे नस्य

ष्टमुत्कर्ष एकस्यैवेष्टयान्मरणे हायो होस्य न तदा प्रयात् । अभ्यो वाऽसनिदायो वा सत्कश्च
त्सर्वैरेवते । नदभावेतद्गुणेतत्कार्यं पेरशवत्सरान् । अथ्वामिकमदायादे दर्शीवर्षास्थिते
तत्तत्र । पत्नीतदासमकुर्यादिवं धर्म्मे नदीयसेद्धाने । किं च जिज्ञावे च कस्ते निर्त्नीभस्मो भग
त्ति । स्थिघस्यजेयुर्वर्हेः । कर्याः पञ्चसंभूयकारिणां मध्ये भोडप्रत्यवेक्ष्यणादिकं कर्त्रे मस
र्थोऽसावान्यमत्वं कर्मभोडभारव हन तदापत्स्यवपरिक्षणादिकं कारयेत् । प्रागुपदिष्टवर्णि
ऽधर्ममत्स्वगादिष्वतिदिशति । अनेनत्वा भात्वा भोयप्याइव्यमित्यादिवर्णधर्मकथनेन त्व
न्विजां होत्रादीनां कर्षीवाल्लानां नष्टनर्तकत्तक्षादीनां वशित्वकर्मोपजीविनां विधिवर्तन
नप्रकारः प्रोक्ताः तत्तत्र न्वात्विजां धनं विभागे विशेषो मनुनादर्शितः । सर्वेषामर्द्धिनो मुख्यास्तद
र्द्धेनार्द्धिनोपरे । तृतीयेस्तृतीयांशाश्चतुर्थांशाश्च पादिन इति । अस्यायमर्थः । ज्योतिष्टो
मेन नन्तेशांतेन दीक्षयेतेति वचनेन गवांशतमन्विगानतित्सूपेदक्षिणाकार्योविनियुक्ते
ऋत्विजश्च होत्रादयः षोडशः तत्र कस्य कियानंश इत्यपेक्षायामिदमुच्यते । सर्वेषां होत्रा

द्वीनषोडशर्त्विजां मध्ये मुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गातारस्तस्य तस्यार्द्धिनः सर्वेषां भागप
रणोपपत्तिवशाद्यानाष्टौ त्वाचारिंशद्रुपार्द्धिनाड्मार्द्धभाजः । प्रथरमेत्रावरुणप्रतिप्रस्था
नब्राह्मणच्छंसिप्रस्तोतारस्तदर्द्धिनस्तस्य मुख्यांशस्यार्द्धेन तत्र तृतीयांशेनरूपेणार्द्धभाजः पेतृनस्त
तीयिनोऽछावाकनेष्टाग्नीध्रप्रतिहर्त्तारस्तृतीयिनो मुख्यांशपादांशभाजो रूपतस्तृतीयांशेनस्तृती
यांशभाजः । येतु पादिनो ग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्ते मुख्यभागस्य पञ्चष्ठयंशो द्वाद
शांशरूपस्तन्दान । ननु कथमयमवान्तियमोघटनेन तावदप्रसमयोनापिद्रव्यसमवायो नापि
वचनं यद्दशान्द्रागनियमः स्यात्ततः समं स्यादृक्षूतत्त्वादिति न्यायेन सर्वेषां समो समभागं कर्मी
गुरुरूपेणाध्यासाभाक्रमिमिमितिपुत्रं तस्यैव्यः ति । ज्योतिष्टोमप्रकृतिके द्वादशाहविंतस्तृतीयेनः
पादिनइति सिद्धवद्वदनुवादो नयुज्यते । यदि तत्प्रकृतित्वेज्योतिष्टोमेस्तृतीयेचतुर्थोक्रभाक्रमे
त्रावरुणाद्दीनां नस्यात् हर्त्तावेदिकाद्दिघमस्तत्समाख्यावलात्स्यात् गृह्यतेशोतियामोवकल्प्या
त । इति सम्भूयसमुत्थानप्रकरणं दशनीस्तैपं प्रतत्त्पयते । तल्लक्षणं चमनुनाभिहितं स्यात्ता

(३०३)

हसं त्वन्वयवत्प्रसभं कर्म यत्कृतं ॥ निरन्वयं भवेत्स्तेयं हृत्वा वापव्हुते भयादिति ॥ अन्वयवतः
द्रव्यराज्यरक्षादिसमक्षं प्रसभं बलावष्टंभेन यत्परस्वधनहरणादिकं क्रियते तत्साहसं ॥ स्ते
यं तु द्विलक्षणं । निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वंचयित्वा यत्परद्रव्यहरणं तद्व्यःते ॥ यच्च
सान्वयमपि कृत्वा न मया कृतमिति भयान्निह्नुते तदपि स्तेयं ॥ नारदेनाप्युक्तं ॥ उपायैर्विविधै
रेषां छलयित्वापकर्षणं ॥ सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण इति ॥ तत्र तस्करस्य हरणम
र्वकत्वा ईद्दनस्य गृहहरणस्यवस्तानपूर्वकत्वात् ॥ स्तेनोमापेतावद् ॥ यश्चौरोयमितिजनैर्विख्याप्य
ते सो ऽग्राह्यैः राजपुरुषस्थानपालप्रभृतिभिर्ग्रहीतव्य तल्लोप्त्रेण पदेनवा ॥ पूर्वकर्मापराधी
च तथा वाशुद्धवासकः ॥ यश्चौरोयमितिजनैर्विख्याप्यते सो ग्राह्यैः राजपुरुषस्थानपालप्र
भृतिभिर्ग्रहीतव्यः ॥ लोप्त्रेणापहृतभाजनादिना वा ॥ चौर्याचिह्नेन नादृशा हेशाराध्य चौरपदानु
सारेणैन वा ग्राह्यः ॥ यश्च पूर्वकर्मापराधी प्राक्प्रख्यातचौर्यः ॥ अशुद्धेः प्रख्यातोवासः स्थानं
यस्यासौ अशुद्धवासकः ॥ सोपिग्राह्यः ॥ किंच ॥ न केवलं पूर्वोक्तालग्राह्याः ॥ किंत्वन्येपि [illegible] व

णोऽर्थे गैशाकर्यां गाद्याः । मात्ति निह्नवेन नाटं । अइदृस्येवंरूपेण नो मानिह्नवेन नाटं विश्वरूपर
स्येवंरूपेण । आदिग्रहणेन स्वदेशग्राम कुलाध्यवसायेन चलासिताग्राह्याः । ह्नवननाटे हे अ
इदृस्येवरूपेण ध्वतपणपणेगनामधपानादिष्वतिप्रसक्ताः । तथा कुतस्त्यो ऽसि त्वमिति चौरग्रा
हादिभिः पृष्टो यदि शुष्कमुखो भिन्नस्वरो वा भवति तदैषोऽपि ग्राह्यः । बहुवचनादिस्विन्नल
लाटादीनां ग्रहणं । तथा येन : कारणं किं यदस्य धनं किं वास्य गृहमित्येवं पृष्टोऽन्ति वर्णान्तरधा
रणेनात्मानं गूहति यस्त्वा ये चरं त्रियचयामाबोधि वद्व्ययकारिणः येवा विनष्टप्रव्याणेनै
णे वस्त्र भिन्नभाजनानामविशानस्वामिकानां विक्रयकास्ते सर्वे चौर्यसंभानवाग्राह्याः । एवं
नानाविधचौर्यनिर्णलिंगास्परूपगूहते तेते चौराः । किंतावधवहत्तिसम्यक्रयण ॥ स्वतनवनर्ल्लि
गदर्शनमात्रेण चौर्यनिर्णयं कुर्यात् चौरस्यापि लोप्त्रादि चौर्यलिंगसंबंधसेवान् । यथाह ना
रदः । अन्यहस्तात्परिभ्रष्टमकामादुत्थितम्भुवि । चौरेण वा परिक्षिप्तं लोप्त्रं यत्नात्परीक्ष
येत् ॥ तथा । असत्यसंकाशा सत्याश्वासत्यनिभाः दृश्यते विविधा भावास्तस्माद्युक्तं परी

ग्र

क्षणमिति । एवं चौर्यशंकया गृहीतेनात्माशोधनीय इत्याह । यदि चौर्यशंकया गृहीतस्तन्नि
स्तरणाय मात्मानेनाऽशोधयेत् । तर्हि वक्ष्यमाणधनदापनवधादिदंडभाग्भवेत्तामा
नुषेण तदभावे दैव्यवच्च । आत्माशोधनीयः ननु नाहं चौर इति मिथ्योत्तरं कथं प्रमाणं सं
भवति । तस्याभावरूपत्वात् । उच्यते दिव्यसत्तावज्ञावाभावगोचरत्वं रूप्याचान्यात्तरः
कर्यादित्यत्र प्रतिपादितं । मानुषं तु नर्यद्यपि साक्षात् बुद्धिं मिथ्योत्तरेने संभवति तथापि का
रणे तेसष्टे भावरूपमिथ्या कारणसाधनमुखेनाभावमपि गोचरयत्येवायथा नाशणवहा
रकालेऽहं देशांतरस्थ इत्यभियुक्तौ भावितचौर्याभावस्य व्यर्थ्यं सिद्धेश्रुद्धिर्भवत्येव । चोरं दंडऽ
माह । यस्तु प्राग्युक्तपरीक्षणानामन्यपेक्षं वा । निश्चितचौर्यस्वामिनिऽपहृतधनं स्वरूपेण सर्वा
नयोत्त्वा दापयित्वा विविधैर्वधैर्घातयेत् । एतच्चौत्तमसाहसदंडप्राप्तियोग्योत्तमद्रव्यवि
षयं न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयं । साहसेषु प्रणवोक्ताश्रिक्षुद्रं
डो मनिषिभिः स एव दंडः स्तेयेपि द्रव्यस्य त्रिषष्ठ्यक्रमादिति नारदवचनेन वधरूपस्यो

तमरण्यविषये व्यवस्थापितत्वात् यत्पुनर्वृद्धमनुवचने अस्येयो वा त्रावितत्वाद्धनमेषां म
न्नात्मकं अप्रत्यस्तानघातायद्राजानार्थदंडेनदंडयेत् इत्ति तदपि महापत्सु विषये चौरवि
षयापवादमाह ब्राह्मणं पुनश्चौरं महत्यपराधे तु नघातयेदपि तु तत्रांकयित्वा स्वदेशात्
निष्काशयेत् अंकनं च अश्वपदाकारं कार्यं यथाह मनुः गुरुतल्पे भगः कार्यः सुरापाणे सुराध्व
जः स्तेये श्वपदं कार्यं ब्रह्महण्यशिराः पुमानिति एतच्च दंडोत्तरकालं प्रायश्चित्तमचिकीर्षितो
द्रष्टव्यं यथाह मनुः प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितं नांक्या राज्ञा ललाटे स्युर्दा
प्यास्तूत्तमसाहसमिति चौर्यदर्शनेऽपहृतद्रव्यप्राप्त्युपायमाह यदि ग्राममध्ये मनुष्यादिप्रा
णिवधो धनापहरणं वा जायते तदा ग्रामपतेरेव चौरोपेक्षादोषसत्त्वात् रिक्थार्थं स एव चौरं ग
हीत्वा राज्ञेऽर्पयेत् तदशक्तौ हृतं धनं निजेन दद्यात् यदि चौरपदं स्वग्रामान्निर्गतं न दर्शयति
दर्शिते पुनस्तत्पदं यत्र प्रविशति तद्विषयाधिपतिरेव चौरं धनं वा दापयेत् तथा वनादौ गोचरप
स्यमुच्यते तेन चौरः प्रपन्नतः ग्रामाद्बहिर्वा अशेषं पदं यदि न निर्गतं निर्गते पुनारण्यनाम्ना

न्वविदं स्यश्रवालितं ॥ सामंतान्मार्गपालान्दिग्पालांश्चैव दापयेदिति ॥ विवीतेत्वपद्दारिं
नामस्वा विवीतस्वा[illegible] न एव दोषो: यदा तु धान्येतद्दद्दतं मवस्यवीतकेवास्तिवीताद
न्यक्षेत्रे तदा चौरो[illegible]तं मार्गपालस्य केंव्यालस्य वापराधः ॥ किंच यदा पुनर्ग्रा
माद्बहिः सीमापर्यंते क्षेत्रे चौरादिकं भवति तदा तद्ग्रामवासिन एव दद्युर्यदि सीम्नो वहिश्चौ
रपदं न निर्गतं ॥ निर्गते पुनर्यत्र ग्रामादौ केचौरपदं प्रविशति स एव चौरार्पणादिकं [illegible]क
रोतिवेदीत्वानेक ग्राममध्ये क्रोशमात्राद्बहिः मदेशो घातितो मुषितो वा चौरपदं च जनस
मर्यादीनो भग्नं तदा पंचानां ग्रामाणां समाहारः पंचग्रामी दशग्रामसमाहारो दशग्रामी वा दद्यात् ॥ वि
कल्पवचनं तु यथा प्रत्यासन्नस्यापहृतधनप्रत्यर्पणादिकं कुर्यादित्येवमर्थं यदा त्वग्रामोपहृतं
धनं दापयितुं न शक्नोति तदा स्वकोशाद्देयं राजा धांभात् ॥ चौरापहृतमन्वजित्य यथा स्था
नं गमयेत्स्वकोशाद्वा दद्याद्विति गौतमस्मरणात् ॥ मुषितं देहे मानुषेणादिव्येन वा निर्णयः
कार्यः ॥ यदि तस्मिन्दाप्यमाने भावन्मीब्रेत मग्यान्तुः मुषितः शपथं दद्यो वंधुभिर्वापि सा

१५६

धयेदिति स्वरूपमनुस्मरणात् । अपराधविशेषेण दंडविशेषमाह । वंदिग्राहादीन् बंधनावष्टं
भेन छ्वा । न कारान्तरेषु गुप्ता भारोपयेत् । अपंचवधप्रकारोपदेशः । अग्न्यागाराद्युधागारदे
वतागारभेदकान् हस्त्यश्वरथहन्तॄन् हन्यादेवाविचारयन्निति मनुस्मरणात् । किंच
वस्त्राद्युपक्षिप्य त्यजहरसीत्याकेपक । वस्त्रादिवत् सर्वस्वादिकं विवस्योक्तपवापराप
२ पहृत्यै । त्रथमेदः । लौप्यात्क्रमेण करेण संदंशेन नमन्यं गुरुनेन वराणौ । कार्याः । द्वितीयापराधे
नः करश्च पादश्च करपादं तश्च तादृकं च करपादं चः कल्परणादिकं तर्हीनयोस्तो करपा
देकहीनको कार्यो । तृक्षपकः । संधिभेदापारके करे पादं च छित्त्वा दिस्पर्श्याः । एतद्दस्कत्त
मसाहसप्राप्तियोग्यद्रव्यविषयं तेदंगच्छिदंडस्फतो दंडउत्तमसाहसइति नारदवचना
त् । तृतीयापराधं तु वध एव । तथा च मनुः । अंगुल्यौद्रव्यमहत्त्याधनुसारतो दंडः क
ल्पनीयः । जातिद्रव्यपरिमाणपरिग्रहविनियोगवयः शक्तिगुणदेशकालादीनां
दंडगुरुलघुभावकारणानां प्रानंत्यात् प्रतिद्रव्यमक्रमशक्तेः । सामान्येन दंडकल्पनो वा

यमाह ॥ क्षुद्रादिद्रव्यस्वरूपं च नारदेनोक्तं ॥ मृन्मयंभांडासनखट्वास्थिदारुचर्मतृणादियत्
शाकधान्यकृतान्नः ॥ च क्षुद्रंद्रव्यमुदाहृतं वासः कौशेयवर्जं च गोवर्जं पशवस्तथा ॥ हिरण्य
वर्जं लोहं च मध्यं व्रीहियवा अपि हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः देवब्राह्मणराज्ञां
च द्रव्यं विज्ञेयमुत्तमं ॥ त्रिप्रकारेष्वपि द्रव्येष्वप्यासंगिकः प्रथममध्यमोत्तमसाहसरूपो
दंडनियमस्तेनैव दर्शितः साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः ॥ स एव दंडः ॥ स्तेयेपि द्रव्ये
षु त्रिष्वनुक्रमादिति ॥ मन्मयेषु मणिकमलिकादिषु गोव्यतिरिक्तेषु मेषमहिषादिपशुषु
ब्राह्मणसंबंधिषु कनकधान्यादिषु रत्नमंभावोत्त्तीत्यच्चावच च दंडविशेषाकांक्षायां मन्
त्स्याद्यनुसारेण दंडकल्पनीय ॥ तत्र च दंडकर्मणि दंडकल्पनायां तद्धेतुभूतं देशकालवयः
शक्तिसकार्चितनीयं ॥ एतच्च जातिद्रव्यपरिमाणपरिग्राहादीनामुपलक्षणं ॥ तथाहि ॥ अष्टा
पाद्यं स्तेये किल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषां प्रतिवर्णं विदुषोतिक्रमे दंडभूयस्त्वः इत्यप
मर्थः ॥ किल्बिषग्रहणान्नात्र दंडो तस्मात्तेयेस्मिनपहारे द्विगुणप्रापादनीयः इतरेषां पुनर्विह

क्षत्रियब्राह्मणानां चाष्टगुणास्तेये हिरण्ये किल्बिषाणि षोडशद्वात्रिंशच्चतुःषष्टिगुणो दंडोऽष्टापा
द्यानीया (पुल्लिंगः) षष्ठ्यादिकर्तृके प्रहारे दंडभूयस्त्वे मननाप्ययमेवार्थो दर्शितः अष्टापाद्यं
तु शूद्रस्य स्तेये भवति किल्बिषं षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य तु ब्राह्मणस्य
चतुःषष्टिः पूर्णं वापि शतं (द्विद्रोण) एवं कुंभः हर्तृह्रियमाणस्वामिगुणापेक्षया (पाठः) तमवचत्
हिरण्ये वा चतुःषष्टिस्तदोषगुणवेदिन इति तेष्या परिमाणकृतमपि दंडगुरुत्वं दर्शयति य
याह मनुः धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वधः शेषेऽप्येकादशगुणं दाप्य
स्तस्य तद्धनमिति विंशतिद्रोण एव कुंभः हर्तृह्रियमाणस्वामिगुणापेक्षया
सुभिक्षकालाद्यपेक्षया वा ताडनांगच्छेदनवधरूपा दंड्याः स्युः तथा संख्याविशेषादपि दंड
विशेषो रत्नानां सुवर्णरजतादीनामुत्तमानां च वाससां रत्नानां चैव सर्वेषां शतादभ्यधि
के वधः पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते शेषे रत्नानां चैव ... षः
कादशगुणं मूल्याद्दंडं प्रकल्पयेदिति तथा द्रव्यविशेषादपि पुरुषग्रहणकुलीना

517

णां नारीणां च विशेषतः । रत्नानां चैव सर्वेषां हरणे वधमर्हति । महाकुलीनानां तु दंडांतरं पुरुष
हरतो दंड उत्कृष्ट उत्तमसाहसस्त्वपराधेन सर्वस्वं कन्यां तु हरतो वधः ॥ क्षुद्रद्रव्या
णां तु मानुषान्तुस्तुनमूल्यात्स्वं वपुणो दमः । काष्ठभांडतृणादीनां मृन्मयानां तथैव च
वेणुवैणवभांडानां तथा स्नाय्वस्थिचर्मणां । शाकानामार्द्रमूलानां हरणे फलमूलयोः । गो
रसेक्षुविकाराणां तथा लवणतैलयोः । पक्वान्नानां कृतान्नानां मत्स्यानामामिष
स्य च । सर्वेषामल्पमूल्यानां मूल्यात्पंचगुणो दमः इति नारदस्मरणात् । ये तु पुनः प्रथमसाहसः
क्षुद्रद्रव्येषु शातातपं चास्तस्यार्थतो समाषामूल्ये तदधिकमूल्ये च यथायोग्यमव
स्थापनीयः । ये तु तस्मान्न वंक्षुद्रद्रव्यगोचरवचनं तन्मूल्याद्द्विगुणो दम इति तदल्प
द्रव्यविषयं । तथापराधगुरुत्वे च यो संधिं छित्वा तु चौर्यं रात्रौ कुर्वीत तस्क
राः तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेदिति । एवं सर्वेषामनंत्यात्प्राप्ते द्रव्यं
वक्तुमशक्ते जातिपरिमाणादिभिः कारणैर्दंडगुरुलघुभावः कल्पनीय पार्थिका

तां पुनरस्मा वक्षारेन दंडः पथ्याह मनुः ॥ द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके
ऽआददानः परक्षेत्रान्न दंडं ~~दातुमर्ह~~ दातुमर्हति ॥ तथा चणकव्रीहिगोधूमयवा
नां मुद्गमाषयोः ॥ ऽअनिषिद्धैर्गृहीतव्यो मुष्टिरेकः पथि स्थितैः ॥ तथैव सप्तमे भक्ते भक्तानि षड
नश्नता ॥ ऽअश्वस्तनविधानेन हर्तव्यं हीनकर्मण इति ॥ ऽअथ चौरोपकारिणो दंडमाह ॥ भक्तम
न्नं ॥ अवकाशो निवासस्थानं ॥ ऽअग्निश्चौरस्य शीतापनोदनार्थः ॥ उदकं तृषितस्य ॥ मंत्र
श्चौर्योपकारोपदेशः ॥ उपकरणं चौर्यसाधनं ॥ व्ययः ॥ ऽअपहारार्थं देशान्तरगमनतः पाथेयं ॥ एता
नि चौरस्य हंतुर्वा दुष्टत्वेन जानन्नपि यः प्रयच्छति तस्योत्तमसाहसो दंडः ॥ चौरोपेक्षाकारणे
मप्ययं दोष ॥ राजन्याद्यपेक्षं तेनतत्पे दोषभागी न इति नारदस्मरणात् ॥ किंच परगात्रेषु
शस्त्रस्यावपातने दासि ब्राह्मणीगर्भव्यतिरेकेण गर्भस्य पातने च उत्तमो दमः ॥ दासीगर्भनि
पातने च दासीगर्भविनाशकादित्यादिना दंडो विहितः ॥ ब्राह्मणगर्भं तु हत्वा गर्भमविदि
तमित्युपक्रम्य ब्रह्महत्यातिदेशो वक्ष्यति ॥ पुरुषस्य स्त्रियाश्च प्रमापणे शीलवर्त्याद्यपेक्षया

तमो वा धर्मो वा रूढो प्रवासिस्थितो वा दृष्टव्या ॥ अपि च ॥ विशेषेण प्रदुष्टमात्रेण स्त्रीत्वगर्भे
यातीनी चपावपरूद्ध बल्पहत्रीलत्त नाभेत्रीच ॥ एतानैं गर्भरहिता ॥ स्त्रीगलितशिलावध्वांस
प्रवेशयेन ॥ किंच ॥ अगाभिर्णीमित्युन्वर्वर्तते या पव्वधार्थ मन्यपानादिषु विषे दद्यात्तिया
वद्दा दार्थे ग्रामादिषु तिं तथा वा हं निज वात्तग्यर्वपस्थानि श्रारपतितो छिन्नवस्त्रैः करना
साष्टी कृत्वा दातेष्टे दव लिवर्द्दै प्रवासमारयेत ॥ लिपप्रकरणोपदेतात्सा हसिकस्य
दंडपवणे नतत्सा ॥ सांगिकमितिसर्वतत्वं ॥ अविसातकर्तकेह तेभं हंतमैत्रनो पाव
अविसात हृत्स्यसुता: प्रत्यासन्ना वा धवाः ॥ केनास्य कलहो नानरति कलहस्ता दृष्ट
प्रष्टव्या ॥ ~~कथं प्रष्टव्या इत्याह~~ ॥ तथा मत्तस्य लेवं धिम्यायोषितो याश्च परखुंसिरतां वि
मिश्चारिन्याः स्त्रा अपि प्रष्टव्याः ॥ कथं प्रष्टव्या इत्याह ॥ किमयं स्त्रीकामो ऽस्य कामो रतिकामा
वा तथा कस्यां कलत्रं धेन्यां वा स्त्रियामस्य रतीरासीत् ॥ कस्मिन्वा द्रव्यप्रीतिः कुतो वा
वृत्तिकामः ॥ केन वा सह देशांतरं गत इति नानाप्रकारे स्त्रामिचारिण्यो योषितः पृष्ठकरा

ह्यायादिवामोसातन्मल्लद्व पाद्यात्तपंवदेनापूर्वमपेयंशत्कोतितध्वसंग्रहणस्मृतामिति ॥ प्र
तिषिद्धयोः स्त्रीपुंसयोः पुनः संभाषादिकरणे दंडमाह ॥ प्रतिषिध्यत इति प्रतिषेधः ॥ पतिपित्रा
दिभिर्भर्त्सनरह ॥ संभाषणादिकं निषिद्धं तत्र प्रवर्तमाना स्त्री शतपते दंडं दद्यात् ॥ पुरुषः ।
पुनरेवाभिषेचपक्षमित्रे द्विनेदिषतं दद्यात् ॥ द्वयोस्तु स्त्रीपुंसयोः प्रतिषिद्धयोर्वर्तमानयोः स
ग्रहणे संभोगे परिहारेणयोर्दंडोवक्ष्यमाणएवाविशेषः ॥ एतच्चचारणादिभार्याव्यतिरेकेण
नैषचारणदारेषु विधिर्नात्मोपजीविषु ॥ सज्जयंति हि ते नारीर्निगूढाश्चारयंति चेति मनुस्म
रणात् ॥ तमेदानीमग्रहणेदंडमाह ॥ चतुर्वर्णमपि वर्णानां बलात्कारेणाग्रमातीमप्यग्रपरदा
रामिगामग्रामिनिपणसहस्रं दंडनीयः ॥ यदा पुनः सवर्णामग्राह्यामतेनोमो नग्रहाबाह्मज
पतितदार्मेनवविशेषउक्तः ॥ सहस्रं ब्राह्मणो दंड्यो गुप्तां विप्रां बलाद्व्रजन् ॥ शतानि पंच दद्यं
द्यः स्यादिच्छंत्यासह संगतस्सहस्रं ब्राह्मणो दंड्यो गुप्तेत्सतेनब्रजन ॥ शूद्रायां क्षत्रियविशोः स
हस्रं तु भवेद्दम इति ॥ एतच्चगुप्तसविभार्यादिव्यतिरेकेणद्रष्टव्यं ॥ मातामातृष्वसावस्त्र

मातुलानी चापितृस्वसा पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा दुहिताचार्यभार्या च
सगोत्रा शरणागता राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । आसामन्यतमां गत्वा गु
रुतल्पग उच्यते । शिश्नस्योत्कर्तनं तत्र नान्यो दंडो विधीयत इति नारदस्मरणात् । प्राति
लोम्येन तूत्कृष्टवर्णस्त्रीगमने क्षत्रियादेः पुरुषस्य वधः एतच्च गुप्ताविषयं । अन्यत्र धने दंडः
उभावपि हि तावेव ब्राह्मण्या गुप्तया सह । विप्लुतौ शूद्रवद्दंड्यौ दग्धव्यौ वा कटाग्निना । ब्रा
ह्मणीं यद्यगुप्तां तु सेवेतां वैश्यपार्थिवौ । वैश्यं पंचशतं कुर्यात्क्षत्रियं तु सहस्रिणमिति मनुस्मर
णात् । शूद्रस्य पुनरगुप्तामुत्कृष्टवर्णां स्त्रियं व्रजतो लिंगच्छेदः सर्वस्वापहारश्च । तासु
गुप्तासु तस्य वध एव तथा च हारीतविनिर्णीतेनैवोक्तं । शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावस
न् । अगुप्तमंगसर्वस्वैर्गुप्तं सर्वेण हीयत इति । नार्याः पुनर्हीनवर्णं व्रजन्त्याः कर्णयो
रादि सहरणं नासादेश्च कर्तनं । आनुलोम्येन वा सवर्णं व्रजन्त्या दंडकल्पः । अयं च वधा
द्युपदेशो राजन्यस्यैव पालनाधिकाराज्जन्मनामिमात्रस्य ब्राह्मणः । क्षत्रियार्थमपि राज्ञे

(317)

भ्योऽस्य प्रहर्तव्याः तथा मरणे देशानिकरवर्जितो गोपालिकाद्या येन ताश्चेपि विश्वासस्तर्वं
प्रहर्तव्याः नानाप्रकारैः शस्त्रैर्दंतारनिक्षिप्य तद्दंडो विधातव्याः किं चक्षित्रं पक्षकलसस्या
वेत्तं ॥ वेश्म गृहं वेन मरीची क्रीडावनं वाः सामं विवातमुक्तलक्षणे ॥ वित्तं चादेहं तिपश्वात्मे
पालिमाभिगच्छतितान् सर्वानेकदैवोरणमये वैष्टे त्वादहेतालक्षेत्रा। देहिकानां मारणं दंडप्रसं
गाद्दंडविधाने इति सप्तपप्रकरणे स्त्रीसंप्रहरणे व्यविवादं व्यापनो प्रथमसाहदंडं प्राप्यर्थो त्रि
धानत्वस्वरूपं व्यासेन विवृतो त्रिविधं तत्समात्याप्ता तं प्रथमं मध्यमोत्तमं देशकालकालभाषा
पानजाने च परस्त्रियः कलाक्षावेक्षणे हास्यं प्रथमं साहसं स्मृतं प्रेषणं गंधमाल्यानां द्रूषम्भ
षणवाससां प्रलोभनं चान्नपानैर्मध्यमं साहसं स्मृतं साहासनं तेविकेनुपरस्परस्पृशा
श्रयः केशाकेशि इत्येवसम्पक्लेगद्वरणं स्मृतं स्त्रीपुंसयोर्मिथुनीभावं संग्रव हरणं सो
नपूर्वकत्वा कत्तुर्दंडं विधानस्य तत्स्थाने वापं तावदाह संग्राहणे प्रवृत्तः पुमान केश
केस्यादिभिर्लिंगैरेसंत्याग्रहीतव्यः परस्परस्य वैश्यस्यग्रहणमपूर्विकाक्रीडा केशाके

शीलव्रतेनेदमिति स्वरूपेऽतिचराद्विरोसनितिः आचर्म व्यतिहारार्थे इति समासो तद्रूपयः ॥ प्र
व्ययत्वाद्बहुमतत्तीयाविभक्तिः ॥ तथा चापमर्षः ॥ परभार्यया सह केशाकेशि क्रीडा नानाभि
वैकरस्य वसना द्विं कृत्त व्रणोरागकृतैर्लिंगेहवः ॥ संप्रतिबन्धा या सा त्वा लंगरणा प्रवृत्तो ग्री
तव्यः ॥ परस्त्रीगरस्पर्शनिर्भुक्ता हृष्टादि वक्रदालार्थे ॥ किंच ॥ वः पुनः परदारस्तं वा दाशाकुंच
प्रार्वेणानघनमर्दनादिस्पर्शनासादिमिलाषद्वाचरति ॥ तथाऽदेशेनिर्जनेजनतीकीर्णेवा
धकीरा कुलो वासं लापनं कीरति ॥ परभार्यया सह कमंचाकादौ चिरं वाऽवतिष्ठते यः सोवि
संग्रहणे प्रवर्त्तो माह्यः ॥ तच्च शक्यमान पुरुषदोष विषयमिति तस्य तु न दोषः यथाह मनुः
यच्च माक्षारितः पूर्वम भिमाषेन कारणात् ॥ न दोषं प्राप्नुयात्किंचित्र्न हि तस्य व्यतिक्र
म इति ये परस्त्रीयात्स्पृष्टः ॥ क्षमतेऽसावपि ग्राह्यः ॥ इति तेनैवोक्तं ॥ स्त्रियंस्पृशेददेशे यः स्पृष्टो वा
मर्षयोः ॥ तथा परस्पर सानुमते सर्वं संग्रहणं स्मृतमिति यः स्वयमेव यं चित्स्थाऽसक्लृ द्रम
मति वर्तते निष्फलत्व या मलं गगज नरस म स्वे व्याप यत्समा चापि मा स्य इति तेनैवोक्तं दर्श

नाददीतेति शस्त्रग्रहणनिषेधात् । यदा तु रागतो निवेदने कालविलम्बे न कार्यमिति पार्थ
तारं का तदा स्वयमेव क्षत्रिया ॥ द्विकानहन्यात् । शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरु
ध्यते तथा नाततायिवधाद्दोषो हन्तुर्भवति कश्चन प्रत्यक्षं वा प्रकाशं वा मन्युस्तं म
न्युमृच्छतीति शस्त्रग्रहणमप्यनुज्ञातम् । तथा क्षत्रियवैश्ययोरन्यान्यस्याभिगमने यथा
क्रमे सहस्रं दंडं च । शतपणात्मको दंडो वेदितव्यो । तदाह मनुः वैश्यश्चेत्क्षत्रियां गुप्तां वैश्या
यां क्षत्रियो व्रजेत् । यो ब्राह्मण्यामगुप्तायां तावुभौ दंडमर्हत इति । पारदार्यप्रसंगात्क
न्यायामपि दंडमाह । विवाहाभिमुखीं हस्ते अलंकृतां सवर्णां कन्यामपहरन् तत उत्त
मं साहसं दंडनीयः स्वदनाभिमुखीं सवर्णां हरन् प्रथमसाहसं । उत्कृष्टवर्णां ना कन्यामु
पहरन्तः पुनः क्षत्रियादेर्वध एव । दंडविधानादयर्हत्र राकाशादाछिद्यान्यस्मिन्देय
मिति गम्यते । प्रातिलोम्यापहरणे दंडमाह । पादः साठ रांगा हीनवर्णां कन्यामहरतीति तदा
दोषाभावान्नादंडः । प्रम्पयाः स्वानेच्छतीमपहरन्तः प्रथमसाहसो दंडः । कन्यादूषणे

दंडमाह ॥ ऽनुलोमासेत्यनुवर्त्तते यद्यकामां बलात्कारेण नखक्षतादिना दूषय
ति तदा तस्य करच्छेदस्तथाः यदा पुनस्तामेवांगुलिप्रक्षेपेण योनिक्षतं कुर्वन् दूषयति त
मुत्कर्षषट्शतसहितो द्व्यंगुलिछेदः ॥ अभिसह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः तस्या
शु कर्त्ये अंगुल्यौ दंडं चार्हति षट्शतमिति ॥ यदा तु सानुरागामेव दूषयति तदापि तो नैव
विशेषतल्कः सकामां दूषयंस्तु अंगुलिछेदमर्हतीति ॥ अंगुल्योरेव छेदं द्विशतो दंडनेन तथे
ति ॥ कन्यां कुर्यादिति योनिक्षतवतीं कुर्यादित्यर्थः ॥ यदा पुनरुत्कृष्टजातीयां कन्या
मविशेषात्सानुरागां वाभिगच्छति तदा हीनस्य क्षत्रियादेर्वधः ॥ उत्तमां सेवमानस्तु जघ
न्यो वधमर्हतीति मनुस्मरणात् ॥ यदा सवर्णां सकामामभिगच्छति तदा गोमिथुनं शुल्कं
तत्पित्रे दद्यात् ॥ यदीच्छति पिता तर्हि तच्छुल्कं [illegible]ऽप्यनिच्छति दंडरूपेण तदेव राज्ञे
दद्यात् ॥ सवर्णामकामां गच्छतो वध एव ॥ यथाह मनुः शुल्कं दद्यात्सेवमानः समामि
च्छेत्पिता यदि ॥ योऽकामां दूषयेत्कन्यां स सद्यो वधमर्हति ॥ सकामां दूषयंस्तुल्यो न वधं प्राप्नु

यान्तरमिति ॥ किंच स्त्रीशब्देनात्र प्रकृतत्वात् कन्यावमरुपते ॥ तस्यापादिकश्चिद्विद्य
मानानेवायपस्माररराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनादिदोषान् प्रकाश्य पे
मवंकेनेशति दूषयष्कन्यासौ सेतंदाप्यः ॥ मिथ्याभिलषुनेपुनरविद्यमानदोषाविः का
रणदूषणहेतौतेदापनीयः गोव्यतिरिक्तपशुगमनेशतंदाप्यः कुमारीनोत्क्रियमत्यावसा
यिनीऽप्रविशोऽयो ॥ सकामामकामांचगांवाभिगच्छत्यसौमध्यमसाहसंदंडनीयः ॥ साधार
णस्त्रीगमनेदंडमाह ॥ गच्छत्यतवर्तिते ॥ उक्तलक्षणावर्णोत्क्रियोदास्यत्ताएवस्वामिनी
शुश्रूषाहानिव्यक्तदासार्थंगृहएवस्था तस्यामित्येवंभुरूषांतरोभागनिरुद्धाऽप्ररुद्धः पुरु
षनियतपरिग्रहाभुजिष्याः यदीदास्यावरुद्धाभुजिष्यावाभवेयुस्तदातासुतस्यावराश्रु
द्वैरुपास्वैरिणीनामपिसाधारणस्त्रीणांभुजिष्याणांग्रहीणं ॥ तासुसर्वपुरुषसाधारण
तयागम्यत्वापिगच्छत्यंवाशन्यपणंदंडनीयः ॥ पदीपरिगृहीतत्वेनतासांपरदारत्वत्वा
त्॥ ऽरत्नेस्वस्वपृष्ठमुल्केनारहेन ॥ स्वैरिणप्राप्सणीवेश्यादासीनीचया ॥ गम्याऽस्फराश्रुत्तोम्य

तस्मिं योनिप्रतिलोमतइति च ॥ प्रवक्ष्ये दुष्टजिह्वा सदोषः स्यात्परदारव्रतगाम्या स्वैरिणी
नो पेयाद्यनन्तलोलान्यरिस्ता इति ॥ निष्कासिनी स्वाम्यनन्तलब्धा दासी ॥ ननु बाह्यैरिण्या
दिनो साधारण्यात् योगम्याभिधानमयुक्तः न हि नातिनः शास्त्रतो वा का ग्रन्थनलोके सा
रण्यविषयः उपलभ्यते ॥ तथा हि स्वैरिण्यो दीस्ययस्य वर्णस्त्रियपरन्त्र ॥ स्वैरिणी या पतिं हित्वा
सवर्णं कामतः श्रयेत् ॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमत इति स्मरणात् ॥ न
च वर्णस्त्रीणां पत्यो जीवति मृते वा पुरुषान्तरोपभोगो दृष्टो न ॥ दुःशीलः कामवृत्तो वा
गुणैर्वापि विवर्जितः ॥ परिचर्यः ॥ स्त्रिया साध्व्या सततं देववत्पतिः ॥ कामं तु क्षपयेद्देहं पुष्प
मूलफलैः शुभैः ॥ न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु इति निषेधस्मरणात् ॥ ना
प्य कन्याया अस्या याः साधारण्यं पित्रादिभिः परिरक्षिताः कन्यायाः एव ज्ञानोपदेशात्
दात्रभावे पितृच्यावि भ्रायाण एव स्वयंवरोपदेशात् ॥ न चादृशी भावात् धर्माधिकारच्यु
तिः पारतंत्र्यं हि दास्ये हन्ति स्वधर्मपरित्यागः नापि स्वैरिण्याः साधारणी ॥ वर्णानुलो

323

मजव्याप्तिकरेणागम्यजात्यंतराभावात् ॥ तदंतःपातित्वे च पूर्ववदेवागम्यत्वं प्रतिलोम
स्याश्च तासामनंतरागम्यत्वं ॥ अतः परपुरुषांतरोपभोगेनासां निर्दिष्टकर्माभ्यासेन चाति
त्यात्पतितसंसर्गस्य च निषिद्धत्वाच्च सकलपुरुषोपभोगेनासां निर्दिष्टकर्माभ्यासेन वा
[illegible]योग्यत्वं ॥ सत्यमेवं ॥ किंत्वत्र स्वैरिण्यादेरुपभोगे प्रायश्चित्ताद्यदर्शनात् सकलजनैरदंडभावादिदृष्ट
दोषाभावादगम्यत्वं वा ॥ योगीन्द्रः इच्छाभावस्यावस्थानात्तदासां सोपाधित्वेन नियतत्वं ॥ पुरुषापरि
ग्रहोपाधित्वेन दंडविधानात् ॥ तदुपाविरहितास्त्वगम्या इत्यनुमन्तव्यं ॥ स्वैरिण्यादीनां पुनर्दंडाभा
वात् ॥ स्त्रियां भुंजतो मुक्तदोषेन किंचदपि शायपादेति लिंगदर्शनाच्चावगम्यते ॥ शापाक्षिप्तं
तस्य धर्म्मसंबंधनमित्यगम्यानां गमने वा विशेषाद्भवं त्वेव ॥ यस्तु नवेश्यानां जात्यंतरा
संभवेन वर्णोत्तेः ॥ पातित्रमनुमानात्तदुक्तं वेश्या वर्णानुलोमाद्युक्ताः ॥ पातित्यो मुख्य
जात्या अपभ्राह्मण्यादि रणादिविवादे इति तत्र कुंडगोलकादिभिरनेकानि कल्पा ॥ अतो वे
श्यात्वात् ॥ कामविशांति नादिवेश्यापामुत्कृष्टजातेः समानजातेर्वा पुरुषोपस्पृत्रापु

द्रसंभोगवर्तिवैश्यापि ब्राह्मण्यादिवल्लोकप्रसिद्धिवलादभ्युपगमीतीयं ॥ नचवर्निमू
लेयंप्रसिद्धिः स्मर्यतेहि स्कंदपुराणे ॥ पंचचूडानामकाश्चनाप्सरसस्तत्पतिर्वैश्या
श्यापंचमीनालीरिति ॥ अतत्ताशोक्तिपत्तपुरूरवसिणनाविधुरत्तायासनोकृहजाति
पुरूरभिगमत्तेताद्दृशाराबोनाविडः ॥ तानामुचातवद्धासगछंतां पुरुषाणां पद्मापि
नेदोपिनदंडइस्यथाप्यदृस्यदाप्यस्तेवबदारानिरतः स्यादितिनियमात् ॥ पशुवेश्यां
भिगमनआपत्यंविधीयतइतिप्रायश्चित्तस्मरणाच्चेतितिरवधं ८० ॥ प्रवदूद्दासदासी
श्चित्यनेनेत्यैरिण्यादिभुजिष्याभिगमेदंडविधानात् ॥ तासांभुजिष्यास्तुदंडानांत्वीस्यच्यो
कुलं ॥ तस्यापवादमाह ॥ पुरुषसंभोगनोविवासदासोत्वैरिण्यादिपशुकदानाविरहेणपू
मलवलात्कारेणाभिगछतो दशपणोदंडः ॥ यदिवहवएकामिनिष्ठंतिवलात्कारेण
भिगछंतिमपिवलाद्गंसेतितदातेषामदोषाः ॥ यदिदेयाध्याघाभिभवत्तस्यानस्यात् व्या
धितासज्जयात्स्यग्नाराजमकर्मपरायण ॥ प्रामंत्रिताचेद्गछेदंयावडकास्मतेतिना

१।

रक्षोवचनात्॥ यदा शुल्कं गृहीत्वा तस्यापि नेच्छति तदा शुल्कं द्विगुणं वहेत्। अनि
च्छन्दद्यात् शुल्कोपि शुल्कहानिमवाप्नुयादिति तेनैवोक्तं तथा चान्योपि विशेषस्तेनैव
दर्शितः॥ अपराधं तस्याः शुल्कमनुभूयमानं विवे॥ अक्रमेण च संगच्छन् छिद्याद्दंतान्नखा
न्छिनि॥ अथ यानो वाभिगच्छेद्यो बहुभिर्वापि समेत्य। शुल्कमष्टगुणं दाप्यो विनयं तौ देवत
वेश्याप्रधाना यैतत्र कामुकास्तत्रानुहारिषिताः॥ तत्समास्तेषु कार्येषु निर्णयः संशये विदुरिति
किंच॥ यस्त्वयोनौ योषमभिगच्छेत् तत्पूर्वसाभि मन्त्वो मेहसित्तप्रव्रजिनी वा गा
च्छति॥ असौ चतुर्विंशतिपणं न दंडनीयः॥ किंच॥ अंत्यावडालीतद्रुम नेत्रत्रैवर्णि
कान्सायच्छित्तानभिमुखान्सहस्रं त्वंत्यजस्त्रीयइत्ति मन्त्रवचनात्पणसहस्रं दंड
यित्वा कवंधेन वकुत्सितः तबधेनभगाकारेणांकयित्वा स्वराष्ट्रान्निर्वासयेत्॥ सा
यच्छित्ताभिमतस्य पुनर्दंडनाच॥ शूद्रः स्पुन स्त्रीडानाभिगोतमे अंत्यस्यैवं चांडालस्य
वमवति॥ असजस्य पुनस्त्रीडालादेस्तु वत्स्कष्टमातिस्मानिगमवधएव इति श्रीणि

संग्रहणप्रकरणे ॥ व्यवहारप्रकरणमध्ये स्त्रीपुंसयोगाख्यम ॥ मथ्यपरा विवाद
पदं मनुनारदा~~समुच्यते इतिमनुरप्याह~~भ्यां विवृतं ॥ तत्र नारदः ॥ विवाहादिविधि
स्त्रीणां यत्र पुंसोश्च कीर्त्यते ॥ स्त्रीपुंसयोगसंज्ञं तद्विवादपदमुच्यते ॥ इति मनुरप्या
ह ॥ अस्वतंत्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशं ॥ विषयेषु च सज्जन्त्यः संस्थाप्या
आत्मनो वशा इति ॥ यद्यपि स्त्रीपुंसयोः परस्परमार्थिप्रत्यर्थितया नृपसमक्षं व्य
वहारो निषिद्धस्तथापि प्रत्यक्षण कर्णपरंपरया वा विद्यमानयोः परस्परातिचा
रे दंडादीनां दंपती निजधर्ममार्गे राज्ञा स्थापनीयो ॥ इतरथा दोषभाग्भवतीति व्यवहा
रप्रकरणे राजधर्ममध्ये स्त्रीपुंसधर्मज्ञानस्योपदेशः ॥ एतच्च विवाहप्रकरणे[illegible]ए
एवसप्रपंचं प्रतिपादितमिति योगीश्वरेण पुनरत्र नोक्तं ॥ सांप्रतं कीरणकारव्यं व्यवहारप
दमुच्यते ॥ तं तत्र लक्षणं च कथितं नारदेन प्रकीर्णके पुनर्ज्ञेया व्यवहारा नृपाश्रयाः ॥
राज्ञामाज्ञाप्रतीघातस्तत्कर्माकरणं ॥ यथा पुनः प्रदानं भेदश्च प्रकृतीनां तथैव च ॥

१६५

पाखंडिनैगमश्रेणीगणधर्मविपर्ययाः पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः प्र
तिग्रहणं लोपश्च कोपः प्राश्रमिणामपि वर्णसंकरदोषश्च तद्वृत्तनियमस्तथा नदृष्टं
यच्च सर्वेषु सर्वं तत्प्रकीर्णकमिति प्रकीर्णं वर्त्तमानानां प्रतिकूलानां प्रास्थाप्य व्यवहा
रनिर्णयं कुर्यात् एवं च वदतां योऽन्यायाश्रयो व्यवहारस्तत्प्रकीर्णकमित्यर्थोऽत्राक्षेतं भव
ति तत्रापराधविशेषेण दंडमाह राजदत्तश्च समे निर्नयस्य वापरिमाणात्तन्यूनत्वमा
धिक्यं वा प्रकाशयन् शाशामं यो लिखेत्तियश्च पारदारिकं चौरं राजगृहीत्वा राज्ञे नर्प
यित्वा मुंचति तावुत्तमसाहसं दंडनीयौ ९ प्रसंगान्न्यायाश्रयव्यतिरिक्तव्यवहारविष
यमपि दंडमाह पुत्रपुरीषादिनाभक्ष्यानार्हैर्ब्राह्मणं दूषयन्लवणादिमिश्रणेन स्व
रूपेण वा दूषयित्वा ब्रादिपित्वोत्तमसाहसं दंड्यो भवति क्षत्रियं पुनरेवं दूषयित्वा
मध्यमं वैश्यं शूद्रं वापि प्रथमं शूद्रं दूषयित्वार्धसाहसं दंड्यो भवतीति संबंधः लशुना
द्यभक्षणदूषणे तु दोषतारतम्याद्दंडतारतम्यं ऊहनीयं ११ किंच रसवेधाद्यपा

१६५

वशाशान्कूटं जनादिव्यवहारि च तेषु च सर्वे प्रत्येकं नासाकर्णकरैस्त्रिभिरंगैर्हीनाः कार्याः २

हितवर्णोत्कर्षः स्वर्णव्यवहारशीलो यः स्वर्णकारादिः यश्च विमांसस्य कुत्सि
तमांसस्य भारिसंबंद्धस्य विक्रेता यशोऽन्नेन सोनकारिः वशारांच्च ग्रंगच्छेदनमुचितं
उत्तमसाहसं दंड्यश्चाप्याः यस्तु नर्मनुनोक्तं सर्वकंटकपापिष्ठं हेमकारं तु पार्थिवः
प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैरिति मनुनात्तु देवस्त्रा ब्राह्मणस्वर्णविषय
विशेषे दंडाभावमाह वत्तुष्य दोर्गोगमादिभिः कृतो यो दोषामनुष्यमारणादिरूपो
योगवादिश्चाभिनानभवति प्रयसारा तिप्रकार्षणे चैव भौषमाणस्य तथा लोष्टल
कुटसा घकपाषाणेन वा दुःखनावुग्भेन च युगं वहतोऽश्वादिनाहतो यः पूर्वोक्तो दोषः
सापि काष्ठेदीप्पनप्रास्यतोन भवत्यधमरे तिप्रजल्पितः काष्ठ धुह्नो पणेनाहितो यं
दोषाभावकथने दंडाभावं प्रतिपादनार्थं प्रायश्चित्तं पुनरबुद्धिपूर्वकेरण निमित्त
मात्रेव काष्ठादि ग्रहणे चशांतिनोमरादेरुपतन्त्वसूर्णोर्थं २४८ किंच तासिभवा
रर्जुनस्यापिछिन्नारा कटवली वर्द्धनस्या रजे र्यस्मिन्याने तछिन्नस्य वाकदादितेनत्त

१६५

थाभग्नयुगेन। आदिग्रहणाद्भग्नाक्षचक्रादिना च यथा। तेन पश्चात्पृष्टतो ऽयसरश्मीच्छेदाद्वा
तिर्यगपगच्छता प्रतिमुखं गच्छता च मनुष्यादिहिंसने तत्स्वामी प्राजको वाबभाग्भवति। प्र
तस्य प्रजानितत्वाद्धिंसस्य तथाह मनुः। छिन्ननास्ये भग्नयुगे तिर्यक्प्रतिमुखागते। अक्ष
भंगे च यानस्य चक्रभंगे तथैव च। छेदने चैव यंत्राणां योक्त्ररश्म्योस्तथैव च। आक्रंदे चा
प्यपेहीति न दंडं मनुरब्रवीत्। उपेक्षायां मिनो दंडमाह। अप्रवीणप्राजकप्रेरितैर्द्दु
भिर्गजादिभिः। शृंगिभिर्गवादिभिर्वध्यमानं समर्थोपि स्वामि यद्यामोक्षयन्। उपेक्षितं तदा
ऽनुशालप्राजकनियोजनानिमित्तं प्रथमसाहसं दंडं दद्यात्। यदा मारितो हे मामेति विक्रु
शुपि न मोक्षयति तदा द्विगुणं। यदा पुनः अप्रवीण एवं प्रयोजकः प्रेरयति तदा प्राजक एव
दंड्यो न स्वामि। यथाह मनुः प्राजकः क्वचिद्दुर्वेशासः प्राजको दंडमर्हतीति। प्राजकोऽयोग्ना प्रा
प्तोऽभियुक्तः। प्राणिविशेषाच्चादंडविशेषकल्पनीयः। यथाह मनुः मनुष्यमारणे क्षिप्रं
चौरवत्किल्विषी भवेत्। प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु। क्षुद्रकाणां पशू

नांतु हिंसायां द्विसतो दम । पंचाशत्तमभवेद्दंडः । मृगेषु मृगपक्षिषु । गर्धभाजाविनां तु दंडः स्या
त्पंचकमांशकः । माषकस्तु भवेद्दंडः । श्वसूकरनिपातने इति । स्वदेशीकलंकभयात्तजारं
पारदारिकं चौरं निर्गच्छेति प्रभिवदन् पंचशतेपणान् शास्ता नियम्मिन्दमेसततयो लस्ते
दमंस्तदाप्यः । यः पुनर्जारहस्ताद्धनमुपजीव्य डको पद्रूपेण गृहीत्वा जारं मुंचत्यसौ याव
दृष्टी तं तावद्दृष्टगुणीकृतं दंडं दाप्यः । किंच राज्ञोऽनिष्टस्यानभिमतस्य मित्रस्यैव त्वादेः
प्रकर्षेण भूयो भूयो वक्तारं लस्यैव वशात् आक्रोशकारिणं शीलंहारं मित्रकर्णेजपं तस्यो
तदीयस्य च मन्त्रस्य स्वराष्ट्राभिन्नहेतोः परस्य राष्ट्रे पत्रोक्षेपकरस्य वा । मेत्तामित्रक
र्णेजपं तस्य । जिह्वामुत्कृत्य स्वराष्ट्रान्निष्कासयेत् । कोशापहारणादौ पुनर्वधः । शासको
शापहर्तुः श्वपतिकूलेषु च स्थितान् । घातयेद्विविधैर्दंडैररीणां चोपकारिणः । मनस्मरणं
त्रिविधैः सर्वस्वापहारांगच्छेदवधरूपैर्दिव्यर्थः सर्वस्वापहारिणं पियघस्यजीवनोपकार
स्यणत्नापहर्तव्यं । चौर्योपकरणं विनापहारेणारक्षः । प्राप्तधान्याग्रुधीयानां वाहासहीन

ब्राह्मणस्य पुनः नशारीरो ब्राह्मणे दंड इति निषेधाद्धन्यान् शिरोमुंडनादिकं कर्त्तव्यं २

वासजीवानां वेश्यास्त्रीणां मलंकारान् । या धान्तो धादितद्दिसां ॥ यद्यपस्यापकरणेन जीव
त्तिकाहकाः सर्वस्वहरणेष्वेतत् राजा हर्तुमर्हतीति । ब्राह्मणस्य वधो सोऽयं पुरोन्निकवी
सनोर्केने । ललाटे चाभिशस्तांकः । प्रयाणं गर्दभेन । स्वितिमनुस्मरणत्व । किंच मसंतवारी
रसंबंधिनो वस्त्रमात्यादौ दार्विकेन्तः गुरोः पित्राचार्यादेस्ताडयितुः तथा राजानुमतिं विना
यानेगजाश्वादि आसने सिंहासनाद्यारोहितस्योत्तमसाहसो दंडः ॥ किंच यः क्रोधादिना वर
स्य नेत्रद्वयं भिनत्ति । यश्चान्यो तिशास्त्री विग्रहादिस्तेभ्योऽतिरिक्तो राज्ञो द्विष्टमनिष्टं सव
त्सरं तेन वा राज्यच्युतिर्भविष्यतीत्यादिरूपमादेशं करोति । तथा यः शूद्रो भोजनार्थं
यज्ञोपवीतादिब्राह्मणलिंगानि धारयति तेषामष्टशतो दमः । अष्टौ पणशतानि यस्मिन् दमे
स तथोक्तः । श्राद्धभोजनार्थं पुनः शूद्रस्य विप्रवेषधारिणः । तप्तशलाकया यज्ञोपवीतं वपु
ष्यालिखेदिदमत्यंतलोके दृष्टव्यं । वस्त्वर्थं ब्राह्मणलिंगधारिणो वध एव । द्विजातिलिंगे
नः शूद्रान् घातयेदिति स्मरणात् । रागलोभादिना न्यायव्यवहारदर्शनस्य त्यावारस्य

B32

स धर्म्मो दृष्टेः प्रमेन तागतो भारि भिः सभ्यागवे चारितत्वेन शंक्यमानव्यवहारतादपुनः
स्वयं सम्यगिदं विचार्य निश्चितं दोषाः पूर्वसभ्याजयिसहिताः प्रत्येकं विवादे योदमः परा
जितस्य तं द्विगुणं दाप्याः ‖ प्रयासतेन्न दंडविधिपरत्वाद्वचनस्य गोणो त्रोभादिस्यादिश्लो
केनायोनिरुक्तं ‖ यदापुनः साक्षिदोषेव्यवहारस्य दुष्टत्वं तदा सर्व एव राजा सहिताः स
भ्याद्वोदंडनीयाः ‖ पादो गच्छति कर्त्तारं पादः साक्षिणमृच्छति पादः सभासदः सर्वान्पादो राजा
नमृच्छतीति वचनात् ‖ एतच्च प्राप्तकेराजादीनां दोषप्रतिपादनपरं न पुनरेकैकस्यैषचा
पादपूर्वस्य विभागायः यथोक्तं कर्त्तृसमायफलजननस्वभावत्वादपूर्वस्य ‖ न्यायेन निर्णीत
व्यवहारस्य प्रत्यावर्त्तने दंडमाह ‖ यः पुनः न्यायमार्गेण पराजितो वोद्ध्यान्यायेनाहं परा
जितोस्मीति मन्यते तमायान्तं कूटलेख्यादुपन्यासेन पुनर्द्धर्माधिकरणमधिष्ठितं धर्म्मे
णपुनः ‖ पराजयं तित्वा द्विगुणं दंडं दापयेत् ‖ नारदेनाप्युक्तं ‖ तीरितं चानुशिष्टं च यो मन्येत
विधर्मतः ‖ द्विगुणं दंडमास्थाय तत्कार्यं पुनरुद्धरेत् इति ‖ तीरितं साक्षिलेख्यादिनिर्णीतं

न्यायोपेतं कार्यो निवर्त्तितः । तदापि तस्य कारीक्षणेन धर्मेण स्थापनीयं । न्यायोपेप
अनुशिष्टं अदृष्टतद्दंडं पर्यंतं निर्णीतामित्यावत् । पश्चुनर्मनुवचनं । तारितं चानाशिष्टं यपत्र
कस्मिन्नमन्यते । कृतं तद्धर्म्मतोऽसेवं न तस्मात्सो निवर्त्तीयेदिति । नदर्थिनोरन्यतरवचना
द्यपहारस्याधर्म्मतो वृत्तस्वाग्रंकार्यो पुनर्दिष्टेण दंडं प्राप्तिस्तापूर्वकं व्यवहारं प्रवर्त्तयेन्न
पुनर्द्धर्म्मतो वृत्तत्वानिश्चये पि रागलोभादिना प्रवर्त्तनीयः इत्येवं परं । पश्चुनर्नयांतरे
णापि तं नपश्चेन राज्ञा न कृतं भवेत् । तदप्यन्यायाविहितं पुनर्न्यायेन निवेशाये द्विसित्म
रणात् । अन्यायगृहीतदंडं धनस्यागतिमाह । अन्यायेन यो दंडो राज्ञा लोभादिना गृहीत
स्तं त्रिंशद्गुणीकृत्तं । वारुणायेद्दामि तिसंकल्प ब्राह्मणेभ्यः स्वयं दद्यात् । यस्माच्च दंडस्त्रूपे
यावद्गृहीतमन्यायेन तावत्तस्मै प्रतिदेयं । इत्यरण्या ऽपहारदोषप्रसंगात् । अन्यायेन दंडग्र
हणापूर्वस्वामिनः सत्त्वविच्छेदाभावात् । इति भट्टोपाध्यायपदवाक्यनामात्मजश्रीमत्प
रमहंसपरिव्राजकविरानेश्वरभट्टारकस्य कृतौ कृत्तमि । तादृशातायोयाज्ञवल्क्याधर्म्म
शास्त्रविवृतौ द्वितीयोऽध्यायः समाप्तः २ शुभंभवतु ३०९५

मिताक्षीराः तृतीःऽध्यायः ३

१

श्रीगणेशाय नमः ॥ कृष्णाय नमः ॥ गृहस्थाश्रमिणां नित्यनैमित्तिकधर्मा उक्ताः ॥ अभिषेकादि
पञ्चगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्मा अपि दर्शिताः ॥ अथ नानाविधाधिकारसंकोचहेतु
भूताशौचप्रतिपादनमुखेन तेषामपवादः प्रतिपाद्यते ॥ अशौचं च अनेन कालेन स्नानाद्यप
नोद्यः ॥ पिंडोदकदानादिविधेरध्ययनादिपर्युदासस्य च निमित्तभूतः ॥ पुरुषगतकश्च
नातिशयः ॥ कथ्यते न पुनः कर्मानधिकारमात्रं ॥ अशुद्धा बांधवाः सर्वे इत्यादावशु
द्धशब्दाभिधानात् ॥ अशुद्धशब्दस्य च कर्मव्यवहारे अनाहिताग्न्यदीक्षितादावनधि
कारमात्रे प्रयोगाभावात् ॥ वृद्धव्यवहारमुत्पत्तिनिवेदनत्वाच्च शब्दार्थावगतेः
किंच यद्याशौचिनां दानादिनिषेधदर्शनात्तदयोग्यत्वमाशौचशब्दाभिधेयं कल्प
ते तर्हि उदकदानादिविधिदर्शनात्तद्योग्यत्वमप्यभिधेयं स्यात् ॥ तत्रानेकार्थत्व
कल्पनागौरवप्रसंगः ॥ तस्मादुपेक्षणीयोयं पक्षः ॥ तत्राशौचिभिः सपिंडाद्यैः कर्तव्यं तत्रा
ह ॥ ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ॥ अश्मशानादनुव्रज्य इतरो ज्ञातिभिः

386

१

सापिण्ड्याद्यैपस्कर्तव्यं ततावदाशौचं ततः यमस्मृतौ तथा गाथा जपद्भिर्लौकिकाग्निना ॥ सदृश
व्यवरुपेतश्चेदाहितारि तारितागम्यावर्तितार्थवत् ॥ ऊनेऽप्रपरिपूर्णे द्विवर्षे यस्मात्तादृ नद्विवर्षस्त्व
प्रेतं निखनेद्भूमाववटं कृत्वा निरग्निनान् पुनर्दहेदित्यर्थः ॥ नचसंस्कृत्याऽस्थिसंचयसुदक
मित्यादिभिः प्रेतो देहो न विद्यते तस्य उदकदानाद्यौर्ध्वदैहिकं कुर्यात् । अयं च गंधमाल्यानु
लेपनादिभिरलंकृत्य शुचौ भूमौ श्मशानस्थानादन्यत्रास्थिसंचयरहितायां वाहिग्रामा
न्निखनेन्नियमः ॥ यथाह मनुः ॥ ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः । अलंकृत्य शु
चौ भूमावस्थिसंचयनादृते । नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया । अरण्ये का
ष्ठवत्त्यक्त्वा क्षपेयुस्त्र्यहमेव चेति ॥ अरण्ये काष्ठवत्त्यक्तेत्यस्यायमर्थः ॥ यथा अरण्ये काष्ठं
त्यक्त्वोदासीना तत्र हृष्यते भवंति । तथोनद्विवर्षमपि बालानां तं भूमावुपरि त्यक्त्वा न हृष्यत्यस्मा
द्या द्यौर्ध्वदैहिके ब्रूदासीनैर्भवितव्यमित्याचायादि प्राप्तस्याद्वाद्यभावोऽत्र नदृष्टा ते न क्र
यते ॥ सच घृतेनाभ्यस्य यमगाथा गाथा पद्भिर्निधातव्यः । ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेदु

२

धि ॥ यमगोध्योगायमानोपमस्तकमनुस्य रात्रित्रियमस्यमरणं स्तु ॥ तत्तस्माद्दूनाद्विवर्षादितरः
कृतोऽहि द्विवर्षो यो सो ऽश्मशानयपन्न सानिमि: सापिंडैः समानोदकैश्चान्येष्टपुरःसैरस्नुगम्यो
नुगंतव्यः ॥ अस्मादेववचनाद्दूनद्विवर्षस्यानुगमननमनियतमिति गम्यते ॥ अनुगम्यवये
ऽपि चांसमीत्यादिपमस्तूत्कं यमदैवत्याश्चगाथा जनद्विः लौकिकेन संस्कृतेनाग्निनादग्ध
व्योयदि नातारणिमनास्ति ॥ तत्सभावेनुतत्मपितेनदग्धव्या नवलौकिकेनतस्यापि संपा
द्यकार्यमानार्थत्वेनोत्पत्ते ॥ लौकिकाग्निश्च चूडान्तामादिव्यतिरिक्तो ग्राह्यः ॥ चूडा
डान्ताग्निरमेध्याग्निः स्तु तकाग्निश्च कर्हिचित् ॥ पतिताग्निश्चिताग्निश्च न ग्राह्य अग्रदूरतो
विन ॥ इति देवलस्मरणत्वात् ॥ लौगाक्षिनाचात्र विशेष उक्तः ॥ तूष्णीमेवोदके कुर्या
त्तूष्णीं संस्कारमेव च सर्वेषां कृतचूडानाम् अन्यापीच्छया द्वयमिति ॥ अयमर्थः ॥ चूडाक
र्मोत्तरकालं नियमेनावन्यादकदानं कार्यं ॥ अन्यत्रापि नामकरणाद्दूर्ध्वं मकृतचूडेपी
च्छया प्रेतास्युदयकाम नपोदयमग्मुदकदानात्मकं तूष्णीं कार्यं ॥ अन्यत्रापि नाम

करणं दृष्टमकृतचूडो ऽदीनात्मकं तत्साध्यं कार्यं न नियमेनेति विकल्पः ॥ मनुनाप्यत्र विशेषो
दर्शितः । नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया । जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सती
ति । उदककरणसहायं साहचर्यादग्निसंस्कारस्याप्युपलक्षणम् । नात्रिवर्षस्येति वचनात्कुल
कुलधर्मापेक्षया चूडोत्कर्षेऽपि वर्षत्रयादूर्ध्वमप्युदकदाननियमो वगम्यते । नामादि
वचनाद्वर्षत्रयात्प्रागपि कृतचूडस्य तयो नियम इति विवेचनीयं । उपेतस्येत्यत्र उपनी
तस्यार्हि । आहिताग्नेरवक्तादाद्दयाक्रियया चाग्न्याहि प्रसिद्ध्या लौकिकाग्निनैव दाहः अ
प्रार्थवत्स प्रयोजनत्वा । अयमर्थः । यस्य कृते दहे ह्यनेकार्यकृद्वं प्रयोजनं संभवति भूमि
शोधन प्रोक्षणादि तत्कृपादेयं । यमुनन्नुदृष्टं प्रयोजनं । यात्रयोजनादृत्तन्निवर्तते । तदा
लौकिकाग्निविधाने नाहिताग्नेः स्वात्प्रस्याग्नि नाग्निशद विधाने नाहुत्तप्रयोजना
चाहादयनियादेरपि निवृत्तिरिति । अस्येतरस्य विधानं यद्धया सवल्केनोक्तं । आहिता
ग्निप्रयाणाद्दाह्यस्य त्रिभिरग्निभिः । अनाहिताग्निरेकेन लौकिकेनापनो जन इति न

३

चमूडेन श्मशानं प्रत्यग्न । छायानयनं कार्यं ॥ यत्प्रानपतिमूढो ऽग्निं न रूणकाष्ठं दद्याविषिद्धं ॥ प्रेतस्वेदि
सदा तस्यास चाधर्मेन लिप्यते ॥ ॥ इति यमस्मरणात् ॥ नयाश्वाद्रश्व स्तपनाद्यनंतरं क
र्तव्यः ॥ प्रेतं दहेच्छुभैर्गंधैः स्नापितं स्रग्विभूषितमिति वचनात् ॥ प्रचेतसोक्ते स्नानं प्रेतस्य
पुत्राद्यैव स्त्राद्यैः पूजनं ततः ॥ नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजेदिति किंचिद्देयमिति
शववस्त्रैकदेशं श्मशानवास्यर्थं देयं परित्यजेदित्यर्थः ॥ तथा प्रेतनिर्हरणे ऽपि मनुनावि
शेषो दर्शितः ॥ न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ॥ अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्प
र्शदूषिता ॥ अत्र च स्वेषु तिष्ठत्स्विति अविवक्षितम् अस्वर्ग्यादिदोषश्रवणात् ॥ दक्षिणेन मृ
तं शूद्रं पुरद्वारेण निर्हरेत् ॥ पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातयः इति वा ॥ तद्व्या
ख्यानात्तेनापि ॥ नग्नामाभिमुखं प्रेतं हरेयुरिति ॥ यदा प्रोषितमरणे शरीरं न लभ्य
ते तदास्थिभिस्त्रिभिः ॥ प्रतिकृतिं कृत्वा तेषामभावे पर्णशरीरे शौनकादिप्रोक्तमार्गे
ण प्रतिकृतिं कृत्वा संस्कारः कार्यः ॥ आशौचं चात्र दशाहादिकमेव ॥ आदितास्त्रिः

श्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शाववच्छौचमिति वसिष्ठस्मरणात् ॥ अनाहिता
ग्नेः स्तु त्रिरात्रं सुपिष्टैर्जलसंमिश्रैर्दधद्युः श्वतपात्रेनिना ॥ असौ स्वर्गायपत्नौ कापत्यादिस्तु
कासवां धवे ॥ एवं पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥ मानववचनात् ॥ ततस्त्रायमर्थः
नामकरणादूर्ध्वं द्विखननमेव न तु वीदहनादि ॥ ततऊर्द्ध्वं यावत्त्रिवर्षं वैकल्पिकम
ग्न्युदकदानं ततः परं यावदुपनयनं तूष्णीमेवाग्न्युदकदानं निपनवर्षत्रयादागपि
कृतचूडस्यानुपनयनादूर्ध्वं पुनराहिताग्न्यावत्तादाहं कृत्वा सर्वमौर्ध्वदेहिकं कार्यं ॥ अ
येतु विशेषः स्पनीयस्तस्य तौ किं काष्ठेनादाहः कर्तव्यः ॥ अनाहिताग्नेस्तु लौकिकाग्निना दा
हः ॥ यथासंभवं पात्रप्रयोजनं कार्यं ॥ संस्कारानंतरं किं कर्तव्यमित्यत आह ॥ सहामाद
ग्रामाद्बहिः स्नात्वा पेयुः पयं तपः ॥ अपनः शोशुचदघमनेनापित्र्यदिग्मुखो ॥ सहाम
द्दिवसादर्वाग्ग्रामद्दिवसादा स्नात्वा पः ॥ समानगोत्राः सपिंडाः समानोदकाश्च अपनः
शोशुचदघमित्यनेन मंत्रेण दक्षिणाभिमुखो अपो स्नुपयंति ॥ अपस्नुपगामनेनतस्त्र

यो जनन्मृतोदकदानविधिश्च मन्युपगमनं लक्ष्यते ॥ एवं मातामहाचार्ययोरनंतरं मुदक
दानस्यातिदेशादर्शनात् ॥ एतच्चायुग्मासु तिथिषु कार्यं ॥ प्रथमतृतीयपंचमसप्तमनवमे
षूदकक्रियेति गौतमस्मरणात् ॥ तच्च स्नानानंतरं कार्यं ॥ शरीरमग्निसंयोग्यानवे
क्षमाणः प्रवोऽभ्युपयंतीति शातातपस्मरणात् ॥ तथा प्रचेतसाप्यत्र विशेषो दर्शितः
प्रेतस्य बांधवा यथार्हमुदकमवतीर्य नोद्धर्षयेयुरुदकान्ते प्रसिंचेयुरपसव्यं यतो
पवित्रवाससो दक्षिणाभिमुखाः ॥ ब्राह्मणस्योदकं कृत्वा प्राङ्मुखोऽस्त्र राजन्यवैश्ययोरि
ति स्मृत्यंतरेऽपि तु ॥ यावत्याशौचदिनानि तावदुदकदानस्यावृत्तिरुक्ता ॥ यथा
हविर्भुजः यावदाशौचं तावत्प्रेतस्योदकं पिंडं च दद्युरिति ॥ यथा प्रचेतसाप्युक्तं
दिने दिने जलांजलीन्पूनाप्रदद्यात्प्रेतकारणात् ॥ तावद्वृद्धिश्च कर्तव्या यावत्पिंडः समा
प्यत इति ॥ प्रतिदिनमंजलीनां वृद्धिश्च कार्या ॥ यावद्दशमपिंडः समाप्यत एवं चं बो
गुरुलघुकल्पयोरन्यतरानुष्ठानेनापि शास्त्रार्थसिद्धिस्तथापि बहुत्वेऽशौ बहुत्वेन गु

रुत्तरकल्पेप्रवन्नुपपत्तेः॥ प्रेतस्योपकारातिशयोभविष्यतीतिकल्पनीयं॥ अन्यथागु
रुतरकल्पनाम्नानस्यानर्थक्यप्रसंगाच्च॥ वसिष्ठेनाप्यत्रविशेषोभिहितः॥ सव्योत्तरा
भ्यांपाणिभ्यामुदककर्मक्रियांकुर्वीरन्निति॥ वक्ष्यमाणानासकृत्प्रसेकनामगोत्रादिगु
णविशिष्टस्योदकंदानस्यासमानगोत्रेषुमातामहादिष्वतिदेशमाह॥ एवंमातामहा
चार्यप्रेतानामुपकारक्रिया॥ कामोदकंसखिप्रत्तास्वस्रीयश्वशुरर्त्विजां॥ यथासगोत्र
सपिंडानांप्रेतानामुदकंदीयते॥ तथामातामहानामाचार्याणांप्रेतानांनित्यमुदक
क्रियाकार्या॥ सखामित्रं॥ प्रत्तापरिणीतादुहितृभगिन्यादयः॥ स्वस्रीयोभागिनेयः॥
श्वशुरःप्रसिद्धः॥ ऋत्विजोयाजकाः॥ एषांसख्यादीनां कामोदकंकार्यं॥ कामइच्छा
कामेन॥ उदकदानेकामोदकंप्रेतास्युदकपकामनायांउदकंदेयमसत्यामदेयमित्यका
रणेप्रत्यवायोनास्तीत्यर्थः॥ उदकदानेगुणविधिमाह॥ सकृत्प्रसिंचंत्युदकंनाम
गोत्रेणवाग्यताः॥ नद्योदकदानमित्यर्थंकार्यं॥ सपिंडाःसमानोदकाश्चमौनिनोभू

५

त्वा प्रेतस्य नाममंत्रेउच्चार्य ॥ अमुकनामप्रेतोमुकगोत्रस्तृप्यत्विति सकृद्द्वेवोदकं प्रसिंचेयु
स्त्रिवात्रिः प्रत्येकं कुर्युः प्रेतस्तृप्यत्विति प्रत्येतस्मस्मरणात् ॥ प्रतिदिनमेजलिवृद्धिस्तु
प्रदिपादितैव ॥ तथायमपि विशेषस्तैनैवोक्तः ॥ नदीकूलं ततोगत्वा शौचंकृत्वायथार्थ
वत् ॥ वस्त्रंसंशोधयेद्दारीततः स्नानंसमाचरेत् ॥ सचैलस्तुततः स्नात्वा कुचिमयतमा
नसः ॥ पापानांतत्प्राशायविप्रदद्यादशांजलीन् ॥ द्वादशक्षत्रियेदद्याद्वैश्येपंचदश
स्मृताः ॥ त्रिंशत्शूद्रदातव्यास्ततः संप्रविशेद्गृहं ॥ ततः स्नानंपुनः कार्यंगृहशौचंचका
रयेत् ॥ सपिंडानांमध्येकेषांचिदुदकदानप्रतिषेधमाह नब्रह्मचारिणः ॥ कुर्युरुदकं
पतितानच ॥ सत्यपिब्रह्मचारिणः समावर्त्तनपर्यंतं ॥ पतितास्त्वप्रवृत्तद्वि
जातिकर्माधिकारा उदकादिदानंनकुर्युः ॥ ब्रह्मचर्यात्तरकालस्वीमतानांसपिं
डानांदीनांउदकदानमाशौचंचकुर्यादेव ॥ यथाहमनुः ॥ आदिष्टीनोदकंकुर्यादा
व्रतस्यसमाप्त्यावीरित्यादिव्रतादिष्टिपनां ॥ समाप्तेतूदकंकृत्वात्रिरात्रमशुचिर्भवेदि

५

त्ति ॥ आदिष्टी ब्रह्मचारी अयोग्यानकर्म कुर्वी कुरु दिवा मा स्वाप्सीरित्यादिव्रतादेशयोगात् ब्रह्मचार्युच्य
ते । एतच्च पित्रादिव्यतिरिक्ते एवेति वक्ष्यति ॥ आचार्यपित्रुपाध्यायेनिस्यत्राचार्यः पुनरेवं मन्यते ॥ आदिष्टी
ति प्रक्रांतप्रायश्चित्तः कथ्यते । तस्यैवाप्युदककरणादिनिषेधः । प्रायश्चित्तरूपसमापत्सुनु --- लमुद
करणाशौचं विधिरिति ॥ तथा स्त्रीवादीनां चोदकदपित्वंनिषिद्धं ॥ स्त्री वाद्यानोदकं कुर्युस्तेना व्रात्या
विककर्मिणो ॥ ---- दुहश्चैव बहुगाप्यश्चैव यो षितः बहुगाप्यश्चैव यो षित्तेः ॥ इति वृद्धमनुस्मरणात्
एवमुदककरणे कर्त्त विशेषप्रतिषेधमुक्त्वा संप्रदानविशेषप्रतिषेधमाह ॥ पाखंड्यनाश्रिताः स्तेना
भर्तृघ्न्यः कामगादिकाः । सुरा आत्मत्यागिन्यो नाशौचोदकभाजनाः ॥ नरः शिलः कापालादिश्रुतिबाह्य
लिंगधारणं पाखंडं तद्येषां ते पाखंडिनः ॥ अनाश्रिता अधिकारे सत्यप्यकृताश्रमविशेषपरिग्रहाः ॥ स्ते
नाः सुवर्णस्तुतमद्व्यापहारिणः ॥ भर्तृघ्न्यः पतिघातिन्यः कामगाकुलयास्तथा ॥ आदिग्रहणाच्च स्वगर्भ
ब्राह्मणघातिन्यो गृह्यंते ॥ सुरप्यो यासां या प्रतिषिध्यतत्पानरताः ॥ आत्मत्यागिन्यः विषाद्युद्बन्धनाद्यै
रात्मानं यास्त्यजन्ति ॥ एते पाखंड्यादयस्त्रिरात्रे दशरात्रे वेति वक्ष्यमानस्याशौचस्योदकदानाद्यौर्द्ध्वदैहि

६

कस्यभोजने नान्न भवति ॥ भोजयन्तीति भोजनाः ॥ सपिंडो नामशौचादिनिमित्तभूतान्न भवत्यन्तस्त्
न्मरणे सपिंडो गृहकरीनामपि न कार्यमित्येतत्प्रतिपादनपरं वचनं ॥ अत्र कस्तुरप्यइत्यादिश्रुति
गमविवक्षितं ॥ अनुपादेयगत्वात् एतच्च बुद्धिपूर्वविषयं ॥ यथाह गौतमः ॥ प्रायोनाशक
शस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति ॥ प्रायो महाप्रस्थानं ॥ अर्थविषयं ॥ अनाशकमनश
नं गिरिशिखरादत्यापातप्रपतनं ॥ अत्र चेच्छतामितिविशेषणोपादानात्प्रमादमतेर्दोषो नास्तीत्य
वगंतव्यं ॥ अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः तस्याशौचं विधातव्यं कर्तव्या चोदकक्रियेत्यं
गिरः स्मरणात् ॥ तथा मनुविशेषादप्याशौचादिनिषेधः ॥ चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्यु
तादपि ॥ दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणां ॥ उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते ॥ नोपति
ष्ठति तत्सर्वमंतरिक्षे विनश्यति ॥ एतदपीच्छापूर्वमात्महननविषयं गौतमवचनेनेच्छापूर्वक
मवोदयकेनदतस्याशौचादिनिषेधस्योक्तत्वात् अत्रापि चांडालादुदकात्सर्पादित्येतत्साहचर्यद
र्शनाद्बुद्धिपूर्वकविषयत्वान्निश्चयः ॥ अतो दर्पादिना चांडालादीन्हंतुं गतो यस्तैर्मारितस्त

स्यायं सर्वत एवात्मानं गोवायेदि----तिक्रमनिमित्तापिंडदानादि निषेधः। एवं दुष्टदष्ट्यादिग्र
हणार्थमाभिमुख्येन दृष्ट्वा कृष्णू तो मरणेपं निषेधइत्य---द्येयं ग्रपंवाशौच प्रतिषेधो दशाहा
दिकाला चछिन्नस्यापि विप्रगोन्न पदत्तानामन्वतं वात्मघातिनामपि सद्यः शौचस्य वक्ष्यमाण
त्वात्। तथा दाहादिकमप्येषां न कार्यं न शौचं नोदकं नाश्रु न दाहाद्यंतक कर्म च ब्रह्मदंण
डदत्तानां च न कुर्यात्कटधारणमिति पमस्मरणात्। ब्रह्मदाउदत्ता ब्राह्मणदत्ता प्रेतवदन
साधनं षड्दादिके कट प्रारेनोच्यते। न चाहिताग्निमग्निभिर्दहतियज्ञपात्रैश्चेत्येतच्छ्रुतिवि
हिताग्नियज्ञपात्रादिप्रतिपत्तिलोपप्रसंगादयेस्मात्तौ दाहादिनिषेधोविप्रादिदत्याहिता
ग्निविषयं नास्कंदतीत्याशंकनीयं। मतस्याउत्नादिदत्ताहिताग्निसंबंधिनामग्नियज्ञपात्रा
णां समस्तंतर प्रतिपत्त्यंतरं विधीयते। वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु र
हेद्ग्नौ यजमानेवथामृते। इति तथा तच्छरीरस्यापि प्रतिपत्त्यंतरमुक्तं आत्मनस्त्यागिनोंना
हिताग्नीनां तथा क्रिया। तेषामपि तथा गंगातोये संस्थापिनं हिताग्नितिस्मरणात्। तस्माद

(347)

७

विशेषेन सर्वेषां दाहादिनिषेधः ॥ अतः स्नेहादिना निषेधातिक्रमे प्रायश्चित्तं कर्त्तव्यं ॥ कृत्वा
ऽग्निमुदकं स्नानं स्पर्शनं वहनं कथं ॥ रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति स्मरणात् त
च्च प्रत्येकं बुद्धिपूर्वं वेदितव्यं ॥ अबुद्धिपूर्वकरणे तु ॥ एषामन्यतमं प्रेतं यो वहेत् दहेत वा क
टोदकक्रियां कृत्वा कृच्छ्रं शांतपनं चरेदिति ॥ सर्वतो दंडहत्यं यः पुनः स्नेहं केवलं स्पृष्ट
मश्रुपातं वा पातितं(?) यदि ॥ पूर्वोक्तानाम् अकामी चेदेकरात्रमभोजननिमित्तस्पर्शाश्रुपातयोरुपवा
सत्रकः(?) ॥ असौ उद्धृत्याश्रितस्य तथा बंधनछेदने दहने वा नामैकाहाशौचं त्रिषवनं चेति सुमन्तुना
मैक्षाशित्वमुक्तं ॥ तदप्यशक्तस्यैव पूर्वमन्यान्यपि तद्विषयाणि स्मृतिव्याख्यानि व्यवस्थापनी
न्याश्रये वदाहादिप्रसिषेधो मुष्टानामसमर्थजीर्णवानप्रस्थादिव्यतिरिक्तविषयस्तेषामम्पन्नु
त्वादर्शनात् ॥ वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ॥ आत्मानं घातयेद्यस्तु भृग्वम्य
नशनांबुभिः ॥ तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः तृतीये तूदकं दत्त्वा चतुर्थे श्राद्ध
माचरेदिति स्मरणात् ॥ एवं येन नोपाधिना आत्महननं शास्त्रतोऽभ्यनुज्ञायते ॥ तद्व्यतिरिक्तः

मार्जे णात्मदर्शनेनश्राद्धादौ और्ध्वदैहिकेषु निषिद्धेषु किं पुनस्तेषां कार्यमित्यपेक्षायां वृद्धपाराशरवत्सरछाग
त्वेयाम्योपि शातव्यमन्नमेव सरः ह्लिणं । व्यासेनाप्युक्तं । नारायणं समुद्दिश्य शिवं वा यस्तु दीयते । तस्य शुद्धि
करं कर्म तद्भवेन्न तदन्यथेति एवं नारायणबलिः प्रेतस्य शुद्ध्यादनद्वारेण श्राद्धादिसंप्रदानत्वयोग्यतां नानय
त्यौर्ध्वदैहिकमपि सर्वं कार्यमेव । अतएव षाडशीमतेप्यौर्ध्वदैहिकस्याप्यनुत्साहे शूद्रपतोगौब्राह्मणहत्तानां
चपाततानां तथैव च । ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकमित्येवं संवत्सरादूर्ध्वमेव नारायणबलिं कृत्वौ
र्ध्वदैहिकं कार्यं । नारायणबलिश्चोत्थं कर्तव्यः । कृत्वा विष्णुश्चैकादश्यां विष्णुं चैव च तर्पयेत् । यथावदभ्यर्च्येति
त्सामेयमध्ये दशसु तोलेषु तिलमिश्रान् दशपिंडान् विष्णुरूपेण प्रेतमनुस्मरन् । प्रेतनामगोत्रमुच्चार्य दक्षि
णाग्रेषु दर्भेषु दक्षिणाभिमुखो दत्वा गंधादिभिरभ्यर्च्यापि प्रवहन्नदीं कृत्वा नद्यां प्रक्षिपेत् । नद्याद्यभावे
दद्यात् । ततस्तस्यामेव रात्र्यामयुग्मान् ब्राह्मणान् मंत्र्योपोषितः श्वोमध्याह्ने विष्णाराधनं कृत्वा कोदि
ष्टविधिना ब्राह्मणान् वा प्रक्षाल्य नाद्यादि दत्त्वा भोजयित्वा पिंडं यथा तेन वैष्णवेन मंत्रेण कृत्वा विप्र
वे विष्णुरूपाय यमाय प्रचयादि वारत्रये तान् चतुरः पिंडान् दत्वा नामगोत्रसादृतं प्रेतं संस्मृत्य विष्णो णमस्की
र्त्य पंचमं पिंडं दद्यात् । ततो विप्रान् नदक्षिणाभिस्तोषयित्वा तत् । मध्ये चैकं गुणवन्तमं मे तत्पुष्पाक्षतैः गोभू
हिरण्यादिभिरर्चयित्वा विप्रायेनं तोष्यततः पवित्रपाणिभिर्विप्रैः प्रेतोपात्तिनसहितमुदकं दापयित्वा स्वजनैः

रे नारायणबलिं कृत्वा सौवर्णनागं दद्यात् हांव वप्रत्यक्षा ततः सर्वमौर्ध्वदेहिकं कुर्यात्॥ नारायणबलिस्वरूपं च बैलस्वपणादते
प्रकारद्रष्टीलमाला धम्मसूक्तं पश्येत्

८

सार्द्धं चौरसर्पहतेस्त्वयं विशेषः संवत्सरं प्रावृत्तो भूत्वा तद्विधिनापंचम्यां नागकुलाविलावकूर्म
संवत्सरं वैतिथिः॥ विष्णुं समर्चयेद्देवार्घ्यमेवैवरक्तं तथा॥ दद्यात्पिण्डान् घृतान्त्यक्तान् दर्भेषु मधु
संयुतान्॥ तिलमिश्रान् प्रदद्याद्वै संयुतो दक्षिणामुखः॥ विष्णुः बुद्धौ समासाद्य नद्यं भसित्तत्त
क्षिपेत्॥ नामगोत्रं गृहीत्वा तु बध्वेरभ्यर्चनं तथा॥ धूपदीपप्रदाने च भक्तियोग्यं तथापरे॥ नि
मंत्रयेत्तु विप्रान्वै पंच सप्त नवापि वा विद्यातपः समृद्धान्वै कुलोत्पत्तान् समाहितान्॥ अपरेद्दे
निसंप्राप्ते मध्याह्ने समुपोषितः॥ आवाहनादि यस्त्रौ कं दैवपूर्वं तदाचरेत्॥ दद्यात्स्नात्वा तान्तौ
विप्रान्॥ तद्विंशत्यापद्यविधि॥ हविष्यव्यंजनैनैव तिलनापादैः सतेन वा पंचपिंडान्प्रदद्या
च्चदैवं रूपमनुस्मरन्॥ प्रथमं विष्णवे दद्यात् ब्रह्मणे शिवाय च॥ यमाय सानुचराय चतुर्थं
पिंडमुत्सृजेत्॥ मृतं संकीर्त्य मनसा गोत्रपूर्वं मनुस्मरन्॥ ततः पंचविष्णोर्नाम गृहीत्वैवं पंच
मं पूर्ववत्क्षिपेत्॥ विप्रान्नानावस्त्रविधिवद्दक्षिणाभिः समर्चयेत्॥ एकं [illegible] तमेव विप्रं द
रणेन समर्चयेत्॥ गवा तद्धिरण्यं भूम्या [illegible] प्रेतं तं मनसा स्मरेत्॥ ततः स्विन्नां भोविप्रा [illegible]

८

350

सोदूर्भसमन्वितैः ॥ क्षिपेमुपुष्पमित्रिरूर्वं तु नामवृक्षौ निवेशयेच्च यतंतंमनसास्मरेत्तु ततः स्वत्तांभो हवि
र्गंधाक्षतैस्तां मस्तितस्मै दुग्धः समाहित्ताः मित्रमन्त्रमनैः साईपश्चाद्धुनीत वाग्यतः । एवं विश्रुमतोस्थित्वायो
दद्याद्दात्मधात्तिने ॥ समुद्धरातित्तं क्षिप्रं नात्र कार्यविचारणम् ॥ सर्पदृष्टनिमित्तं सौवर्णं नागदानं प्रोक्त
कृत्तिरूपेणामुमंत्तुं ना भिहितं ॥ सुवर्णेन्नारिनिः पन्नंनागं कृत्वा त्तपेयेवगां ॥ व्यासोदत्वा निधिवत्त पि
तुरानृण्यमाप्नुयादिति ॥ एवंमुक्त्वा नंसा पत्वा नपवदे मुक्तानि त्तिहासैः प्रतनैः ॥ कृतमुदक
दानेयैस्तान्कृत्वो तोदकान् स्नातानूसम्यक्रुदकादुत्तीर्णान् दुःखार्त्तेन वोजतत्वणा प्रव
पावकैत्तेम्भागेसम्यक्स्थितानपुत्रादीन् कुलवृद्धाः प्रतनैः ॥ इतिहासैवक्ष्यमानलक्षणोरू
पवदेयु ॥ शोकनिरसनसमर्थैर्वचोभिर्वाधयेयुः ॥ शोकनिरवसनसमर्थंत्तिहासस्वरूपमाहः
मानुष्येकदलीस्तंभनिसारेसारमार्गणं करोत्तियः ससंमूढो जलबुद्बुदसन्निभे ॥ मनुष्यशब्देन
जरायुजांडजादिचतुर्विधं भूतजालंलक्ष्यते ॥ तस्यभावोमानुष्यंतत्रसंसरणम् इमित्येनकदली
स्तंभवदंतः सारहितेजलबुद्बुदावदविनस्वरे ॥ संसारेसारस्यास्थिरस्यमार्गणमन्वेषणंयः

करोतिससंमूढ ॥ अतस्त्वं त न शोचितः तस्मात्संसारस्वरूपवेदिभिर्भवद्भिरित्थं न कार्यं । किंच पंच
धासंभूतः कायोयदि पंचत्वमागतः कर्मभिस्वप्रारिरोत्स्यैस्तत्र का परिवेदना । तन्मातरपत्नी
मशरीरम्जनितैः कर्मबीजैः स्वफलभोगार्थं पंचधा पृथिव्यादिपंचभूतात्मकतया पंचप्रकार
संभूतो निर्मितः कायः स यदि फलोपभोगान्निवृत्तो पंचत्वमागत पुनः पृथिव्यादिरूपतां प्रा
प्तस्तत्र भवता का परिवेदना निः प्रयोजनत्वान्नाशोचनं कार्यं ॥ वस्तुनस्तथात्वात् नादेव
स्तुस्थितिर्हि क्रमेणैव प्रवर्तते ॥ किंच गंत्री वसुमती नाशमुदधिर्दैवतानि च ॥ फेनप्रख्यः क
थं नाशं मर्त्यलोको न याप्यति । नेदमाश्चर्यं मरणं नाम यतः पृथिव्यादीनि महान्त्यपि भूता
नि नाशं गच्छन्तीति । तथा समुद्रा अपि जरामरणावि[illegible]रहिता मरि अपि प्रलयसमये व
नाशं गच्छन्ति । कथमिमानास्थिरतया फेनसन्निभो मरणधर्मा भूतसंघो विनाशं न यास्यत्यवि
नमेव हि मरणधर्मिणं प्रपन्नपतो निः प्रयोजनशोकसमावेशः प्रतिदिनपादुकत्वाद
यावशोचनेन कार्यमित्याह श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोवशः ॥ अतो न रोदित

ध्येऽहि क्रियाः कार्याः स्वशक्तितः। यस्मादनुशोचद्भिर्बान्धवैर्वदननयननिर्गमितं श्लेष्मा
श्रु अवशोऽकामोऽपि प्रेतो भुंक्ते तस्मान्न रोदितव्यं किं तु प्रेतहितेच्छुभिः। स्वशक्त्यनुसारेण श्राद्धा
दिक्रियाः कार्याः॥ इति हंसकृत्याठेवुर्गं हं वा। ततः सर्वः विदंस्पानिवपत्राणि निपतन्द्वारि
वेश्मनः॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्॥ प्रविशेयुः समालभ्य कृत्वाश्मनि पदं श
नैः॥४॥ एवं कुलवृद्धवचांसि समाकर्ण्य तत्पश्चात् कासलोवालानग्रतः कृत्वा गृहं गच्छेयुः ग
त्वा च वेश्मनो द्वारि स्थित्वा निम्बपत्राणि संपतमनस्कानि वपत्राणि विदश्य दशनैः खंडयित्वा
चमने कृत्वाग्न्युदकगोमयगौरसर्षपानालभ्य दृहणात्म दूर्वाप्रवालमग्निं वृषभं चैवे
ति शंखोक्तेः दूर्वांकुरवृषभावपि स्पृष्ट्वाश्मनि पदं निधाय शनैरस्खलितं वेश्म प्रविशेयुः
प्रात्तरेश्माह। प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि इच्छतां तत्क्षणाच्छुद्धिः परेषां स्ना
नसंयमात्॥ यत्पूर्वोक्तं निंबपत्रदशनादिवेश्मप्रवेशान्तं कर्म तत्र च ये यत्तं स्नातीनाम
पि तु परेषामपि धर्मार्थं प्रेतालंकारकानिर्हरणादि कुर्वतां प्रभवति। प्रवेशनादिकमित्य

त्र॰ आदिग्रहणे मांगलिकस्नानानिलोमप्रक्रमाभिप्रायस्तेषां च धर्मार्थं निर्हरणे दोषप्रवृत्तानां तस्मा
त्स्याच्छुद्धिरित्यर्थः तामसपिंडानां स्नात्वा प्राणायामाभ्यासे च शुद्धिः ॥ यथाह पराशरः ॥ अनाथं ब्रा
ह्मणं प्रेतं ये वहंति द्विजातयः ॥ पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते ॥ न तेषामशुभं किंचित्पापं
वा शुभकर्मणां ॥ जलावगाहनात्तेषां सद्यः शौचं विधीयते ॥ स्नेहादिना निर्हरणे तु मनूक्तो विशे
षः ॥ असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत् ॥ विशुध्यति त्रिरात्रेण मातुरां॰प्तांश्च बांधवान् ॥
यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति ॥ अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसेदिति ॥ अ
त्रैवं व्यवस्था ॥ यः स्नेहादिना शवनिर्हरणं कृत्वा तदीयमेवान्नमश्नाति ॥ तद्गृहे च वसति
तस्य दशाहेनैव शुद्धिः ॥ यस्तु केवलं तद्गृहे वसति न पुनस्तदन्नमश्नाति तस्य त्रिरात्रं
यः पुनः निर्हरणमात्रं करोति मिति न तद्गृहे वसति ॥ न चाश्नाति तस्यैकाह इति ॥ एतत्सजा
तिविषयं विजातीयविषये तु यज्जातीयं प्रेतं निर्हरति ॥ तज्जातिप्रयुक्तमाशौचं कार्यं
यथाह गौतमः ॥ अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत् ॥ पूर्वो वावरं तत्र तदु

धोक्तमाशौचमिति उपस्पर्शनं निर्हरणं विप्रस्य शूद्र द्विनिर्हयागे मासमासौकं स्पृश्य विप्रानिर्हरणे द
शरात्रमित्येवं शावाशौचं कार्यमित्यर्थः ॥ ब्रह्मचारिणः प्रत्याह ॥ आचार्यपित्रुपाध्यायान्नि
र्हृत्यापि व्रती व्रती ॥ सकटान्नं च नाश्नीयात् न च तैः सह संवसेत् ॥ आचार्यश्चोक्तलक्षणः
माता च पिता च पितृत्वे प्रत्याध्यायाश्च पूर्वोक्तः ॥ एतान्निर्हृत्यापि व्रती ब्रह्मचारी व्रत्येव न त्व
न्यस्य व्रतभ्रंशः ॥ एकटशङ्के नाशौचे न लुप्यते ॥ तत्स्थ सह वा भिक्षितमन्नं शकटान्नं तद्ब्रह्मचारिणा
नाश्नीयात् नाशौचिभिः सह वसेत् ॥ एवं च वदता आचार्यादिव्यतिरिक्तप्रेतनिर्हरणे ब्रह्मचारिणो
व्रतलोपः इत्यर्थादुक्तं भवति ॥ अत एव वशिष्ठेनाप्युक्तं ॥ ब्रह्मचारिणः शवकर्मणा व्रतान्निवृ
त्तिरन्यत्र मातापित्रोरिति ॥ अशौचिनो नियमविशेषमाह ॥ क्रीतलब्धाशना भूमौ स्वपेयुः
[illegible]ते पृथक्क्षितौ ॥ पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयं ॥ क्रीतं मयाचितं लब्धं वाश
नं येषां ते क्रीतलब्धाशनाः अशनाम [illegible] वा कश्चिद्विशेषः ॥ क्रीतलब्धाशनानियमात्तद
न्नामे नाशनमर्थात्सिद्धं भवति ॥ अत एव वशिष्ठः ॥ गृहान्नवर्जं पित्र्याय प्रस्तरे त्र्यहमनश्न

तस्मात्सीरन्न ॥ कौतोत्पन्ने वा वर्तेरन्निति प्रथमपक्षे ॥ प्राङ्गुलोविनाशयनान्तेनार्थत्वस्यात्र मध
प्रक्षारस्ते च सपिण्डा भूमावेव वपेयुः कुशपीरन्नवेध्या दौ ॥ मनुनाप्यत्र विशेषो दर्शितः प्र
क्षारलवणान्नानि मस्जेयुः पृथक्पृथक् ॥ मासान्नि वचनात्स्त्रीणुः शरीरस्यैव यथाकल्पिता विति
तथा स्मृतौ तत्र नापि विप्रेषु वर्तयेः ॥ अथ शय्या या भोजनोपनयस्याप्यस्या ॥ सर्वदा इति तथा पिण्डप्रत्यय
स प्रकृतया प्राचीनावीती त्याहि रूपया प्रेताय दिनत्रये पिण्डरूपं मन्त्रं तृष्णीं ॥ हितो देयं
यथा स्मयाचितः ॥ प्रेते पिण्डं बहिर्दद्यात् ॥ दर्भमन्त्रविवर्जितं ॥ प्राग्दीयान्नं तु कृत्वा स्नातः
प्रयतमानसद्दत्ति ॥ तथा कर्त्तानियमश्चात्र स्यपरिशिष्टव्याहितेर्यः ॥ अशौचेत्र सगोत्रो वा
यदि वा पुनमान् ॥ प्रथमेहनि यो दद्यात्स दद्यादेसमापयेदिति ॥ तथा द्रव्यानियमश्च
स्त्रुतः स्तूवेन दर्शितः ॥ शालिना शक्तुभिर्वापि शाकैर्वाप्यपिनिर्वपेत् ॥ प्रथमेहनि यद्द्रव्यंत
देव स्याह दशाहिकं ॥ तस्मात्प्रत्येकं प्रथम्बं च यच्चान्दीयं तथैव चेतिपिण्डश्च पाबाणोदेया ॥ स्मैमासत्यं पिण्ड
पाणिपमुपलेवा दद्युरिति शंखस्मरणात् । नच दद्युरिति बहुवचनेनोदकदानवत्सर्वैः पिण्डदा

नैकार्यमित्याप्रोक्तनीयं किंतु पुत्रैरेव कार्यं तदभावे प्रत्यासन्नेन सपिण्डानामन्यतमेनं तदभा
वे मातृसपिण्डादिना कार्यं पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे त्विर्त्विगा
चार्यौ विति गौतमस्मरणात् पुत्रबहुत्वे पुनर्ज्येष्ठेनैव कार्यं सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु पत्नीकृतं
द्रव्येन चाविभक्ते न सर्वैरेव कृतं स्यादिति मरीचिस्मरणात् पिण्डसंख्यानियमश्च ब्राह्मणब्राह्म
णस्य दशापिण्डाः क्षत्रियस्य द्वादश वैश्याशौचादिनसंख्याया विष्णुनाभिहितं यावदाशौचं प्रेत
स्योदकं पिण्डमेकं च दद्युरिति तथा समन्त्यं तरेऽपि नवमिश्रद्वसेद्याः नवपिण्डाः समाहृ
तः दशमे पिण्डसूत्रं संत्रिशोषशुचिर्भवेदिति शुचित्वचवचनमपरेषु कृपमानत्राद्य
र्थं श्राद्धस्थाने मेत्रनानि प्रायेणायोगीश्वरेणानुपिण्डत्रयदानमभिहितं अनयोश्चानु
कल्पयोरुदकदानविषयोऽन्यवस्थासेया अत्रापरः शातातपोक्तो विशेषः
आशौचस्य बहुसपिण्डोऽन्दद्यादशैवत्रिरात्राशौचिनोपुनः पारस्करेण विशेषो दर्शि
तः प्रथमेऽह्नि बसेदेपाल्यवः पिण्डाः समाहिताः द्वितीये चतुरो दद्यादस्थिसंचयवं तथा

त्रीस्तु त्र्यहास्तत्री ये द्वियत्नरीन्त्वा। नयेत्तयेति॥ किंच। जलमेकाहमाकाशस्थाप्यक्षीरं च मृ
न्मये। जलं क्षीरं च मृन्मयपात्रद्वये पृथक् पृथगाकाशे शिक्यादौ वैकाहं स्थाप्यमित्यर्थः विशे
षामनुपादानात्प्रथमेहनि कार्यं। तथापारस्करवचनात्॥ एतन्नात्रस्नाहीन्तु दकं स्थाप्यं पि
व विदामत्ति क्षीरं तथास्थिसंचयनं प्रथमादिदिनेषु कार्यं॥ यथाह संवर्तः॥ प्रथमेह्नि तृती
ये वा सप्तमे नवमे तथा॥ अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति क्वचिद्द्वितीयेस्थिलंच
यइत्युक्तं वैष्णवे तु चतुर्थे दिवसेस्थिसंचयनं तेषां च गंगाम्भसि प्रक्षिपेत्॥ एतेनान्यतस्मि
न्नूह्निनेस्व गृह्योक्तविधिनास्थिसंचयनं कार्यं॥ अगारस्याचात्र विशेषो दर्शितः॥ अस्थि
संचयने कार्ये यागदेवानां परिकीर्तितः॥ अत्तोभक्तं तन्नयोद्धि यः शुचिर्नक्रयेति चेत्तत्॥ देवता
नां तु यजनं तत्र चैत्यपदेवता॥ देवताश्च श्मशानवासिन्यस्तत्र रुद्रादयः॥ श्मशानवासि
नो देवाः श्मशानां परिकीर्तिता इति॥ तेनैवोक्तं॥ एतत्स्याद्देवानचिरमत्तं प्रेतमुद्दिश्य धूप
दीपादिभिः भिः पिंडरूपेन वा तेन तत्र पूजा कार्येत्युक्तं भवति॥ तथाचपनं चदशमेहनि कार्यं

दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि चे

ति। देवलस्मरणात्। तथाऽस्मत्पेतरेपि द्वितीयेऽहनि कर्त्तव्यं क्षौरकर्म प्रयत्नतः। तृतीये

पंचमे वापि सप्तमे वा प्रदानतः इति। श्राद्धप्रदानादर्वाक् पूर्वमिति यावत्। वपनं च केषामि

त्याकांक्षायामापस्तंबेनोक्तमनुभाविनां च परिवापनमिति। अस्यार्थः। शावं दुःखम

नुभवंतीत्यनुभाविनः सपिंडास्तेषां चाविप्रोषे न वपनमुतात्यवपनलामित्यपेक्षया

मिदमेवोपपत्तिश्यते। अनुभाविनां परिवपनमिति। अनुपश्चाद्भवंतीत्यनुभाविनो ल्पवयसस्ते

षां वपनमिति। अनुभाविनः पुत्रा इति केचिन्मन्यंते। गंगायां भास्करक्षेत्रे मातापित्रोर्गुरो

र्मृते। आधानकाले सोमे च वपनं सप्तसु स्मृतमिति यमादिदर्शनात्। अशुचित्वेन सकलश्रौ

तस्मार्त्तकर्माधिकाराभावात् तौ प्रसक्तायां केषुचिद्ध्यनुज्ञानार्थमाह। वैतानोपासनाः का

र्याः क्रियाश्च श्रुतिनोदनात्। वितानोऽग्नीनां विस्तारः तत्र भवा वैतानास्त्रेताग्निसाध्या अ

ग्निहोत्रदर्शपूर्णमासाद्याः क्रिया उच्यंते। प्रतिदिनमुपास्यतइत्युपासनेः गृह्योग्निस्तत्र भवा

श्रौपासना ॥ सायंप्रातर्होमक्रियाऽऽच्यते ॥ ताश्चैतावैतानौपासनावैदिक्यः क्रिया कार्या कथं
वैदिकत्वमिति चेत् ॥ श्रुतिचोदनात् तथाहि यावज्जीवमग्निहोत्रं जुहुयादित्यादिश्रुति
भिरग्निहोत्रादीनां चोदराख्यघेव ॥ तथाह दक्षः स्वोक्ता ॥ कुर्याद्दन्त्राभावे केनचिद्दारकाशीरि
त्ति श्रुतौ योपासननियमोऽपि चोद्यते ॥ अत्र च श्रौतत्वविशेषणोपादानात् स्मार्तक्रियाणां
दानादीनामनुष्ठानमगम्यते ॥ अत एव वैयाघ्रपादेनोक्तं ॥ स्मार्तकर्मपरित्यागो राहोरन्य
त्रसूतके ॥ श्रौतकर्मनित्यकालेऽप्यातः शुद्धिमवाप्नुयादिति ॥ श्रौतानां कार्यत्वाभिधा
नं नित्यनैमित्तिकाभिप्रायेण ॥ तथाह पैठीनसि ॥ नित्यानि निवर्तेरन्वैतानवर्जं शा
लाग्नौ चैकइत्ति ॥ नित्यानि ॥ वर्तेरन्नित्यविशेषेणावश्यकानां नित्यनैमित्तिकानां निर
स्य प्रसक्तौ नांशे वैतानवर्जमित्यनेनात्यन्तावश्यकानामपर्युदासः ॥ शालाग्नौ चैक
इति गृह्याग्नौ भवानामावश्यकानां पाक्षिकः पर्युदास उक्तः ॥ अतानेन श्रौतं नात्यैव
काम्यानां पुनः श्रौचाभावादनुष्ठानमेव न प्राप्यते नैवाभिप्रायेणोक्तं ॥ प्रत्यूहेनाग्निषुक्रि

३६०

याइति ॥ अग्निशुश्रूषायामशक्तस्य होमादिस्थानात्मलाभ्यानां पंचयज्ञानां निवृत्तिः ॥ अत एव सं-
वर्त्तः ॥ होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ॥ पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनो-
रिति वैश्वदेवस्याग्निसाध्यत्वेपि वचनान्निवृत्तिः ॥ विप्रो दशाहमासीत वैश्वदेवविवर्जित
इति ॥ तेनैवोक्तत्वात् सूतके कर्मणां त्यागः ॥ संध्यादीनां विधीयत इति ॥ यद्यपि संध्यायानि-
वृत्तिः स्मर्यते ॥ तथाप्यंजलिप्रक्षेपादिकं कार्यं सूतके सावित्र्यांजलिं प्राक्षिप्य प्रदक्षिणं
कृत्वा सूर्यं ध्यायन्नमस्कुर्यादिति पैठीनसिस्मरणात् ॥ यद्यपि वैतानोपासनाः कार्या
इति सामान्येनोक्तं तथाप्यन्येन कारयितव्यम् ॥ अन्य एतानि कुर्युरिति पैठीनसिस्मर-
णात् ॥ बृहस्पतिनाप्युक्तं ॥ सूतके मृतके चैव अशक्तौ श्राद्धभोजने प्रवासादिनि-
मित्तेषु हावयेन्न तु हापयेदिति ॥ तथास्मार्त्तत्वेपि पिंडपितृयज्ञश्रवणात्कर्माङ्गश्रुत्या-
दिकं नित्यो होम कार्यत्वे सूतके तु समुत्पन्ने स्मार्त्तकर्म कथं भवेत् ॥ पिंडयज्ञं चरुं हो-
मम् असगोत्रेण कारयेदिति जातूकर्ण्यस्मरणात् ॥ यद्यपि सांगे कर्मण्यन्यकर्तृत्वेपि त

यापि स्वद्रव्यत्यागात्मकं प्रधानं स्वयं कुर्यात्। तस्यानन्यविद्याध्यत्वात्। अत एवोक्तं श्रौ
ते कर्मणि तत्कालं स्यात्तः शुद्धिमवाप्नुयादिति। यः पुनः हीने प्रतिग्रहोमः स्वाध्यायश्चानि
वर्तते इति। होमप्रतिषेधः स काम्याभिप्रायेण वैश्वदेवाभिप्रायेण वा व्यवस्थापनीयः। त
थात्र तत्कालं भोजनमपि न कार्यं। उभयत्र दशाहानि कुलस्यान्नं न भुज्यत इति यमस्मर
णात्। उभयत्र जननमरणयोः दशाहानि स्याच्छौचकालोपलक्षणम्। कुलस्य सूत
कयुक्तस्य सर्वस्यान्नं सकुल्यैर्न भोक्तव्यं। सकुल्यानां पुनर्न दोष। सूतके तु कुलस्यान्न
मदोषो मनुरब्रवीदिति तेनोक्तत्वात्। प्रपंचनिषेधो दातृभोक्त्रोरन्यतरजननमरणे
ज्ञाते सति द्रष्टव्यः। उभाभ्यामपरिज्ञाते सूतके नैव दोष सूतकं। एकेनैव परिज्ञाते भोक्तु
र्दोषमुपावहेदिति षट्त्रिंशन्मतेपि दर्शनात्। तथा विवाहादिषु सूतके स्यते। प्राब्रा
ह्मणार्थं पथ्य कृतमन्नं भोक्तव्यमेव। विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके पूर्वसंक
ल्पितार्थेषु न दोष परिकीर्तितः। इति वद्धन्मनुस्मरणात्। तथापरोपि विशेषः

षड्भिः श्राद्धमत्तो दर्शितः । विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके । परैरन्नं प्रदातव्यं भो
क्तव्यं तद्द्विजोत्तमैः । भुंजानेषु वा विप्रेषु त्वंतरा मृतसूतके । अन्यगेहोदकाचांताः स
र्वे ते शुचयः स्मृता इति । तथा शौचविपरीतत्वेपि केषुचित् द्रव्येषु दोषाभावः । लवणे
मधुमांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च । तिलौ
षधाजिने चैव पक्वापक्वे स्वयंग्रहः । पण्ये चैव कार्येषु नाशौचं मृतसूतक इति । पक्वं
मक्षजमान्नमपक्वं तोयदुग्धादि स्वयंग्रह इति । स्वयमेव ग्राह्यं न तु स्वातो ग्राह्यमित्यर्थः
पक्वापक्वाद्यन्नं तु सामान्यमत्र प्रवृत्तिविषयं । अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं भुक्त्वा
पक्वान्नमेतेषां त्रिरात्रं तु पयः पिबेदित्यंगिरःस्मरणात् । अन्नपक्वशब्दोभयव्यतिरिक्तौ
दनविषयः । शवसंसर्गनिमित्ताशौचेत्यंगिरसा विशेष उक्तः । आशौचं यस्य संसर्गादा
पतेद्गृहस्थितौदनाविषयः । शवसंसर्गनिमित्त मेधिनः क्रियास्तस्य न लुप्यंते गृह्या
णां न च तद्भवेत् इति । तदाशौचं च वत्सगृहमेधिन एव न पुनस्तद्गृहे भवानां भार्यादीनां

नद्युद्व्यापाणांवमवेदित्यर्थः॥ अतिक्रान्ताशौचेप्ययमेवार्थः स्मृत्यंतरेदर्शितः॥ प्रतिक्रांते
दशाहेत्वपरःज्ञाताति चेदूर्ध्वं त्रिरात्रं सूतकं तस्य नतरव्यस्य कार्दिचिदिति॥ एवमाशौचि
नाविधिप्रतिषेधरूपानुमिधायाधुनाशौचनिमित्तं कालनियमं चाह॥ त्रिरात्रं दशरात्रं च शा
वमाशौचमिष्यते॥ ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि॥ शावनिमित्तं शावसूतकं षष्ठे
नजननवाविना तन्निमित्तमाशौचं लक्ष्यते एवं च वदता जननमरणयोराशौचनिमि
त्तमुक्तं भवति॥ तच्च तन्मरणमुत्पन्नजातमेवनिमित्तनिर्देशो साक्षिमरणकृत्वा पुत्रस्य
जन्मचेत्यादिलिंगदर्शनात्॥ तथा॥ विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेदित्यादावाक्यारंभसामर्थ्यादुत्पत्तिमात्रापेक्षत्वेनाशौ
चकाल्पदशाहाद्याशौचकालानियमश्च तन्मते कएवेत्यभिदर्शनात्त्वातिमरणाश्रव
णे दशरात्राविशेषमाशौचमर्थात्सिध्यतीति॥ षष्ठेयंदशरात्रस्येत्यनारंभनीयं स्यात्॥ त
स्मात्तस्मिन्नेव जननमरणं च निमित्तं तज्ज्ञानं तयानिमित्तमप्याशौचं त्रिरात्रं वेत्यन्नेमन्वादिभिः

शाशौचप्रकरणे हंसदशरात्रिमदशाणां चाशौरात्रोपलक्षणार्थमन्यादिभिः रिष्यत इति वचनं
तदुक्तसपिण्डासमानोदकरूपविषयमेंदशदर्शनार्थं तथाहि दशाहं शावमाशौचं सपि
ण्डेषु विधीयते । जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतां । जन्मन्येकोदकानां तु त्रिरात्राच्छु
द्धिरिष्यते शावस्य विशुध्येत्तिःयहाज्जदकदापिनः इत्येतैर्वाक्यैस्त्रिरात्रदशरात्रयोः समा
नोदकसपिण्डविषयत्वेन व्यवस्थाकृतात्र सपिण्डानां सदा पुरुषाधिकानामविशेषेन
समानोदकानां त्रिरात्रमिति यत्पुनः स्मृत्यंतरवचनं । चतुर्थे दशरात्रं स्यात्षण्णिशाः
पुंसि मे षष्ठे चतुरहाच्छुद्धिः सप्तमे च्यहरेवाश्चिति तद्दिगीतत्वाच्चादरणीयं पद्यप्य जीवि
तं तत्थापि मधुपर्कांगपश्चालंभनवत् लोकविद्विष्टत्वाच्चानुष्ठेयं । अस्वर्ग्यं सर्वं लोका
विद्विष्टं धर्ममप्याचरेन्नेति मनुस्मरणात् । नवसप्तमेयेप्रत्यासन्नेसपिण्डएकादेवि
सकृत्सामादिषु समानोदकेषु त्र्यह इति युक्तं एवमविशेषेन सपिंडानामाशौचेप्रसक्ते
कश्चित्रियमार्थमाह । उ. नहि वर्षे तु न संस्थिते तु पौरेव मातापित्रोर्दशरात्रमाशौचं न

सर्वेषां सापिंडानां तेषां तु वक्ष्यति प्राग्दंतजननात्स्व ब्रह्मनासिध्यइति ॥ तथार्यैंस्पः गर्भ
स्थप्रेते मातुर्दशाहं जाते उभयोः कृते नाम्नि सोदराणां चेति ॥ यस्यवायमर्थः ॥ ऊनद्विव
र्षसंस्थिते उभयोर्मातापित्रोरेवस्य स्पृश्यत्वलक्षणप्राप्त सापिंडानां ॥ तथा च यस्यैत
रं ऊनद्विवर्षे प्रेते मातापित्रोर्नेतरेषामिति ॥ अस्पृश्यत्वमित्यभिप्रेतां इतरस्य पुनः क
र्म एवाधिकारलक्षणस्य सपिंडेष्वा दंतजन्मनं सद्य इत्यादि विहितत्वात् ॥ अत्र दृष्टां
तास्सूतकं मातुरेव स्पृश्यति यथा सूतकं जननानिमित्तमस्पृश्यत्वलक्षणं मातुश्चैव मातुरे
व केवलं तथा ऊनद्विवर्षे परमे मातापित्रोरेवास्पृश्यत्वमिति ॥ ऊनद्विवर्षसपिंडानाम
स्पृश्यत्वप्रतिषेधता अन्यत्रास्पृश्यत्वमभ्यनुज्ञातं भवति ॥ तथा च देवलः ॥ स्वसौचकाला
द्दिस्तेयं स्पर्शनं तु त्रिभागतः ऊर्द्ध्वं विद्रक्षत्रियविप्राणां यथा शास्त्रं प्रचोदितमिति ॥ ए
तच्चानुपनीतप्रयाणनिमित्ते ते क्रीं ताशौ चे च त्रिरात्रादौ वेदितव्यं उपनीतविषयेपि ते
नैवोक्तं ॥ दशाहादि त्रिभागे न कृते से च पतने कमात्स ॥ अंगस्पर्शनामाहं ते वर्णमात्वे

दर्शिनाः त्रिचतुः पंचदशाभिः स्पृश्या वर्णाः क्रमेण तु । भोज्यान्नो दशाभिः विप्रशो बाद्वित्रिष
डुत्तरैरित्ति घुन्तरैर्दशाभि -- तरैर्द्वादशाभिः षडुत्तरैः पंचदशानिरिविरह व्य । जननमित्ति
मिन्नमस्पृश्यत्वमाशौचमाह ॥ पित्रोस्तु सूतकं मातुस्तद्दसृग्दर्शनाद्ध्रुवं ॥ तद्दन्नप्रदुष्येत पूर्वे
षां जन्मकारणात् ॥ सूतकं जननामित्तमस्पृश्यत्वलक्षणमाशौचं पित्रोमातापित्रोरेवन
सर्वेषां सपिंडानां तच्चास्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यंतं स्थिरमित्यर्थः ॥ तत्र तद्दसृग्दर्शनात्
तस्याः संबंधित्वेनात्जादर्शनात् ॥ अत एव वाशिष्ठः ॥ नाशौचं विद्यते पुंसः संसर्गं चेन
गच्छति ॥ रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यत इति ॥ पितुस्तत्र ध्रुवं न भवति स्नानमात्रे
णास्पृश्यत्वं निवर्त्तते ॥ यथाह संवर्तः ॥ जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ॥ माता
शुद्धेद्दशाहेनेत्येतच्चासंव्यवहारयोग्य ॥ अर्हत्वार्थं षु पुनः ॥ कर्म पैठीनसिना विशेषुक्तः
सूत्रिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेत्प्रस्ते ॥ संस्पृतेस्तु ॥ इति कार्यास्तु स्नानमे
व विधीयत इति ॥ यस्मिन्नहनि कुमारजननं तदहर्न प्रदुष्येत् ॥ तत्र निमित्तं राद्याघिरा

७

पहारकनभवतीत्यर्थः ॥ तस्मात्तस्मिन्नन्निपूर्वेषांचित्रादीनां पुत्रा सूपेन जन्मतस्यावि
स्तस्मान्नदहनं प्रदुष्यति ॥ तथा च वृद्धयाज्ञवल्क्येनोक्तं ॥ कुमारजन्मदिवसे विप्रैः कार्यः प
तिग्रहः । हिरण्यभूगवाश्वाजवासः शय्यासनादिषु ॥ तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु न
भक्षयेत् ॥ भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रायणं चरेदिति ॥ व्यासेनाप्यत्र विशेष उक्तः
सूतिकावासनिलया जन्मदा नाम देवताः ॥ तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्त्तिता ॥
प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ॥ त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि ॥ मार्कं
डेयेनापि रक्षणीया तिथिः ॥ षष्ठी निशा तत्र विशेषतः ॥ रात्रौ जागरणं कार्यं जन्मदा
नी तथा बलिः ॥ पुरुषा शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः ॥ रात्रौ जागरणं कुर्युः दश
म्यां चैव सूतके इति ॥ आशौचमध्ये पुनर्जनने मरणे वा जाते प्रतिनिमित्तं नैमित्ति
कमावर्त्तत इति न्यायेन पुनः ॥ पुनरेशाशौचप्राप्तौ तदपवादमाह ॥ प्राक्तु जन्मम
मरणे शेषाहोभिर्विशुध्यति ॥ यद्यपेक्षया वायत्पावानाप्यो घाकाप्रष्टेरव्या लल्लदं

१७

त्तिरात्रं समस्ततो न्यूनस्य वाशौचस्य निमित्तिभूते जनने मरणे वा जाते पूर्वाशौचावशिष्टैरेवा
होभिर्विशुध्यति । न पुनः पश्चादुत्पन्नजननादिनिमित्तप्रत्यगाशौचं कार्यं । यदा पुनर्वर्त्तमा
नाशौचाद्दीर्घकालत्वाशौचमंतरापतति । तदा न पूर्वशेषेण शुद्धिः । यथाहोशना । स्वल्पाशौ
चस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यतीति । यमोप्याह
अघवृद्धिर्यदाशौचं पश्चिमेन समापयेदिति । अत्र चोत्तरा जननमरण इति । यथा विशेषो नाभि
हितः । तथापि न सूतकांतर्वर्तिनः शावस्य पूर्वाशौचशेषेण शुद्धः । यथाहांगिराः । सूतके
मृतकं चेत्स्यान्मृतके त्वथ सूतकं । तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकमिति । अथ ष
ट्त्रिंशन्मतेपि । शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन शुध्यते सूतिर्न सूतिः शा
वशोधिनीति । तस्मात्सूतकांतःपातिनः शावस्य पूर्वशेषेण शुद्धिः । किंतु शावांतःपातिन ए
व तथा सजातीयांतःपातिन एव तथा सजातीयांतःपातिष्वपि शावस्य क्वचित्पूर्वशेषेण न शु
द्धिरपवादः स्मृत्यंतरे दर्शितः । मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । पितुः शेषेण शुद्धिः स्या

-मत्तु कुर्यात्तु पक्षिणीमिति ॥ अयमर्थः ॥ मातरि पूर्ववृत्तायां तन्निमित्ताशौचमध्ये यदि पि-
तुरूपरमः स्नानदानतत्पूर्वशेषेण शुद्धिः ॥ किंतु पितुः प्रधाननिमित्ताशौचकाले नैव शुद्धिः
कार्या ॥ तथा पितुः प्रयाणनिमित्ताशौचमध्ये मातरि स्वर्यातायामपि न पूर्वशेषमात्रात् शुद्धिः ॥ किं-
तु पूर्वाशौचं परिसमाप्यैव पक्षिणीं जपेदिति ॥ तथाशौचसन्निपातकालविशेषबहुत्वोपप-
वादयोगोक्तमेणोक्तः ॥ रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिरिति ॥ अयमर्थः ॥ रात्रिमात्रावशेषे
पूर्वाशौचे यद्याशौचान्तरसन्निपातस्तर्हि पूर्वाशौचं समाप्यानन्तरं द्वाभ्यां रात्रिभ्यां शुद्धिः प्रभा-
ते पुनरवस्थाया रात्रेः पश्चिमे यामे जननाद्याशौचान्तरसन्निपाते तिसृभी रात्रिभिः शुद्धिः न पुनरवशे-
षमात्रेण ॥ शातातपेनाप्युक्तं ॥ रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहादिति ॥ इयं च शुद्धिः
सूतिकामग्निदं वर्जयित्वा ॥ इतरसपिण्डानां सूतकामग्निदं दित्वे स्पृश्यसंस्पृष्टित्वेन त्वघसंयदे सम-
रणाच्च प्रेतक्रियापुत्रः सूतकसन्निपातेपि न निवर्त्तत इति तेनोक्तं ॥ अंतदपुराणे जननास्पृश्या-
त्यान्मरणं यदि ॥ प्रेतशुद्धिस्तु कर्तव्या पिण्डदानेषु बांधवैः ॥ पारब्धे प्रेतपिंडे तु मध्ये चे जननं

370

भवेत्। तथैवाशौचपिंडास्तु शौचाद्यायथाविधिरिति। तथाशौचाशौचयोः संनिपाते प्रेतकू
पं कार्यं तुल्यन्यायात्। तथाजातकर्मादिकमपि पुत्रजन्मादिके ऽप्याशौचान्तरसन्निपातेऽपि कार्यमे
व। यथाह प्रजापतिः। आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः
पूर्वाशौचेन शुध्यतीति पूर्णप्रसवकाल जननाशौचमभिधायाधुना प्राप्तकालगर्भनिःसरण
निमित्तमाशौचमाह। गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्। स्रवतिर्यद्यपि लोके द्रवरूप
कर्त्तृके पामिस्पंदे प्रयुज्यते। तथाप्यत्र द्रवाद्रवरूपसाधारणस्रस्रुपैधाः। पतनेवर्त्तते कुतः द्रव
त्वस्य प्रथममासादेवासंभवात्। तत्र मासतुल्यानिशा इति बहुवचनानुपपत्ते गर्भस्रावे यावन्ते
गर्भग्रहणमासास्तत्समसंख्यानिशाः शुद्धेस्तु कारणमत्र त्रिस्रिया एव गर्भस्रावे मासतुल्यारात्र
यः स्नानं। स्नानमात्रमेव न पुरुषस्येति वृद्धवशिष्ठस्मरणात्। यत्तु नागौतमेन प्रदर्शितं त्रि
रात्रमुक्तं तन्मासत्रयादर्वाग्वेदितव्यं। गर्भस्त्रुपतने यथामासमचिरे तूत्तमेत्रयः। राजन्येतु चतूरा
त्रं वैश्ये पंचाहमेव तु। अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता। मरीचिस्मरणच्च। आचेरमास

त्रयादर्वाग्गर्भस्रावे सूतकमेवास्त्यस्नानान्तौ त्रिरात्रमित्यर्थः ॥ यत्तु चतुर्मासपर्यन्तं दृष्टव्यं ॥ स
प्तमादिषु पुनः ॥ परिपूर्णमेवाशौचं कार्यं तत्र परिपूर्णांगस्य जीवतो निर्गमदर्शनात् ॥ तत्र च
लोके प्रसवशब्द प्रयोगात् ॥ षण्मासाभ्यंतरे पावदर्भभावो न वेद्यते इति ॥ तदा मासमैत्त्वा सांदि
वसैः शुद्धिर्भविष्यति ॥ अत ऊर्ध्वं स्वजात्युक्तमाशौचं भविष्यति ॥ सद्यः शुद्धिः सपिण्डानां गर्भस्य प
तने सति ॥ मरीचिस्मरणात् ॥ यत्तु सपिण्डानां सद्यः शौचविधानं तद्वमत्तगर्भपतने वेदित
व्यं ॥ यत्तु नवशिष्ठवचनं ॥ ऊनद्विवार्षिके प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमिति तत्पंचमः
षष्ठयोः कठिनगर्भपतने विषयं ॥ अतएव मातुस्त्रिरात्रं स्यात् सपिण्डाशौचवर्जने ॥ यातेमातुर्य
था मासं पित्रादीनां दिनत्रयमिति मरीचिस्मरणात् ॥ सप्तममासप्रभृति सत्तजनने गोत्रमचे
वासपिण्डानां जनननिमित्तं परिपूर्णमाशौचं जातमृते ॥ वासपिण्डानां दशाहमिति हारीतस्मरण
त् ॥ प्रसूतके चैव दोस्यानाशौचस्यूतकेव दिनियारस्करवचनाच्च ॥ उदस्यानाशास्यूतिकायास्या
नादशाहमिति याज्ञवल्क्य ॥ सूतकवदिति ॥ शिष्टपरिमनिमित्तोदकदानरहितमित्यर्थः ॥ वहन्म

नुरपि। दशाहाभ्यंतरे बाले प्रमीते तस्या बांधवैः। शावाशौचेन कर्तव्यं सूत्याशौचं विधीय
ते इति॥ तथा स्मृत्यंतरमपि॥ अंतर्दशाहे पंचत्वं यस्य सूतकाहोभिरेवाशौचमिति॥ एवमादि व
चनानि च यथा लोचनयासपिण्डानां च जनननिमित्ताशौचसंकोचो नास्तीति गम्यते। यत्पुन
र्वृद्धिस्मृतिवचने॥ जाते मृते मृते जाते कुलस्य सद्यशौचमिति तच्छिन्नपरमनिमित्तस्याशौचस्य
स्नानाच्छुद्धिप्रतिपादनपरं न प्रसवनिमित्तस्य। तथा च पारस्करः। गर्भे यदि विपत्तिः स्याद्दशाहं सू
तकी भवेत्। सपिंडानां प्रसवनिमित्तस्यानियमान्नत्याज्य। जीवन्जातो यदि प्रेयात्सद्य एव विशुध्य
तीति प्रेताशौचे निःप्राप्ते। तथा हि शंखेनोक्तं॥ प्राङ्नामकरणात्सद्यः शौचमिति। यत्पुनः॥ व
कल्पायवचने॥ अनिर्वृत्ते दशाहे तु पंचत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यात् प्रेते नैवोद
कक्रियेति। तदपि वैरूप्येन समानार्थपदात्तु नष्टे तेनैव सूतकमिति। पाठत्वात् सूतकम
स्पृश्यत्वं नैवोपशान्तो भवतीत्यर्थः। अयं कायमर्थः। अंतर्दशाहे यदि शिशुः परमं त्वदा
न प्रेताशौचं यदि तत्र सपिण्डजननं तदा सूतकमपि नैव कार्यं। किंतु स्नानाशौचेनैव शुद्धिरिति

यत्तु वृद्धमनुवचनं ॥ जीवन् जातो यदि ततो मृतः सूतक एव तु सूतके सकलं मातुः
पित्रादीनां त्रिरात्रकमिति ॥ यच्च वृद्धप्रचेतोवचनं ॥ मुहूर्तं जीवितो बालः पंचत्वं यदि
गच्छति ॥ मातुः शुद्धिर्दशाहेन सद्यः शौचास्तु गोत्रिण इति ॥ तत्रेयं व्यवस्था ॥ जननानंतरं ना
भिवर्द्धनात् प्राक् मृते पित्रादीनां जनननिमित्ताशौचं दिनत्रयं सद्यः शौचं त्वग्निहोत्रा
द्यर्थं ॥ अग्निहोत्रार्थं स्नानोपस्पर्शनात् तत्कालशौचमिति शंखवचनात् ॥ नाभिवर्द्धनो
त्तरकाले तु शिशुप्रापने जनननिमित्तं पूर्णमाशौचं सपिण्डानां यावन्नाछिद्यते ॥ नालं ताव
न्नाप्नोति सूतकं ॥ छिन्ने नाले ततः पश्चात् सूतकं तु विधीयत इति जैमिनिस्मरणात्
मनुनाप्ययमर्थो दर्शितः ॥ रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ॥ रजस्युपरते साध्वी
स्नानेन स्त्री रजस्वलेति ॥ पूर्वभागस्यार्थो दर्शितः ॥ उत्तरस्य त्वयमर्थः ॥ रजसि निःसरणादु
परते निवृत्ते रजसि चतुर्थेहनि स्नानाच्छुद्धिर्भवतीति ॥ तदुक्तं वृद्धमनुना ॥ चतुर्थेहनि सं
शुद्धा भवति व्यावहारिकीति ॥ तथा च स्मृत्यंतरं ॥ शुद्धा भर्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला

दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यतीति॥ रजोनिवृत्तिकालोपलक्षणार्थं यदा रजोदर्श
नादारभ्य पुनः सप्तदशादिनाभ्यन्तरे रजोदर्शनं तदाऽशुचित्वं नास्त्येव॥ अष्टादशे त्वेकाहा
द्द्विरात्रं त्वेकोनविंशे त्र्यहात्ततउत्तरे त्र्यहाच्छुद्धिः॥ यथाहात्रिः॥ रजस्वला यदि स्नाता पुन
रेव रजस्वला॥ अष्टादशादिनादर्वागशुचित्वं न विद्यते॥ एकोनविंशतेर्वाक् एकाहं स्याद्द्व्यहं
ततः॥ विंशान्प्रभृत्युत्तमे त्रिरात्रमशुचिर्भवेदिति॥ यत्तु चतुर्दशादिनादर्वागशुचित्वं
न विद्यते तदूर्ध्वमस्त्यन्तरं॥ तत्र स्नानप्रभृतित्वमभिप्रेतं अतो न विरोधः॥ अयं चाशौचप्रति
षेधोऽपस्वविंशतिदिनोत्तरकालमेव प्रायशो रजोदर्शनं तद्विषयः॥ यस्याः पुनर्नरात्रं यौव
नाद्यैः प्रागेवाष्टादशदिनात्प्रादुर्भवेद्रजोनिर्गमनं स्यात्त्रिरात्रमेवाशौचं॥ तथा च तथा च यथा
वत्त्रिरात्रं स्नानादि॥ यथाहापस्तम्बः॥ रजस्वला त्रिरात्रमशुचिर्भवति॥ सा च नाञ्जीता नाभ्यं
जनीत॥ नाप्सु स्नायान्न दिवा स्वप्यान्न ग्रहान्निरीक्षेत॥ नाग्निं स्पृशेन्न रज्जुं सृजेन्न दन्तान्
धावयेन्न हसेन्न चाकिंचिदाचरेद्दिवसेन ग्रहान्निरीक्षेत॥ नाग्निं स्पृशेन्न रज्जुं सृजेन्न व

दंतान्॥ धावयेन्न हसेन्न चाकिंचिदाचरेद्दस्वर्धेण पात्रेण न पिबेदं जलिना वा॥ दारवेण वा
त्रेण लोहितायसेन वेति॥ विज्ञायतद्दत्तिविधिश्चस्मरणेन॥ रोगिण्यामपि विशेषश्चोक्तः॥ स्मृत्ये
स्मीयान्मन्मयेवाहश्चिनुक्तं॥ त्रिंशदिन्निरुपिनी रजस्वला चतुर्थेऽह्नि स्नात्वा ताम्रशुद्धिमवाप्नुयो
त्रदिति॥ परशरेपि विशेष॥ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला॥ पात्रान्तरिततोयेन
स्नानं कृत्वा व्रतं चरेत्॥ सिक्तगात्रा भवेदद्भिः सांगोपांग कथंचन॥ न वस्त्रपीडनं कुर्यान्ना
न्यद्वासश्च धारयेदिति॥ उशनसाप्यत्र विशेषो दर्शितः॥ ज्वराभिभूता या नारी रजसा च प
रिप्लुता॥ कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मना॥ चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं
मा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्॥ दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः
अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा॥ दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यतीति॥ अ
यं चातुरमात्रस्नानप्रकारोनुसरनीयः॥ आतुरे स्नानउत्पन्ने दशकृत्वो ह्यनातुरः॥ स्नात्वा
स्नात्वा स्पृशेदेनं ततः शुद्धेत्स आतुर इति पराशरस्मरणम्॥ यदा तु रजस्वलायाः सूतिका

376

पावामप्तिर्भवति ॥ तदायं स्नानप्रकारः ॥ सूतिकायां स्नातायां तु कर्पं कुर्वंति याज्ञिकाः ॥ कुं
भेसलिलमादाय पंचबीजेतथैवच ॥ पुष्पाणि रभिमंत्र्यापो वाचासुद्धिं लभेत नरः ॥ तेनैवस्ना
पयित्वा ह्यादृ येद्विधिपूर्वकमिति ॥ यत्तच्चरजोदर्शनं पुत्रजन्मादिसूर्योदयोत्तरकालमुत्पन्नं
तदा तद्दिवसप्रभृत्याशौचाहोरात्रगणना कार्या ॥ यदा तु रजन्यां रजोदर्शनपुत्रजन्मादि
जातं तदार्द्धरात्रात्प्राग्जननाद्युत्पत्तौ पूर्वदिवसस्यैकदेश्यापित्वेप्याशौ चस्य तत्प्रभृत्येव ग
णना कार्येत्येकः प्रकल्पः ॥ रात्रिं त्रेधा विभज्याद्यभागद्वये जननादौ जाते पूर्वदिनं ग्राह्यमि
ति ॥ द्वितीयकल्पः ॥ प्रागुदयादित्यपरः ॥ यथाह काश्यपः ॥ उदिते तु यदा सूर्ये नारीणां दृश्य
ते रजः ॥ जनने वा विपत्तिर्वा यस्याहस्तस्य पर्वरी ॥ उषसः प्राग्जो यस्यास्तदुद्धौ पूर्वकं दिनं ॥ प्र
हरे रात्रावधिः कालः सूतकादौ विधीयते ॥ रात्रिं कुर्यात्त्रिभागं तु द्वौ भागौ पूर्व एव तु ॥ प्रभातेन तु
ज्यते ऋतुसूतके ॥ रात्रावेव समुत्पन्ने मृते रजसि सूतके ॥ पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदि
तो रविरिति ॥ एतेषां च कल्पानां देशाचारानुसारतो व्यवस्था ज्ञेया ॥ इदं चाशौचमादि

ताग्नेस्तु परमे संमारदिवसप्रभृति कर्त्तव्यं ॥ अनाहिताग्नेस्तु मरणदिवसप्रभृतीति संचयनं तु प्र
योगपि संस्कारदिवसप्रभृतीति विवेचनीयं यथाह अंगिराः ॥ अनादिताग्नेमुत्क्रांते साग्नेः सं
स्कारः कर्मणः इति स्मरणदाहिताग्नेः पितरि देशांतरमृते तत्सुतादीनामासंस्कारात्संध्या
दिलोपो नास्तीपक्ष्यत इत्येयं ॥ तथाच पैठीनसिः ॥ अनग्निमत उत्क्रांते नाशौचं हि द्विजा
तिषु ॥ दाहादग्निमानेविं यथाविधि शास्त्रमृते सतीति ॥ सपिंडत्वादिना दशाहादिप्राप्तौ क
श्चित्तस्तु विशेषापवादमाह ॥ हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनां ॥ नृपोत्र क्षत्रियमात्रः
क्षत्रियादिकेग्रहणे अग्निदप्त्याहितिरथ्यामुपलक्षणार्थं ॥ विप्रग्रहणमेत्य जोपल
क्षणार्थं यत्तोर्हतानां संबंधिनो येसपि राजसेवा विशेषाद्धनादिभिः बुद्धिपूर्वमात्मानं ये
प्यापादयंति ते आत्मघातिनः ॥ आत्मघातिग्रहणं पापं अनाश्रितइत्येके यो गोयात पाति
तमात्रोपलक्षणम् ॥ तत्संबंधिनां चान्वक्षमनु तमक्षमन्वक्षं सद्यः शौचमित्यर्थः नपुनः
दशाहादिकं ॥ तथाच गौतमः ॥ गोब्राह्मणहतानामन्वक्षं राजक्रोधाच्चायुद्धे प्रायेमासक

२२

378

शस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति ॥ क्रोधग्रहणं प्रमादस्याप्यादित्वनिरासार्थं प्र
मुद्दग्रहणं प्रद्युहन्तस्यैकाह ॥ शौचमस्तीति ज्ञापनार्थं ॥ ब्राह्मणार्थे विपन्नायेषां बितां गोग्र
हेपि वा स्त्रीहवेपि हतानां च एकरात्रमशौचकमिति स्मरणाच्च ॥ एतच्च युद्धकाले स्नेनैव
व कालान्तरे विपन्नस्य समरमृह्य निहतस्य पुनः सद्यः शौच ॥ यथाह मनुः ॥ उद्यतैराहवे श
स्त्रैः क्षत्रधर्महतस्य च ॥ सद्यः संतिष्ठते यज्ञस्तथाशौचमिति ॥ स्नानविधि ॥ स्नातस्यैव जन
नादिना शौचनिमित्तत्वाज्जन्मादिदिनादुत्तरकालेपि स्नातेदशाहादिप्राप्तावस्यापवादमाह
प्रावित्ते कालशेषस्यात्स्पर्शे दत्वोदकं शुचिः प्रोपिते दशरात्रे शेषपक्षस्येन प्रथमदिवसव
सपिंडजन्मात्तनादिकं न स्नायते ॥ तस्मिन् सपिंडे कालस्य दशाहाद्यवच्छिन्नस्य पः शेषो वशिष्टः
कालः स एव शुद्धिहेतुर्भवति ॥ दर्शे पुनराशौचकालेदशाहादिके प्रेतायोदकं दत्वा शुचि
र्भवति ॥ उदकदानस्य स्नानपूर्वकत्वात्तु ॥ स्नात्वोदकत्वा शुचिर्भवति ॥ तदुक्तं निर्दिश्य
ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म वा वासःवाससा जलमाप्लुत्य शुद्धो भवतीति मानवदिति

२२

पूर्णे दत्त्वोदकं शुचिरिति । प्रेतोदकदानमहरहर्यावत्तस्याशौचकालस्य शुद्धिहेतुत्वविधा
नाजन्मप्रतिक्रांताशौचं सपिंडानां नास्तीति गम्यते पित्रुत्पन्ने निर्देशोपि जनने स्नाने सत्यवश्य
त्वात्पुत्रस्य जन्म चेति वचनात् । यत्तु पुत्रग्रहणं जन्मनि सपिंडानां मतिक्रांताशौचं नास्तीत्य
त्र ज्ञापकं । अन्यथा निर्देशो स्नाति मरणे मृत्वा जन्म च निर्देशोमित्येवावक्ष्यत् । न च तथो
क्तं । तथा देवलः । नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति तस्माद्द्विपतावेवाति
क्रांताशौचमिति स्थितं । केचिदन्यथमं श्लोकं पठंति । प्रोषिते कालशेषः स्यादशेषे त्र्यह
मेव तु । सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिरिति । प्रोषिते प्रेते सर्वेषां ब्राह्मणक्षत्रि
यादीनामविशेषेण कालशेषः शुद्धिहेतुः अशेषे पुनरिति क्रांते दशाहादौ सर्वेषां त्र्य
हमेव वा । शौचं संवत्सरे पूर्णे यदि प्रोषितप्रायणमवगतं स्यात्तदा सर्वो ब्राह्मणादिः स्नात्वो
दकं दत्त्वा शुचिः स्यात् । तथा च मनुः । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति
अहः पंचत्रयोदशाहात्तु ऊर्ध्वं मासि त्रिरात्रमानवमं सत्रयादर्वाग्दक्ष्याः पूर्वोक्तं तत्सद्धः

588

२२

शौचं नवममासादूर्ध्वमर्वाक् संवत्सरादिष्यते । पत्युर्नवासिष्टमूर्ध्वमर्वाक् संवत्सराद्यं
पत्यूनवासिष्टमूर्ध्वं दशाहात्तच्छुध्यैकरात्रमिति त्रिमिति तदूर्ध्वं षण्मासेभ्यो यावन्नवम
यदापि गोत्रमवयवे कृत्वा चोर्ध्वं दशाभ्याः पाक्षिणीरिति । तन्मासत्रयादूर्ध्वमर्वाक् षण्मा
स । तथा च बृहस्पतिः । मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वा
गूर्ध्वं स्नानेन शुध्यतीति । एतच्च मातापितृव्यतिरिक्तविषयं । पितरौ चेन्मृतौ स्यातां दू
रस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् । पैठीनसिस्मरणात् । तथा
स्वदेशान्तरेऽपि महागुरुनिपातेऽपि । आर्द्रवस्त्रोपवासिना । अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं
यथाविधीति । संवत्सरादूर्ध्वमपि प्रेतकार्यमाशौचोदकदानादिकं कार्यं न पुनः स्नानं
मात्रमध्याहारित्यर्थः । पितृपत्न्यामपि मातृव्यतिरिक्तायां स्वदेशान्तरे विशेषो दर्शितः । पितृप
त्न्यामपेतायां मातृवर्जं द्विजोत्तमः । संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेत् । यत्तु नद्यादिव्यव
हितदेशान्तरस्थतः सपिण्डानां दशाहादूर्ध्वं मासत्रयादर्वाक् आपि सद्यः शौचं देशान्तरस्थतं स्नात्वा

ल्पी वैवैश्वानरसेयतो । मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिणः इति देशांतरलक्षणं च बृह-
स्पतिनोक्तं महानद्यंतरं यत्र गिरिर्वा व्यवधायकः वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते
देशांतरं वदंत्येके षष्टियोजनमायतं चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च इदं चापत्यगामि
शुद्धिरिति । याज्ञवल्क्येनाविशेषेणाद्दशाहं तूक्तं । क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांध-
वाः तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते । अनयोश्चापत्रयोरापदद्दि वयस्त्वेनव्य-
वस्था शास्त्रार्थी नो तु स्वाम शौचे न स्पर्शत्वं कर्माधिकारस्तु मासावधेरेवं तथा हारीतः
शूद्रो दशाहेन एव सर्वो वेदस्य वर्णस्य यो भवेत् तद्वर्णस्य भवेच्छौचो चोदास्यामासलक्ष्य-
त्वकमिति । प्रतिलोमानां त्वाशौचाभाव एव । प्रतिलोमा धर्महीना इति स्मरणात् । केव-
लं मलोप्रसवे मात्रापकर्षणार्थं मूत्रपुरीषोत्सर्गवच्छौचं भवत्येव । तथोनस्यापि
शेषादपि दशाहाशौचस्यापवादमाह । आदंतजन्मनः सद्य आचूडान्नैशिकी स्मृ-
ता । त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परं । यावता कालेन तद्दंतानामुत्पत्तिस्तस्मिन्का-

त्र२

ले॰ त्राहोरात्रव्याप्तिन्यशुद्धिः॥ धातादेशात्उपनेतृतो दर्वाक् चूडायास्त्वाहूर्मतीतस्य
त्र्यहमशुद्धिः॥ अर्वाग्दंतजन्मनइति॥ यद्यपि वीक्षेणाभिधानं तथाप्यग्निसंस्का
राभावे इष्टव्यं॥ अदंतजाते बाले प्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति॥ वेद्य
वेग्निसंस्काररहितस्य सद्यः शौचाविधानात्॥ सति त्वग्निसंस्कारे अहस्त्वदंतक
न्यासु बाले शुद्धेव जमानएकाह॥ तथाच यमः॥ अदंतजाते तनये शिशौ गर्भच्युते
तथा सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति नामकरणात्प्राक्सद्यः शौचमेवे
ति नियतां प्राक्नामकरणात्सद्यः शुद्धिरिति॥ शंखस्मरणाच्च॥ चूडाकर्म च प्रथमे
तृतीये वा वर्षे स्मर्यते॥ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः॥ प्रथमेब्दे तृतीये वा क
र्तव्यं श्रुतिनोदनादिति स्मरणात्॥ ततश्च दंतजननादूर्ध्वं प्रथमवार्षिकं चूडाकर्म
पर्यंतमेकाह॥ तत्र त्वकृतचूडास्य दंतजनने सत्यपि त्रिवर्षं यावदेकाह एव॥ तथा च
विष्णुः॥ दंतजाते त्वकृतचूडे त्वहोरात्रेणशुद्धिरिति तत ऊर्ध्वं प्रागुपनयनात्त्र्यह

मा

यत्तुमनुवचनं ॥ नॄणामकृतचूडानामशुद्धिः नैशिकीस्मृता निर्वृत्तचूडकानां तु त्रि
रात्राच्छुद्धिरिष्यतेइति ॥ तस्याप्ययमेवविषयः ॥ यत्तु नाद्विवर्षमधि कृतस्यत्तेनैवोक्तं
अरण्येकाष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेवचेति यच्चवाशिष्ठवचनं ऊनद्विवर्षेमर्भ
पतनेवासपिंडानांत्रिरात्रमिति तत्संवत्सरचूडाभिप्रायेण ॥ यत्त्वंगिरोवचनं यद्यप्यकृ
त तचौलोवैजातैः तत्रसंस्थितः दाहयित्वा तथाप्येनमासौचं त्र्यहमाचरेदिति ॥ तद्द्वित्रया
दूर्ध्वं कुलधर्मात्प्रथमाचौलोत्कर्षेवेदितव्यं ॥ विप्रेन्यूनत्रिवर्षेतुमृते शुद्धिस्त्वौशिकीति
नैवाभिरितत्वात् ॥ नचायमेकाहोदंतजननोत्तरविषयइति शंकनीयं ॥ नाहिन्यूनत्र
त्रीयवर्षस्यदंतोत्पत्तिः संभवति ॥ तथात्वेपिदंतजननमेकृतचौलोस्यैकाहंविरुद्ध
त्वाद्विष्णुवचनेनविरोधः चाडुपरिहरः स्यात् ॥ तस्मात्प्रागेवव्याख्यानमप्युपसली ॥ यत्तु
काश्यपवचनं ॥ बालानामदंतजानांत्रिरात्रेणशुद्धिरिति ॥ तन्मातापित्रोः विषयंनिर
स्यत्तुपुमानुपयुक्तः सुपस्यस्पर्शविषयशुद्धयति ॥ वैजकादभिसंवेधादानीयंव्यादंयंअहामति

जन्यजनकसंबंधोपाधिकतयाचिरात्रस्मरणात्॥ तत्तस्यापमर्षः प्राङ्नामकरणात्स
द्यःशौचं तदूर्ध्वं दंतजननादर्वागग्निसंस्काराक्रियायामेकाहइति तत्र सद्यःशौचेजा
तदंतस्य प्रथमवार्षिकाच्छौ नादर्वागेकाहः॥ प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यंतं कृतचौ
लस्य त्र्यहः इतरस्य त्वेकाहः। वर्षत्रयादूर्ध्वमकृतचौलस्यापि त्र्यहः उपनयनादूर्ध्वं सर्वे
षां ब्राह्मणादीनां दशरात्रादिकमिति ॥ ~~[illegible]~~ ॥ इदानीं स्त्रीषु चवयो
वस्थाविशेषेणापवादमाह ॥ अदत्तास्वदत्तकन्यासु बालेषु च विशोधनं ॥ अदत्ता अपरि
णीता वाक्कन्यास्तासु कृतचौलासु वाग्दानात्प्राग्दोषरात्रेण विशोधनं शुद्धिकारणं स
पिंडानां सापिंड्ये च कन्यानां त्रिपुरुषपर्यंतमेव ॥ अप्रत्तानां तु स्त्रीणां त्रिपुरुषा विस्ता
पतइतिवशिष्ठवचनात्। बालेषु चानुत्पन्नदंतेषु ॥ असंस्कारे सात्येकाह्वं विशोध
नं॥ अकृतचौलायां तु कन्यायां सद्यःशौचं॥ अचूडायां तु कन्यायां सद्यःशौचं विधीयते
इत्यापस्तंबस्मरणात्॥ वाग्दानादूर्ध्वं संस्कारात्प्राक् पतिपक्षे पितृपक्षे वा त्रिरात्र

२६

मेवं । यथाह मनुः । स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यन्ति बांधवाः यथोक्तेनैव कल्पेन शु-
ध्यन्ति तु सनाभय इति बांधवाः । पतिपक्षास्त्रिरात्रेण शुध्यन्ति सनाभयस्तु पितृपक्षाः सपिं-
डा यथोक्तेनैव कल्पेनानिवृत्तचौलादिनोक्तेन त्रिरात्ररूपेण न पुनर्दशरात्ररूपेणेति वाऽस-
त्र्यासंस्कृत्यापुत्रत्वात् ॥ अत एव मरीचिः ॥ वारिपूर्वप्रदत्तानु भयानैव प्रतिपादिता । असं-
स्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतं उभयोः पतिपितृपक्षयोः विवाहादूर्ध्वं विष्णुना
विशेषो दर्शितः ॥ संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगेहे स्यातां
तदैकरात्रं त्रिरात्रं चेति । तत्र प्रसवे एकाहः प्राप्तो मरणे त्रिरात्रमिति व्यवस्था इदं च वयोवस्था-
शौचं सर्ववर्णसाधारणं सूत्रस्य द्वादशस्थानीत्विवत्तवर्णविशेषोपादानेनाभिधानात्
॥ अत एव मनुना प्रमुखं कपावद्विशेषाशौचविधेः साधारण्यप्रतिपादनापूर्वं चातुर्वर्ण्याधि-
कारे सत्यपि प्रन[illegible]तुर्णामपि वर्णानां यथावदनुपूर्वशः इत्युक्तं ॥ अंगिरसाप्युक्तं ॥ अवि-
शेषेण वर्णानामर्वाक् संस्कारकर्मणः त्रिरात्रं तु भवेच्छुद्धिः कन्यास्वह्नो विधीयत इति

३८८

२६

व्याघ्रपादवचनं च ॥ तन्मंत्रसिद्धयामिति प्राग्दर्शितं ॥ अतो यथा पिंडयज्ञप्रतादियामित्यपि
डोदकदानादिविधिः सर्ववर्णसाधारणं ॥ यथा वा समानोदकाशौचविधिः ॥ अंतराजन्ममर
णे इति सत्रियात्राशौचविधिश्च यदस्थपदगर्भस्त्रावे मासतुल्या राहानि ॥ शावाशौचविधिः
प्रोषिते कालविशेषस्यादश्रोषेस्य हमेवत्रिरात्रिविदेशस्थाशौचविधिश्च यथा वा गुर्वाद्याशौच
विधिसर्ववर्णसाधारणस्तद्वद्वयोवस्थानिमित्तयथाशौचे सर्ववर्णसाधारमेवमवितुमर्हतीति
अतएव वसिष्ठः कृतचौलेनैरूपनयनवामिन्द्रध्यते ऊर्द्ध्वं त्रिवर्षाच्छूद्रेऽपि द्वादशाहो विधीयते ॥ यथा
स्मिय त्रित्रिरात्रं विप्राणामाशौचं संप्रदृश्यते ॥ तत्रऊर्द्ध्वं द्वादशाहं ॥ बरान्नवक्ष्येत्रैवैरूपयोनि
दीनिकृत्यसंगस्विचनानिविग्णी तत्त्वबुध्या अनादियमानेद्वारेश्वरविश्वरूपमेधातिथिप्र
भृतिभिराचर्यैर्नयमसाधारणयजोजीगकृतः विद्यमानानिवाविग्णी तानि आर्त्तनार्त्तक्षत्रिया
दिविषयतयाव्याख्येयानि ॥ गुर्वादिष्वतिदेशमाशगुर्वेत्तेवाप्यनूचानमातुलश्रोत्रियेषुच
गुरुत्वपाध्यायः अन्तेवासीशिष्यः अनूचानोगानांप्रवक्ता मातुलस्सहणोनात्मसवोधवाःपि

स्ववंधवोमातृबंधवश्चयोनिसंबंधादुपलक्ष्यते ॥ तेचपत्नीदुहितरस्तत्रदर्शिताः सोत्रियः
एकशाखाध्यायी एकां शाखामधीते श्रोत्रियइतिबोधायनस्मरणात् ॥ एतेषूपरतेष्वेकरात्रमा
शौचं ॥ यस्तूत्तुब्धोगुरुः पितातदुपरमेसपिंडत्वाद्दशाहमाशौचमेव ॥ यस्तुपितापुत्रानुत्पा
द्यसंस्कृत्यवेदार्थं ग्राहयित्वावृत्तिंचाविदधातितस्यमहागुरुत्वात्तदुपरमेद्वादशरात्रंवा
महागुरुषुदानाध्ययनेवर्जयेदितिस्मृत्यध्ययनेनोक्तंद्रष्टव्यं ॥ आचार्योपरमेत्रिरात्रमेव ॥ यथाह
मनुः ॥ त्रिरात्रमाहुराशौचमाचार्येसंस्थितेसति ॥ तस्यपुत्रेचपत्न्यांचाहवरात्रमितिस्थि
तिः ॥ तदात्वाचार्यादीनांते [illegible] करोति तदादशरात्रमाशौचंगुरवेः प्रेतस्यशिष्यस्यपितृमे
धंकृत्वासमाचरन् ॥ प्रेताहारैः समंतत्रदशरात्रेणशुध्यतीति तेनैवोक्तत्वात् ॥ श्रोत्रियस्यसमा
नग्रामीनस्यतदाशौचं एकाहं सब्रह्मचारिणि ॥ समानग्रामीनिचश्रोत्रियस्याश्वलायनस्मरणा
त् ॥ एकाचार्योपनीतः सब्रह्मचारी एतत्संनिधनेद्रष्टव्यं ॥ संनिहितेशिष्यादौत्रिरात्रादि ॥ य
थाहमनुः ॥ श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेत् ॥ मातुलेपक्षिणींरात्रिंशिष्यर्त्विग्बां

३८८

धवेषु चेति ॥ उपसरणेन मैत्री प्रातिवेश्यपत्न्यादिना संबद्धशीलयुक्ते च मातुलश्वशुरयोर्मातृष्वसादेरुप
लक्षणार्थं ॥ बांधवा इत्याप्तबांधवः पितृबंधवो मातृबंधवश्चोच्यंते ॥ तथा च बृहस्पतिः ॥ एवं
मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेदिति ॥ तथा च प्रचेताः ॥ मृते चर्त्विजि याज्ये च त्रिरात्रेण विशु
ध्यतीति ॥ तथा च वृद्धमनुः ॥ संस्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते ॥ संस्कृते तु त्रिरात्रं स्यादिति
धर्मो व्यवस्थितः ॥ पित्रोस्तु परमे स्त्रीणां मूढानां तु कथं भवेत् ॥ त्रिरात्रेणैव शुद्धिः स्यादित्याह भग
वान्यमः ॥ स्वसुः स्वीयभगिन्यां च मातुलान्यां च पक्षिणी रात्रिः मृता मातामही यदि ॥ तथा च गौत
मः ॥ पक्षिणीमसपिंडयोनिसंबंधसहाध्यायिनि चेति ॥ योनिसंबंधा मातुलमातुलसुतश्वश्रूयपितृष्व
स्रादयः ॥ तथा च जाबालिः ॥ एकादशाहं तु त्र्यहं गोत्रजानामहस्मृतं ॥ मातृबंधौ गुरौ मित्रे मं
डलाधिपतौ तथेति ॥ विष्णुः ॥ असपिंडे स्ववेश्मनि मृते एकरात्रमिति ॥ तथा च वृद्धः ॥ भगिन्यां सं
स्कृतायां तु भ्रातर्यपि च संस्कृते ॥ मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ॥ श्यालके तत्सुते चैव
वसद्यः स्नानेन शुध्यति ॥ आमश्वशुरे कुलपतौ श्रोत्रिये च तपस्विनी शिष्ये पंचत्वमापन्ने शुद्धि

नैर्गुण्यदर्शनात् ॥ स्वामिमरणागतो यावच्छ्रवणविशेषेति कस्यचित् ग्रामेश्वरे कुलपतौ श्रोत्रिये
ग्रामस्यैतावदाशौचं निर्गतेषु चितामिमात्रम् ॥ इत्यादीनाशौचविशेषप्रतिपादकानि स्मृति
वचनानि ॥ अन्येषामपि यानि ग्रन्थगौरवभयादत्र न लिख्यन्ते तेषु चैकविषयत्वेनाशौचप्र
तिपादकत्वाद परस्परविरुद्धेषु संनिधिविदेशस्थापितत्वात् व्यवस्थानुसंधातव्या ॥ किंच ॥ अनौ
रसेषु पुत्रेषु भार्यास्वन्यगतासु च ॥ अहनित्यनुवर्तते अनौरसाः क्षेत्रजदत्तकादयस्तेषु जाते
ष्वपमृतेषु वाहोरात्रमाशौचं ॥ तथा स्वभार्यास्वन्यगतासु अन्यं प्रतिलोमव्यतिरिक्तमाश्रितासु स
तीषु तासु वाहोरात्रमेव ॥ न पुनः सपिण्डेष्वेव दशरात्रं प्रतिलोमासितासु त्वाशौचाभाव एव
पाषंडमनाश्रितानाम् इत्यत्र प्रतिषेधात् ॥ एतच्च भार्यापुत्रयोः संबंधित्वात् ॥ पतितयोगि
कभार्यत्वे पुनश्च तस्मैव देयमाशौचं ॥ सपिण्डानां माशौचाभावः ॥ अत एव प्रजापतिः ॥ अन्याश्रिते
षु दारेषु परपत्नीसुतेषु च ॥ गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेति ॥ स्वैरिण्यां ग्रामव
यमासितानामप्येतत्त्रिरात्रमेव ॥ यथाह विष्णुः ॥ अनौरसेषु पुत्रेषु जातेषु च मृतेषु च ॥ परपूर्वा

(३९०)

सुभार्यासु प्रसूतासु मृतासु चेति ॥ त्रिरात्रमत्र प्रकृतं । अनयोश्च त्रिरात्रैकरात्रैकरात्रयोः
संनिधि विदेस्यापि स्थया व्यवस्था पदानुपितुस्त्रिरात्रे तदासपिंडानां मेकरात्रं । यथाह मरीचिः
सूतके मृतके चैव त्रिरात्रं परिपूर्वयोः । एकाहस्त्वसपिंडानां त्रिरात्रं यत्र वै पितुरिति ॥ किंच
निवासराजनि प्रेते तदहः शुद्धिकारणं ॥ निवसंत्यस्मिन्निति निवासः स्वदेशस्तत्रत्यते । तस्य यः स्वा
मी राजा विषयाधिपतिः । सयस्मिन्नहन्यतीतस्तदहर्मात्रं शुद्धिकारणं । रात्रौ चेदतीतस्तदा
रात्रिमात्रं । अत एव मनुः प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितइति । ज्योतिष्या सह
वर्तइति सज्योतिराशौचं । अह्नि चेद्यावत्सूर्यदर्शनं । रात्रौ चेद्यावन्नक्षत्रदर्शनमित्यर्थः
अनुगमनाशौचमाह । ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित् । अनुगम्याम्भसि स्ना
त्वास्पृश्याग्निं घृतं भुक् शुचिः ब्राह्मणो वा सपिंडे न द्विजो विप्रादि शूद्रा वा प्रेतो नानुगंतव्यः
यदि स्नेहादिवानुगच्छति तदा तडागादिस्थे अंभसि स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुचिर्भवेत् ।
अस्य च घृतप्राशनस्य भोजनकार्यविधाने प्रमाणाभावन्न भोजनप्रतिषेधः इदं समानोद

२९

कुष्ठजातिविषयं॥ यच्चाह मनुः॥ अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलः स्पृ
ष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ स्नातयोमाब्रह्म सपिंडादूतरस्याविहितत्वान्नदोष॥ निष्कृ
ष्टजात्यनुगमनेस्य त्वेतदेतत्कं द्रष्टव्यं॥ तत्र शूद्रानुगमने प्रेतीभूते तु यः शूद्रं ब्राह्मणोऽना
नुद्रुवेत॥ अनुगच्छन्नीयमानं स त्रिरात्रेण शुध्यति॥ त्रिरात्रे तु ततस्तीर्णे नदीं गत्वा समु
द्रगां प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति पराशरोक्तं द्रष्टव्यं॥ क्षत्रियानुगमने तु
मानुषास्थिस्निग्धस्य त्रिरात्रमाशौचं मस्निग्धे त्वहोरात्रं शवानुगमने चैव॥ वशिष्ठोक्तं
वैश्यानुगमने पुनः पक्षिणी तथा॥ क्षत्रियस्यानन्तरं वैश्यानुगमने अहोरात्रमेकान्तरं शूद्रानु
गमने पक्षिणी वैश्यस्य शूद्रानुगमने एकाहं इत्यूहनीयं॥ तथा रोदनेऽपारस्करेणोक्तं॥ म
तस्य बान्धवैः सार्द्धं कृत्वा तु परिदेवनं॥ वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म चेति॥ यथा
लंकरणमपि कार्यं कृच्छ्रपादो सपिंडस्य प्रेतालंकारणे कृते॥ आस्नानादुपवासः स्या
दन्यो स्नानमिष्यत इति शंखेन प्रायश्चित्ताम्नानात्॥ सपिंडाशौचं क्वचिदपवादमाह॥

महीपतीनां नाशौचं हतानां विद्युता तथा॥ गोब्राह्मणार्थं संग्रामे यस्य चेच्छति भूमिपः॥ यद्यपि मही
शब्देन कृत्स्नं भूमंडलमुच्यते। तथाप्यत्र सकलायाः क्षितेरेकभर्तृकत्वानुपपत्तेर्मही
पतीनामिति बहुवचनानुरोधाच्च तदेकदेशभूतानि मंडलानि लक्ष्यंते। तत्पालनाधि
कृतानां क्षत्रियादीनामभिषिक्तानां नाशौचं तैराशौचं न कार्यमित्यर्थः। तथा विद्युद्धता
नां गोब्राह्मणरक्षार्थं विषयान्नानां च संबंधिनो यस्य सपिंडा हतेऽशौचं न कार्यं यस्य च मंत्रि
पुरोहितादेर्भूमिपोऽनन्यसाध्यं मंत्राभिचारादिसिध्यर्थमाशौचाभावमिच्छति तेना
पि न कार्यं॥ अत्र महीपतीपदं साधारणत्वेन विहितं प्रजारक्षणं तद्येन मानदानसत्का
रव्यवहारदर्शनादि न संभवति तत्रैवाशौचाभावो न पुनः पंचयज्ञादिष्वपि। तथा च मनुः
राज्ञो माहात्मिके स्थाने सद्यः शौचं विधीयते। प्रजानां परिरक्षार्थमासनं चात्र कारणम्
इति। गौतमेनाप्युक्तं। राज्ञां च कार्याविरोधार्थमिति। राजभृत्यादेरप्याशौचं न भवति
यथाह प्रचेताः॥ कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च

593

३०

सद्यः शौचाप्रकीर्तिता । कारवः सूपकारादयः । शिल्पिनश्चित्रकराः । चैलनिर्णेजकादयः ।
अयं चाशौचाभावः । किंनिमित्त इत्यपेक्षायां कर्मनिमित्तैः । आमैत्तद्साधारणस्य
कर्मणो वृद्धिरूपत्वात्तत्रैव द्रष्टव्य । अत एव विष्णुः । नाराज्ञां राजकर्मणि न व्रतीनां व्रतेन
सत्रिणां सत्रेण कारूणां कारूकर्मणीति । मनिनियतत्वमेवाशौचभावं दर्शयति । शातातपीये
प्युक्तं । सूपकर्मकरा शूद्रा दासीदासास्तथैव च । स्नाने शरीरसंस्कारे गृहे कर्मण्यदू
षिता । इयं च दासादिशुद्धिरपरिहरणीयतया प्राप्ता स्पर्शविषयेष्वनुसंधेयं । अत एव स्म
त्यंतरं । सद्यः स्पर्शयोगर्भदासो भक्तदासश्च सद्यः शुचिः । तथा चिकित्सको यत्कुरुते त
दन्येन न शक्यते । तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यश इति । किंच । ऋत्विजां दी
क्षितानां च याज्ञियं कर्म कुर्वतां । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा । दाने विवाहे
यज्ञे च संग्रामे देशविप्लवे । आपद्यपि हि कष्टायां सद्यः शौचं [illegible] विधीयते । ऋत्विजो वर
णभवणसंभूताः । कर्तव्यशौबादीक्षया संस्कृता दीक्षितास्तेषां याज्ञियस्तैभव कर्म कुर्व

तां सद्यः शौचं विधीयत इति ॥ सर्वत्रानुषंगः ॥ दीक्षितस्यैवतानोपाप्रानाः कार्यादृत्यनेनासि
ध्येप्याधिकारे पुनर्वचनं यजमानेष्वन्वयं कर्तृविधानार्थं ॥ सद्यः स्नानविधानार्थं वा ॥ सत्रि
ग्रहणेन सत्रतानुष्ठानतुल्यतपोजपसत्रप्रवृत्ताः तस्यनेमुख्यानां तु सत्रिणां दीक्षितग्र
हणेनैव सिद्धेः ॥ व्रतिशब्देन कृच्छ्रचान्द्रायणादिप्रव्रता स्नातकव्रतप्रायश्चित्तप्रवृत्ताश्चो
च्यंते ॥ तथा ब्रह्मचर्यादिव्रतयोगिनः श्राद्धकर्तभोक्तृकृच्छ्रग्रहणे ॥ तथा च मत्स्ये तद्वं ॥ नि
त्यमन्नप्रदस्यापि कृच्छ्रचान्द्रायणादिषु ॥ निवृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने गृहीतनि
यमस्यापि न स्यादन्यस्य चित्त् ॥ निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ॥ निमंत्रितस्य वि
प्रस्य स्वाध्यायविरतस्य च ॥ देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥ प्रायश्चित्तप्रवृत्ता
नां दातृब्रह्मविदां तथैव इति ॥ सत्रिणां व्रतिनां सत्रे च स्वशुचिनकर्ममात्रे संव्यवहारे वा ॥ तथा च
विष्णुः ॥ न व्रतिनां व्रते न सत्रिणां सत्र इति ॥ ब्रह्मविदुपकुर्वाणश्च कौनैष्ठिकश्च यस्तु नित्यं
दातैव न प्रती गृहीता स वै त्वानसोदीत प्राहुर्नोच्यंते ॥ ब्रह्मविधानिते षां च त्रयाणां माश्रमि

३१

णे सर्वत्र शुद्धिः । विशेषे प्रमाणाभावात् । दानेषु पूर्वसंकल्पितद्रव्यस्य नाशौचं पूर्वसंक
ल्पितं द्रव्यं दीयमानं न दुष्यतीति षट्त्रिंशन्मतस्मरणात् । स्मृत्यंतरे चायं विशेष उक्तः । वि
वाहोत्सवयज्ञादिषु अंतरामृतसूतके । शेषमन्नं परैर्देयं दातृन्भोक्तृंश्च न स्पृशेदिति । य
त्रैव षोत्सर्गादौ विवाहे पूर्वसंभृतसंभारे । तथा च स्मृत्यंतरं । यज्ञे संभृतसंभारे विवा
हेषु स्वेच्छकर्मणीति । सद्यः शौचमत्र प्रकृतं विवाहग्रहणं पूर्वप्रवृत्तचौलोपनयनादिसंस्का
रकर्मोपलक्षणं । यज्ञग्रहणं पूर्वप्रवृत्तप्रतिष्ठारामाद्युत्सवमात्रोपलक्षणं । तदेव प्रति
ष्ठोत्सवविवाहेषु नदेशविभ्रमे नापद्यपि च कष्टायामाशौचमिति विष्णुस्मरणात् । संग्रामे
समुपोढे राजानं सैनानां दृष्टेऽपि त्याश्वलायनाद्युक्तं सेनानवयोः प्रास्थानिकशांतिहो
मादौ च सद्यः शुद्धिः देशस्य विस्फोटादिभिश्चोपसर्गे राजभयादौ विघ्नेषु तदुपशमनार्थे
शांतिकर्मणि सद्यः शौचं विघ्नाभावेऽपि कश्चिद्देशविशेषेणापि वीनांस माशुद्धिरुक्ता । वि
वाहदुर्गायज्ञेषु यात्रायां तीर्थकर्मणि न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेदिति । तथा

कष्टायामप्यापदि व्याध्याद्यभिभवेन पुनः पूर्वावस्थायां दुरितत्वान्न नार्थदानेन तथा संकुचि
तवृत्तेश्च क्षः स्थिरस्रातमानापि त्र्याहिकं कुटुंबस्य तद्भरणोपयोगप्रतिग्रहे सद्यः शु
द्धिः स्वयं शुद्धिर्यस्य सद्यः शौचं विनास्युपग्रामो न भवत्यश्वस्तनिकस्य तद्विषयापल्लिका
हः पर्याप्तसंविद्धनस्तस्यैकाहः पक्षद्वयोपयोग्यसंचयी तस्य त्र्यहं ॥ यः पुनश्चतुरहार्थ
मासादिद्रव्यः ॥ कुंभीधान्यस्तस्य तस्य चतुरहः ॥ कुसूलधान्यकस्य द्वादशाहमित्येवं य
स्यायावत्कालमात्मभावस्तस्य तावत्कालमाशौचं ॥ अपवुपाधिकत्वाशौचसंकोचस्य
अतएव मनुः ॥ कुसूलधान्यको वा स्यात्कुंभीधान्यक एव वा त्र्यहैहिको वापि भवेदश्वस्त
निक एवं चेत्यत्र प्रतिपादितं चतुर्विधगृहस्थाभिप्रायेण दशाहं त्र्याहमाशौचं सपिंडे
षु विधीयते ॥ प्रयोवतं चयनादस्थ्नां त्र्यहमेकाहमथवेति कल्पचतुष्टयं प्रतिपा
दितं ॥ समानोदकविषयाश्च संकुचिताशौचकल्पाः ॥ पक्षिण्येकाहसद्यः शुद्धिरूपा स्मृत्यं
तरदृष्टास्ति संकोचोपाधिकतयैव योज्याः ॥ अयं चाशौचसंकोचोऽयेनैव प्रतिग्रहादिना

विनानात्मुपलम्भतस्तद्धि पत्नी न लभ्येत इत्यवगन्तव्यं । न त्वेकाहः ब्राह्मणः शुध्येद्योग्नि
वेदसमन्वितः त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैरित्यादिस्मृत्यंतरवचनपर्या
लोचनयाध्ययनागान्मनुष्यानुयोगिनात्र्यहादिभिः सर्वात्मनाऽशुद्धिमित्येव कस्मान्नेष्य
ते । उच्यते दशाहं शावमाशौचमिति सामान्यप्राप्तदशाहबाधपुनः सत्यमेवद्व्येकाहाद्ब्रा
ह्मणः शुध्येदित्यादि विधायकं भवति बाधस्यानुपपत्तेर्निबंधनत्वाद्यावत्त्वबाधि
तेनुपपत्तिप्रसक्तेनाभवति तावद्बाधनीयमतः किंपदनेन बाध्यमित्यपेक्षायामपे
क्षितविशेषसमर्पणक्षमस्याग्निवेदसमन्वित इति वाक्यविशेषस्य दर्शना ॥ इतर
थापेनाग्निवेदसाध्यं कर्म कृत्तं तस्यैकाहाशुद्धिरिति पुरुषविशेषे । पत्लक्षणत्वमे
वस्यान चैतद्युक्तं सर्वेषां सति सत्यपदेऽन्याग्निषु क्रियावैतनोपासाः कार्याः क्रियाग्ब्रह्मतिवो
दित्या तथा ब्राह्मणस्य चत्वार्यायनिवेत्यर्थे लब्धः शौचमित्येवमादिभिर्मन्वादिवच
नैनैववाक्यतामवति । तयोभयत्र दशाहानि कुलस्यान्नं न भुज्यत इति दशाहपर्य

तंभोजनमादिकं प्रतिषेदद्भिर्यमादिवचनैरविरोधोपि सिध्यति । अतः काचित्कमेवेद
माशौचं संकोचविधानं न पुनः सपव्यवहारादिगोचरमित्यलं प्रसंगेन इदं चत्वाध्याय
विषये सद्यः शौचविधानं बहुवेदस्य ब्रह्मणो ज्ञानकृत्वायां मायतौ द्रष्टव्यः । इतरस्य तु
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तेते इति प्रतिषेधः एव । एवं ब्राह्मणादिमध्ये
यस्य यावत्कालमात्रौ चमुक्तं सततस्यानंतरं स्नात्वा शुध्येत् न तत्कालातिक्रममात्रा
त् । यथाह मनुः । विप्रः शुध्यत्यपस्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा
यष्टिं शूद्रः कृतक्रियः । अयमर्थः । कृतक्रिय इति प्रत्येकमभिसंबध्यते । विप्रोऽतीता उ
शौचकालः कृतक्रियः कृतस्नानो हस्तेनापः स्पृष्ट्वा शुद्धति । स्पृष्टेति स्पर्शनं किंचियो
ग्यं तो नास्नानमपाचमनं चबाह्ये नादिषु स्पैवान्त[illegible] संगात् । अथ वा क्रियापावद् त
शौचं कृत्वोदकादिक्रियस्तदनंतरं विप्रादिर्नुदकादिस्पृष्ट्वा शुध्यतीत्या शौचका
लं तरमाविस्नानप्रतिनिधत्वेनोच्यत इति । क्षत्रियादिर्वाहनादिकं स्पृष्ट्वा शुध्येद्

399

नात्रस्पृष्टस्पर्शेऽपि आचमनविधानार्थे तैरिति बहुवचननिर्देशाच्छास्त्रविरोधः तेन स्नानादि

३३

उदक्याशुचिभिः स्ना

कृत्स्नव्यापिन्या शुद्धिमभिधायेदानीं प्रसीमन्त्र्यादिपुरुषव्यापिनीं शुद्धिमाह उदक्याशुचिभिः स्ना
याचः संस्पृष्टस्तैरुपस्पृशेत् । अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् । उदक्या रजस्वला । प्राशुच
यः शवचाण्डालपतितास्तत्सूतिकाशावाशौचिनश्च एतैः संस्पृष्टः स्नायात्ते पुनरुदक्या
शुचिसंस्पृष्टस्यादिभिः संस्पृष्ट उपस्पृशेत् । आचामेत् । आचम्य अब्लिङ्गान्यापोहिष्ठेत्येवमा
दीनि त्रीणि मन्त्रवाक्यानि जपेत् तत्र बहुवचनस्य च चित्तार्थत्वात् । तथा गायत्रीं च म
नसा सकृज्जपेत् । नत्वन्त्योदक्यादिसंस्पृष्टः स्नायात् । एकवचनानिर्दिष्टस्यैकस्यैव तैरि
ति बहुवचनेन परामर्शः । संस्पृष्टमेव किं तत्रोदक्यादिसंस्पृष्टश्चेत्त्विति स्नानादि स्पृष्टस्नानम्
वान्तव्याः दुःस्वप्ने मैथुने धौतो विरेके क्षुरकर्मणि चितिधूमं श्मशानानामस्थिस्पर्शने स्ना
नमाचरेत् । तथा च मनुः वान्तो विरिक्तः स्नात्वा तु घृतप्राशनमाचरेत् । आचामेदेव
भुक्त्वान्नं स्नानं मैथुनिनः स्मृतम् इति मैथुनिनः स्नानमुक्तं कालानियमेन । अनृतौ तु पद्म
गच्छेदौ च मन्त्रं मधुरीभवदिति वचस्यनि स्मरणात् । ऋतौ वापि कालविशेषे स्नानं त

३३

४००

रे स्नानमुक्तं ॥ अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुने ॥ कृत्वा सचैलं स्नात्वा वा वारुणीभि
श्च मार्जयेत् ॥ तथा यमः ॥ अजीर्णेऽभ्युदिते वान्ते तद्वदेव स्पर्शविषये ॥ सचैलेन तु वित्यादि स्प
र्शे सचैलं नाम वस्नानं ॥ यदाह च्यवनः ॥ श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं
सोमविक्रयिणं यूपं चितिं चैत्यं काष्ठं मद्यं मद्यभांडं सस्नेहं मानुषास्थि शावस्पृष्टं रजस्वलां महापा
तकिनं शवं स्पृष्ट्वा सचैलमम्भोवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत् ॥ घृतं प्रा
श्य पुनः स्नात्वा त्रिराचामेदिति ॥ एतच्च बुद्धिपूर्वविषयमन्यत्र स्नानमात्रं ॥ शावस्पृष्टिर्वा
कीर्चितिं यूपं रजस्वलाम् ॥ स्पृष्ट्वा तु स्वकामतो विप्रः स्नानं कृत्वा विशुध्यति ॥ वहस्पतिस्म
रणात् ॥ एवमन्यत्रापि वक्ष्यमाणेषु विषयसमीकरणमूहनीयं ॥ तथा च कश्यपः ॥ उदक्या
स्नानमपयोरित्स्पंदने करणे क्रोशामेचित्यारोहणे पूयसंस्पर्शने च सचैलं स्नात्वा पुनर्मनदा तिज
पेत् महाव्याहृतिभिः सप्त प्राकृत्याज्जुहुयाद्यदिति ॥ तथा च स्मृत्यंतरेऽपि ॥ दृष्ट्वा देवलकं चैव सवा
सा जलमाविशेत् ॥ देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयं ॥ असौ देवलको नाम सर्वः कव्येषु ग

हिन ॥ तथा च ब्रह्मांडपुराणे ॥ शौ। चान्या अपतनस्य ह्यालोकाः सन्ति कनाम्नी कान् ॥ विकर्म
स्थान् छित्वान् शूद्रान् सवालान् जलमाविशेत् ॥ तथा स्वर्गो। ह्यादुक्तिः सामाछूद्रस्पर्शे न दूषि
तो तत्लिंगाच्च शुद्धस्पर्शे निषेधाः ॥ तथांगिराः ॥ यस्तु छायाश्वपाकस्य ब्राह्मणो ह्यधिरोहति तत
तत्र स्नानं कुर्वीत घृतं प्राश्य विशुध्यतीति ॥ तथा व्याघ्रपादः ॥ चांडालो रजितं चैव दूरतः परि
वर्जयेत् ॥ गोवाल व्यजनादर्वाक् स्नात्वा जलमाविशेत् ॥ एतद् विसेकटत्वानो विस्नानविषयमा
न्यत्र तु वृहस्पतीनोक्तं युगं च द्विगुणं चैवात्रि युगं च चतुर्गुणं ॥ चांडालमृतकोदृश्या पतितानामथ
क्रमादिति ॥ तथापैठीनसिः ॥ काकोलूकस्पर्शने सचैलस्नानम् मूत्र कपुरीषकरणे सचैल
स्नानं महाव्याहृतिहोमश्च ॥ प्रत्युदकम् त्रपुरीषकरणे इत्येतदधिरकालम् त्रपुरीषशौच ॥ क
रणं वा ॥ तथांगिराः ॥ भास वायसमार्जारखरोष्ट्र श्वां च श्वसूकरान् ॥ अमेध्यानि च संस्पृश्य स
चैलो जलमाविशेदिति ॥ मार्जारस्पर्शनिमित्तं स्नानं तथा छिद्रसमये ॥ अन्यत्र स्नानसमये चैवेति त
थे समाचारात् ॥ अन्यदा तु मार्जारचैव दर्वी च माहतश्च तदा शुचिरिति स्नानाभावः ॥ यत्तस्य

स्पर्शे तु स्नानं ॥ नाभेरूर्द्ध्वं विदितव्यं ॥ अधः स्नानं तु क्षालनमेव ॥ नाभेरूर्द्ध्वं करौ मुक्त्वा मुनाय
प्रयद्यते । तत्र स्नानामधः स्नानं प्रक्षाल्याचम्य शुध्यतीति तेनैवोक्तत्वात् ॥ तथा च कश्चिदो
बाजात् कलबर्शेनोक्तमुद्धृतं चेत् पुनो मृत्काग्नेयदेशं गतस्य शेषत्वगः स्नानं तत्र प्रकुर्वीत शुद्धे प्रक्षा
ल्य शुध्यति ॥ अमेध्यस्पर्शे तु विष्णुना । विण्मूत्रोपहतः ॥ नाभेरधस्तात् प्रवाहेषु चर्मकाषिकै
र्मलैः शुक्लैर्मृद्भिर्वा परतो मृत्तोयोत्सर्गाद्य प्रक्षाल्याचान्तः शुद्धेदन्यत्र परतो मृत्तोयैस्तदंगं
प्रक्षाल्य स्नानेनेन्द्रियेषु परतस्तमुपोष्य स्नात्वा पंचगव्येन द्विगुणं द्वौ परतो यस्थितिं क्षत तत्र परकी
यामेध्यविषयं ॥ आत्मीयमलस्पर्शे तूर्द्ध्वमपि नाभेः प्रक्षालनमेव ॥ यथाह देवलः ॥ मानुषास्थि
वसां वि--- तामात्तवं सत्रं रेतसी मज्जानं शोणितं चापि परस्य यदि संस्पृशेत् ॥ स्नात्वा मृज्जले
यादि नाचम्य कृच्छ्रमेकं भवेत् ॥ तान्येव स्वानि संस्पृश्य पूतः स्यात् परिमार्जनात् ॥ तथा प्रोवेः । यथा
कर्दमतोयेन वर्षा वनाद्येन तथा नाभेरूर्द्ध्वं नरस्याद्धः स्नानेनैव विशुध्यतीति ॥ तलेनापि
विशेषतः ॥ सकर्दमेनु वर्षासु प्रविष्टस्य महीकरं ॥ जंघमोममतिकान्तिः पादयोद्विगुणात्

ताः इति ग्रामशूकरपामसलिलप्रदेशसकर्दमं प्रविश्यपतितमात्र तत्र शोषिते कर्दमादौ नदी
षः रथ्याकर्दमतोयानि यानि स्पृष्टान्यन्त्यवायसैः मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि
चेति प्रागुक्त्वा तु । अस्थिनि मनुना विशेषो दर्शितः । नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो वि
शुध्यति । आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविमिति । इदं च नारास्थिविषयं । अन्यत्र
वशिष्ठोक्तं मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रमिति । अमानुषेष्वपि वि
ष्णूक्तं भक्ष्यवर्जं पंचनखं शवं तदस्थि च सस्नेहं स्पृष्ट्वा स्नातः पूर्ववस्त्रं प्रक्षालितं विभृयादिति
एवमन्येपि स्नानादेरस्पृश्यतरतोवबोद्धव्याः । एवं स्नानादीनां बहुत्वात्तदभिप्रायेणेत्यत्र न
पुंवचनमिति केचित् । उदक्याशुचिभिः स्नायादित्यपि तच्च दंडाद्यचेतनव्यवधानेन स्पर्शे वेदितव्य
वधाने तु मानवं । दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा । शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा
स्नानेन शुध्यतीति तरतीयस्पृश्यत्वाचमनमेव । तत्स्पृष्टिनं स्पृष्ट्वा पकृत्स्नानं तत्स्पर्शे विधीयते । ऊर्द्ध
मार्चमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति संवर्त्तस्मरणात् । एतच्चाबुद्धिपूर्वं दिष्टं मतिपूर्वे

१ मनोस्नानतप्ये सत्ते व ... नाणानितहाः सर्वे भीशुद्धिहेतवः यथाग्न्यादयो भी सर्वेस्व विषये ८

य
ततोऽस्पृश्यापि स्नानमेव ॥ यथा गौतमः ॥ पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्श
ने सचैलोदकोपस्पर्शनाच्छुध्येत् प्रक्षाल्याचम्य शुध्यतीति देवं । तस्मरणात् । अशुद्धीनां पुनरुदक्यादि
स्पर्शो देवलेन विशेषतुक्तः श्वपाके पतिते व्यंगमुन्मत्ते शवदाहके सूतिकां नाविकां नारि
रजसा च परिप्लुताः श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः सचैलं सशिरः स्नात्वा त
दानीमेव शुध्यति । अशुद्धानन्तरमप्येतान् शुद्धत्ववपि स्पृश्य विशुध्यत्युपवासेन तथा कृ
च्छ्रेण वा पुनरिति सावित्र्यां वा स्पृश्य कारयित्री कृच्छ्रं । यथा कालादि विषयः स्यादेषु सप्तवासदासिष्य
वस्था । अधुना कालशुद्धौ हेतुं संतत्वेन दर्श्य शुद्धिप्रकरणेन्ते कालतत्त्वे करणे वक्ष्यमाणो यः शुद्धि
हेतुन्न तु क्रमत इति । अकालोनोति: कर्मसद्भावौ शुद्धिहेतवः तथा कालोपि दशरात्रादिकः शास्त्रो
गम्यत्वाच्छुद्धिहेतुत्वस्य । अग्निस्तावच्छुद्धिहेतुः यथाम्यधायि पुनः पाकान्महीमयानामिति कर्म
च शुद्धिनिमित्ते यथा वक्ष्यति तथा ब्रह्मभावम् पलाशादीनि तथा मृदपि कारणं यथा कः
थितं सलिलेन स्नानस्य मृदापि प्रक्षाल्य विशुद्धं भवति वायुरपि शुद्धिहेतुः यथोदीरितं मारुतेनैव

शुध्यतीति । मनोपि वाचः शुद्धिसाधनं यथा समाश्रायि मनसा व्यदूषितां गवदंतीत्यादि स्ना
नं बाध्यात्मिकं बुद्धिशुद्धौ मिद्यानं यथा मिध्यास्यति । क्षेत्रज्ञस्येश्वरज्ञानादिति तथ श्वक्र
बुद्धिर्यथा वदिष्यति । प्राजापत्यं चरेत् कृच्छ्रं समा वा गुरुतल्पगः इत्यादि । यथा जलमपि श्री
रादेः यथा जलिष्यति । वर्ष्मणो जलमिति यथा तापो वै शुद्धिजनकः यथा गदिते व्या
पनेना तापनेनेति । निराहारोऽपि शुद्ध्युपादानं यथा तपो वै शुद्धिजन मादरिष्यति । त्रि
रात्रोपोषितो जप्त्वेत्यादि । किंच अकार्यकारिणो दानं वेगो नद्यास्तु शुद्धिकृत् । शोध्य
स्य मृच्च तोयं च संन्यासो वा द्विजन्मनां । तपो वेदविदां क्षान्तिर्विदुषां वर्ष्मणो जलं । जलः
प्रच्छन्नपापानां मंत्रसः सत्यमुच्यते । भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनं । क्षेत्रज्ञस्ये
श्वरज्ञानाद्विशुद्धिः परमा मताः । अकार्यकारिणो निषिद्धसेविनां दानमेव मुख्यं शुद्धिकार
णं यथा व्याख्यास्यति । पात्रे धनं वा पर्याप्तं दत्त्वेति । नद्याः निरोधाद्विच्छिन्नो यत्तयामेध्यो
पहातद्यीरयाः कूलंकूपवर्षासु प्रवाहवेगः शुद्धिकृत् । शोधनीयस्य द्रव्यस्य मृच्च तोयं

चमृद्धिकृच्च यथाभाषितं । अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धापकर्षणात् इति सन्यासः प्र
व्रज्याहि जन्मनो माननस्य सीपचारे शुद्धिकृत् । तपो वेदाभ्यासो वेदविदां शुद्धिकरणं कृ धा
ञ्चितिसर्वसाधारणं । नवेदत्तिदामेव । क्षान्तिरुपशमो विदुषां वेदार्थवर्षणः शरीरस्य ज
प्रच्छन्नपापानामविख्यातदोषानामघमर्षणादिः सूक्तजपः शुद्धिसाधनं मनः सदस
त्संकल्पात्मकं । तस्यासत्संकल्पादशुद्धस्य सत्यं साफल्यं संकल्पः शोधनं भूतशब्देन तद्वि
कारभूतो देहेन्द्रियसंघातोऽत्र लक्ष्यते । तत्रस्पृष्टो नो संकोचोहं कृशः स्थूलो गौरो वा धीरोहमित्येत
दाभिमानित्वे नयो यमात्मा वर्तते । सभूतात्मा तस्य तपो विद्ये शुद्धिनिमित्ते । तपःशब्दे
नानेकजन्मस्वेकस्मिन्नपि जन्मनी जातत्त्व समुच्चयावस्थायां आत्मनो यो यमन्वयः
शरीरादिके च व्यतिरेकः सोभिधीयते यथा तपसा ब्रह्म विजिज्ञासस्व लिपंको श व्य
तिरेकप्रतिपादनपरे वाक्ये विद्याशब्देन चौपनिषदं संस्थूलमनन्तं । अस्तूर्ध्व मसंगो
ह्ययमात्मेत्यादितत्त्वदार्थनिरूपयर्थवदर्पेनात्मशुद्धापापप्रमाणरूपं ज्ञानं विशोधनं

क्षेत्रस्य तपोविद्याविशुद्धस्य त्वंपक्वाद्यार्थंभूतस्य तत्त्वमस्यादिवाक्यजन्यात्साक्षात्मरस्
पादीश्वरस्वात्मा नास्यरमविशुद्धिः मुक्तेर्लक्षणं यथेतः सुद्धयः परमपुरुषार्थलद्धेत्का
लशुद्धिरूपीत्येवं ॥ प्रसंगात्सार्थंभूतानामाद्विमाद्विशुद्धिविधानं ॥ इत्याशौचप्रकरणं ॥ अथा
पद्यपि चक्रष्टा यो यो सद्यः शौचं विविधीयते रत्यापद्धिमुख्याशौचकल्पानुष्ठानासंभ
सद्यः शौचाद्यनुकल्पमुक्तं इदानीं तत्प्रासंगात् आपद्धिप्रतिप्रसवोधिकोविप्रेयाजनाध्या
पनेतथेत्यात्कयाजनादिमुख्यवृत्त्यसंभवेवृत्त्यंतरमाह ॥ क्षात्रेण कर्मणा जीवेद्विषां
वाप्यापदि द्विजः निस्तीर्यतामथ्यात्मानं पावयित्वा न्यसेत्पथि ॥ द्विजो विप्रो न कुटुं
बस्य पोषणयुक्त्याजीवितुसमर्थः ॥ क्षत्रसंबंधेन कर्मणा शस्त्रग्रहणादिना पवि जीवेत्तेना
पिजीवितुमशक्तः वश्यैश्य कर्मणा वाणिज्यादिना जीवेत् नतु शूद्रवृत्त्या ॥ तथा च मनुः
उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ॥ द्विजः कृषिगोरक्षमास्थाय जीवेद्वैश्य
जीविकाम् ॥ तथा आपद्यापि न हीनवर्णेन ब्राह्मणी वृत्तिराश्रयणीया ॥ किंतु ब्राह्मणो

नष्टत्वाद्वा क्षत्रियेण वैश्यसंबंधिनी जीविकेव न सौरी स्यैवं स्वानंतरहीनवर्णवृत्तिरेव ॥ अ
जीवंस्तु स्वधर्मेणानंतरां पापीयसीं वृत्तिमातिष्ठेत् न तु कदाचिज्ज्यायसीमिति वसिष्ठ
श्च स्मरणात् ॥ ज्यायसी ब्राह्मणी वृत्तिः ॥ तथा च स्मृत्यंतरं ॥ उत्कृष्टं चापकृष्टं च तयोः
कर्म न विद्यते ॥ मध्यमे कर्मणी हित्वा सर्वसाधारणे हि ते ॥ इति शूद्रस्योत्कृष्टं ब्राह्मणक
र्म न विद्यते ॥ तथा ब्राह्मणस्यापि निकृष्टं शौद्रं कर्म ॥ मध्यमे क्षत्रवैश्यकर्मणी पुनराप
द्गतः सर्वसाधारणे ॥ शूद्रस्यापद्गतो वैश्यवृत्त्याप्यशक्तस्य वा जीवेत् ॥ शूद्रस्याद्विजशुश्रूषा
तया जीवन्नवाप्नुयात् ॥ शिल्पैः वा विविधैर्जीवेद्द्विजातिहितमाचरन् ॥ इति प्रा
गुत्कृष्टत्वात् ॥ मनुना चात्र विशेषो दर्शितः ॥ यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजा
तयः ॥ तानि कारुककर्माणि शिल्पानि विविधानि च ॥ इति ॥ अनेनैव न्यायेनानुलोमा
सन्नानामपि स्वानंतरानंतरापि वृत्तिर्विकल्पनीया ॥ एवं स्वानंतरहीनवर्णवृत्त्यापद्यनिस्तीर्य
प्रायश्चित्तं चरेन्नात्मानं यावदपि स्वापद्यपि रपसेत् स्ववृत्त्या वात्मानं स्थापयेद्धि स्पर्धः

पद्धायमर्थः ॥ गर्हितनतत्र त्वार्जितं धनं वाप्यिभ्यसेत् ॥ उत्सृजेदिति ॥ तथा च मनुः ।
जपहोमैरपैत्येनो याजनाध्यापनैः कृतं ॥ प्रतिग्रहनिमित्तं तु त्यागेन तपसैव चेति ॥ वै
श्यवृत्त्याजीवतो ब्राह्मणस्य पदपननीयं तदाह ॥ फलोपलक्षौमसोममनुष्यापूपवीरु
धः ॥ तिलौदनरसक्षारान् दधिक्षीरं घृतं जलं ॥ शस्त्रासवमधूच्छिष्टमधुलाक्षाश्च
बर्हिषः ॥ मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः ॥ कौशेयनीललवणमांसैकशफसी
सकान् ॥ शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैव च ॥ वैश्यवृत्त्यापि जीवन्नो विक्रीणी
त कदाचन ॥ नो विक्रीणीतेति प्रत्येकमभिसंबध्यते ॥ फलानि कदलीफलादीनि
बदरींगुदव्यतिरिक्तानि ॥ यथाह नारदः ॥ स्वयंशीर्णानि पत्राणि फलानां बदरींगुदे
रज्जुः कार्पासिकं सूत्रं तच्चेदविकृतं भवेदिति ॥ उपलं मणिरत्नाद्यश्ममात्रं ॥ क्षौममत
सीसूत्रमयं वस्त्रं ॥ सौरममसदृशं तालवादेरुपलक्षणं ॥ यथाह मनुः ॥ सर्वं च तांत
वं रक्तं शाणक्षौमाविकानि च ॥ अपि चेत्स्युररक्तानि फलमूले तथौषधीरिति ॥ सोमो

भद्रीः

लतादिविशेषः॥ मनुष्यशब्देनाविशेषात् स्त्रीपुंनपुंसकानां ग्रहणं॥ अपूपं मंडकादि भक्ष्य
मात्रं वीरुधो येत्राम्लतादिलताः तिन्ताः प्रसिद्धाः॥ ओदनग्रहणं सौम्यमात्रोपलक्षणं
रसा गुडेक्षुरसशर्करादयः॥ तथा च मनुः॥ क्षीरं क्षौद्रं दधि घृतं तैलं तैलं मधु गुडे
क्षुजानि निक्षारापवक्षारादयः॥ दधिशब्दोत्र्योर्ग्रहणं मस्तुपिंडकिलाटकूर्चिकादीनां
तद्विकाराणामुपलक्षणं॥ क्षीरं सविकारमिति गौतमस्मरणात्॥ घृतग्रहणं तैलादिस्ने
हमात्रोपलक्षणं जलं प्रसिद्धं शस्त्रं खड्गादि॥ आसवग्रहणं मद्यमात्रोपलक्षणं॥ मधूच्छिष्टं
सिक्थकं मधु क्षौद्रं लाक्षा जतु वर्हिः कुशाः मस्त प्रसिद्धा चर्म अजिनं॥ पुष्पं प्रसिद्धं॥ अन
लोमकृतः कंबलः कुतपः॥ केशाश्च मयादिसंबद्धाः॥ तक्रसुरभित्वितातिविषं शृंग्यादिवि
निम्नमिः नित्यं मांसं भीरिपवाजावत्समधो न्वनर्बुदं॥ एकखुरं इति गौतमस्मरणात्॥ कोशे
यं कोशाप्रभवं नीलं नीलरासे॥ लवणग्रहणं नाविडसौवर्चलसैंधवसामुद्रमौमक्षत्तिमा
न्यावशेषाणामुपलक्षणं॥ मांसं प्रसिद्धं एकशफा अश्वादयः सीसग्रहणं लोहमात्रोपलक्षणं॥ शा

यदन्यत्रापि नीवन् ब्राह्मणः कदाचिदपि नैव तिलविक्रीणीतान्यत्र पादे ल्लनदोष ॥ अत एव नारदेन ३

वं सर्वमविशेषात् शूद्रधर्मः फलपाकान्ताः ॥ आदौ लिप इति विशेषोपादानात् । शुद्धे शुन
दोषः । पिण्याकः प्रसिद्ध एव ॥ अरण्याः ॥ आरण्यांश्च पशून् सर्वान् दंष्ट्रिणश्च वयांसि चे
ति मनुस्मरणात् । गोधाश्वार्दनाग्रहप्रभृतयः सर्वाश्चैतान्येवं वेष्ठवचनाच विक्रेयं ब्राह्म
णस्य पयोदधादिति ब्राह्मणस्यागरहणे कृते प्रतिप्रसवमाह । धर्मार्थं विविक्रेयं नेयास्तिला धा
न्येन तत्समा । यद्यावश्यकायावयस्तादि धर्मोल्लसाधनव्रीसादिधान्याभावेन निश्च
यते । तर्हि धान्येन तिला विक्रेयं नेयास्तत्समाः द्रोणपरिमिताः द्रोणपरिमितेनैवं वे ते
न धान्येन समाः ॥ तथा च मनुः ॥ काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः । विक्री
णीत तिलान् शूद्रान् धर्मार्थमचिरस्थितानिति धर्मग्रहणमावश्यकमेव जाद्युपलक्ष
णं ॥ अत एव नारदः ॥ आपत्कौ ब्राह्मणः स्यार्थे यतदेतौ तत्वैव च यथावश्यं तु विक्रेया
स्तिला धान्येन तत्समा इति । न चान्यथा विक्रीणीते तदा दोषः ॥ भोजनाभ्यञ्जनादानाद्य
न्यत्कुरुते तिलैः । कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जतीति मनुस्मरणात् स

जातीयेषु विनिमयो भवतीति व। रसा रसैर्विनिमातव्या न त्वेव लवणं रसैः। कृतान्नं च कृतान्ने
न तंदुलादिना परिवर्तनीयमिति पावत्स्व। पूर्वोक्तनिषेधबाधित क्रमेदोषसाक्षीत्वाक्षालन
वणमांसानि पतनीयानि विक्रमये। पयोदधिचियमद्यं च हीनवर्णकराणि शूद्रस्तु त्यक्त्वा
पादकानि याति तिरिक्तापणपविक्रये वैश्यपत्नुत्यता। यथाह मनुः। सद्यः पतति मांसेन
लाक्षया लवणेन च। त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। इतरेषाम पण्या
नां विक्रयादिह कामतः। ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छतीति। किं च। आपद्ग
तः संप्रगृह्णन्भुंजानो पि यतस्ततः। न लिप्यते नसा विप्रो ज्वलनार्कसमो हि सः। यत्स्वध
र्मो वसन्नल्पकं दुष्टं वत्तयापद्गतो पि जत्रवर्तितैवैश्यवर्तिवान् प्रतिविक्षिप्तसपतस्ततो ही
नतरं हीनतरं हीनतमेभ्यः प्रतिगृह्णन्नदत्तं भुंजानो पि वा नैवैनसा पापेन संनिपत्य
ते। यतस्तस्यामापद्यस्यापाप्रातेयदोषावधकारित्वेन ज्वलनार्कसमः। यथा ज्वलनो
र्कश्च शरीरनशंकरेपि न दुष्यति तथायमापद्गतो न दुष्यतीत्येतावता तत्साम्यमेवं चवद

ताऽप्यापद्युक्तस्य परस्य परधर्माश्रयणाद्वि गुणमपि स्वधर्मानुष्ठानं मुख्यमेवेति द
र्शितं भवति ॥ तथा च मनुः ॥ वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः ॥ परधर्माश्र
याद्धि सः सद्यः पतति जातित इति ॥ किंच कृषिः शिल्पं भृतिर्विद्याः कुशीदं शाक
टं गिरिः ॥ सेवानूपं नृपो भैक्ष्यमापत्तौ जीवनानि तु ॥ ऽआपत्तौ जीवनानीति विशेषण
मत्र ॥ कृष्यादीनां मध्येऽनापद्यवस्थायां यस्य या वृत्तिः प्रतिषिद्धा तस्य सा वृत्तिरने
नाभ्यनुज्ञा ॥ यतो यथाऽऽपद्यपि विशेषवृत्तिः स्वयं कृता कृषिर्विप्रः क्षत्रियवोरभ्यनुज्ञा
यते ॥ एवं शिल्पादीनामभ्यनुज्ञायते ॥ शिल्पं सूपकरणादि ॥ भृतिः प्रेष्यत्वं विद्याम
काध्यापकत्वाद्या कुशीदं वृध्यर्थं द्रव्यप्रयोगेन तः स्वयंकृतमभ्यनुज्ञायते शाक
टं भाटकेन धान्यादिवहनद्वारेण जीवनहेतुः ॥ गिरिस्तोगतरणेन्धनद्वारेण जीव
नं सेवा परचित्तानुवर्तनं ॥ अनूपं प्रचुरतरतृणवृक्षजलप्रायप्रदेशः तथा नृपयाच
नं भैक्ष्यं स्नातकस्यापि यतान्यापत्तौ जीवनाहेतवनाहेतव इति ॥ तथा च मनुः ॥ विद्य

धीःस्यं भक्तिसेवा गोरक्षा वाणिज्यं कृषिः॥ गोरक्ष्ये कुसीदं च वृद्धजीवनं दे तत्र वृत्ति य
दा कृष्यादीनामपि जीवनं दे स्तनाम संभवत्तदा कष्ये जीवनमित्यर्थः॥ प्राह वृद्धहारीत
स्यरं स्थित्वा धान्यमश्नन् लक्षणं दूरेत्॥ प्रतिग्रहस्तदाव्येय मभियुक्ते नधर्मतः॥ धान्यमा
वेनत्रिरात्रं बहुस्थितेषु त्रिःस्थित्वा॥ सा ब्राह्मणः क्षुद्रात्तदभावे वैश्यात्तदभावे क्षत्रिया
द्वाहीनस्य कारस्य पर्याप्तं धान्यमाहरेत्॥ तदाह मनुः॥ तथैव सप्तमे भक्ते भक्तानि षट्
ऽनश्नता॥ अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः॥ तथा प्रतिग्रहोत्तरकालं प
दपहृतं तद्धर्मतो यथावृत्तमाख्येयं यदि नाकन्न स्वामिनान्वयेदं किं मम पहृतमिति त्यः
भियुज्यते॥ यथाह मनुः॥ खलात् क्षेत्रादगाराद्वा यतो वाप्युपलभ्यते॥ आख्यातव्यं तु
तत्तस्मै पृच्छते यदि पृच्छति॥ इदमपरमापत्प्रसंगाद्राज्ञो विधीयते॥ तस्य वृत्तं कुलं शी
लं श्रुतमध्ययनं तपः॥ ज्ञात्वा राजा कुटुंबं च धर्म्यां वृत्तिं प्रकल्पयेत्॥ योग्यानां यापरीतो च सद
ति तस्य वृत्तमाचरेत् कुलमाभिजात्यं॥ शीलमात्मगुणसंभृतं प्रात्यक्षवरं॥ अध्ययनं वेदाध्ययनं त

तः धाद्यादिचयपरीक्ष्य राजा धर्मादनपेतां वृत्तिं प्रकल्पयेत्। अन्यथा तस्य दोषः। तथा च
मनुः। यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा। तस्य सीदति तद्राष्ट्रं दुर्भिक्षव्याधि
पीडितमिति। इत्यापद्धर्मप्रकरणं। चतुर्णामाश्रमिणां मध्ये ब्रह्मचारिगृहस्थयो
धर्माः प्रतिपादिताः सांप्रतमवसरप्राप्तान् वानप्रस्थधर्मान् प्रस्थ्याधर्मान् प्रतिपाद
यिषुराह। सुतविन्यस्तपत्नीकस्तया वानुगतो वनं। वानप्रस्थो ब्रह्मचारी साग्निः
सोपासनो व्रजेत्। वने प्रकर्षेण तिष्ठति नियमेन चरतीति वनप्रस्थो वनप्रस्थ
एव वानप्रस्थः। सत्यां द्वैधीभाविनी रतिमात्रेण वनं प्रतिष्ठातुरिति यावत्। अ
सौ सुतविन्यस्तपत्नीकस्त्वयेयं मरणे येन स्वेषु सुतेषु विन्यस्ता निक्षिप्ता पत्नी येन स त
थः। यदि सा पतिव्रतचर्याभिलाषेण स्वयमपि वनं जिगमिषति तदा तया वानुगतो
वा सहितो। तथा सोपासने। अग्निसहितः तत्र वनं व्रजेत्। सुतविन्यस्तपत्नीक
इति वदता कृतगौर्हस्थ्यो वानप्रस्थोऽधिक्रियत इति दर्शितं। एतच्चाश्रमसमुच्चयपक्ष

मंगीकृत्योक्तं ॥ दत्तद्योविप्लुतब्रह्मचर्यो यमिच्छेत्तु तमावसेदित्यकृतगार्हस्थ्योपि
वनवासेधिक्रियतेएवा अपं चवनप्रवासोजाराजर्जरकलेवरस्यजाततपौत्रस्यचा प
थाह मनुः ॥ गृहस्थस्तुयदापश्येद्वलीपलितमात्मनः ॥ अपत्यस्यैवचापत्यंतदार
ण्यंसमाश्रयेदिति ॥ अपंचपुत्रेचपत्नीनिक्षेपोविद्यमानभार्यस्य ॥ मृतभार्यस्याचापि
त्तेवाग्निभिर्नवासमाचरणात् ॥ अत्तोपद्याहपित्याग्निहोत्रेणैतिनराधानविधानेतद
परिपक्वकषायविषयसाग्निः सोपासनकृत्स्नाग्निपदर्थीधानंकृतेतदाश्रो
त्ताग्निमिगृहेनचसाहित्तोवनेअजेत् ॥ सर्वाधानेतुश्रौतैरेवकेवलंपरिकल्प्यविज्ञेप
श्नीतुरनाहितानिस्वाहितानाश्रौतानपोनाहितास्ताहिकैवलंसोपासनेअजेत्स्येयंवि
वेचनीयं ॥ अग्निनयनेचैताश्रिवन्याग्निहोत्रादिकर्मसिद्ध्यर्थं ॥ अतएवमनुः ॥ वैता
निकंतजुहुयादग्निहोत्रंयथाविधि ॥ दार्शमस्कंदयत्पर्वपौर्णमासंचस्याक्रेतद्दतिन
त्पुत्रनिक्षिप्तपत्नीकस्यतद्विरहितः ॥ कथमग्निहोत्रादिकर्मानुष्ठानेघटतेपत्न्या

सहपष्ठ्यामित्ति सहाधिकारनियमात् । तत्पमेवं किं त्वत्रपत्नीनिक्षेपविधि[illegible]त्वादे-
वतन्त्रेरपेक्षणाधिकारः कल्पते ॥ यद्वा ॥ एतस्य त्वन्नापोयस्य ब्रतेहमिपत्नीनान्नमुकास्या
तामपउद्यपजेत्येतस्य परोधीविधिवता तन्निरपेक्षत्तापत्नी वनं प्रत्तिष्ठमानेपे मवतिपत्न्यनु
मनुतप्रत्तिनाविरोधः । नचयत्याश्रस्तचारिणे विधुरस्य वापनं प्रस्थितस्याग्निहोत्रादिपरि
लोपस्तस्याग्निक्षेपस्य पत्नीकस्याप्यग्निहोत्राद्यभावस्त्याप्यौकनीयं ॥ प्रयाक्षिकत्वेनश्राव
श्रावणात् ॥ नब्रह्मचारिविधुरयोरप्यग्निहोत्रसाध्यकर्मस्वनधिकरः ॥ पंचममासादूर्ध्वमा
ह्नितश्रावणकाग्नेस्तदधीकारदर्शनात् ॥ वानप्रस्थोजटिलः चीराजिनवासानफलकृष्ट
मधित्तिष्ठेदकृष्टमूलसंविन्वीनोर्ध्वरेताः क्षपाशयोदद्यादेवनप्रतिग्रह्णीयादूर्ध्वं पंच
म्योमासेभ्यः श्रावणकेनाग्निमाधायाहिताग्निर्वृक्षमूलिकोदद्याद्देवपितृमनुष्येभ्यः
सगच्छेत्स्वर्गमानन्त्यमित्तिविष्णुघ्रष्टस्मरणात् ॥ वल्कवीरं वस्त्रखंडं वल्कलमजिनंवा
नफालकृष्टमधित्तिष्ठेत् ॥ कृष्टक्षेत्रस्यापरिनननिवसेत् ॥ श्रावणिकेनवैखानसेन मार्गे

ण न लौकिकेत्यर्थः ॥ सरितः सोयासनो ब्रह्मेत्यादि त्वेतदग्निसाध्यश्रौतस्मार्तकर्मानुष्ठाना
र्थमित्युक्तं ॥ अत्र गुणविधिमाह ॥ अफालकृष्टेनाग्नींश्चापि स्वदेवानतिथीनपि ॥ भृत्यां
श्च तर्पयेत्तु श्मश्रुजटालोमभृदात्मवान् ॥ फालकृष्टेन कर्षणेन साधनेनापि लक्षणे ॥ अ
कृष्टक्षेत्रोद्भवेन नीवारश्यामाकादिनाग्नींस्तर्पयेदग्निसाध्यानि कर्माणि अनुति
ष्ठेत् ॥ चशब्दाद्विद्यादानमपि तेनैव कुर्यात् तथा पितॄन्देवानतिथीन् ॥ अपिशब्दाद्भृत्या
नपि तेनैव तर्पयेत्तथात्मवान् ॥ चशब्दाद्दाश्रमप्राप्तानपि ॥ तथा च मनुः ॥ पञ्चज्ञः स्यात्ततो
दद्याद्बलिभिक्षां च यथाशक्तितः ॥ अमूलफलभिक्षाभिरर्चयेदाश्रमागतानिति ॥ एवं पंचम
हायज्ञान् कृत्वा स्वयमपि तच्छेषमेव भुंजीतादेवताभ्यश्च हुत्वा वनमेध्यतरं हविः ॥ शे
षमात्मनि भुंजीत लवणं च स्वयं कृतमिति मनुस्मरणात् ॥ स्वयंकृतम् खारलवणं ॥ एवं
च सोनायथ्येपागाद्यर्थे च भुत्यजातिपमाञ्भ्याहारपरित्यागोर्थसिद्धः ॥ अतएव मनुः
संत्यजेद्ग्राम्यमाहारं सर्वं चैव परिच्छदमिति ॥ ननु च दर्शमासादेर्ब्राह्मणादिग्राम्यद्रव्यसा

ध्यत्वात्कथं तत्परित्यागः॥ न च वचनीयम फलकस्येनाम्नो स्वेति विशेषवचसाम
र्थ्यात् ब्रीह्यादिबाध इति विशेषविषयत्वेपि न्यायप्राप्त्याकृतिबाधस्यान्याय्यत्वात् अ
फलकत्वं विधेश्च समानत्वात् तस्मात् साध्यकर्मविषयत्वेनाप्युपपत्तेः तस्मादेवं किंत्वन
ब्रीह्यादेरफलकस्य त्वे संभवान्नविरोधः॥ अतएव मतेना॥ वसंतशरदोर्मध्ये मुन्य
न्नैः स्वयमाहृतैः पुरोडाशं स्वयं कुर्वीत वा विधिवन्निर्वपेत् यागेति नीवारादिमुन्यन्नानां स्व
नामेध्यत्वासिद्धेः पितृमेधे मध्यमरण्ये पसाद्ब्रीह्यादिः प्राश्यार्थं कृतं॥ मेध्योयसन्त्व
दर्दृ मेध्यमिति॥ तथा श्रमस्थ नियुक्ते नाम प्युपलक्षणं॥ तथा च मनुः॥ जगाश्चापि त्यया
न्नितत्पेस्मा समानुलोमन खोस्त्यति॥ अप्य प्राप्तवान् आत्मोपासनाभिरतः स्यात्॥ पूर्वो
त्कृष्ट्यं सेचयनियमनाद्॥ अहोमासस्य षण्णं वानत्यासे वत्सरस्य वा॥ अर्थसम्भ्र
चयं कुर्यान्कृतमाश्वयुजेत्यजेत्॥ एकस्याहूसंवंधिनो नवप्नादिदाहस्य कर्मणः
पर्याप्तस्यार्थस्य संचयं कुर्यात्॥ मासस्य वा षण्णां वा मासानां संवत्सरस्य वा संवंधिकर्म

पर्याप्तं संचयं कुर्वीत ॥ नाधिकं ॥ यद्येवं क्रियमाणेपि कस्यचिद्दिनानि रिच्यन्ते तर्हि तदानीमा

हृमात्रेण पुनर्मासि स्मृत्यजेत् ॥ किंच ॥ दान्तात्मा निश्चयवृत्त्या पीनिवृत्तत्वप्रतिग्रहात्म

स्वाध्यायपवान्दानशीलः सर्वसत्त्वहिते रतः दान्तो दर्परहितः ॥ त्रिषु सवनेषु प्रातर्म

ध्यान्हे नापराह्णे षु स्नानशीलः तथा प्रतिग्रहः पराङ्मुखः ॥ यथाद्या याजनादिनिवृत्तत्व

स्वाध्यायपवान्नयेदात्मात्मपरतः ॥ तथा मूलफलभिक्षादिदानशील सर्वाण्यहितानाचरण

नियतस्यात्मवेत् ॥ किंच ॥ दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः ॥ श्रौतस्मार्तं

फलनस्तेयो कर्म कुर्यात् क्रियाल्पया ॥ दन्ता एवोलूखलं निस्तुषीकरणसाधनं दन्तोलूख

लं तद्यस्यास्ति स दन्तोलूखलिकः ॥ कालेनैव पक्वं कालपक्वं धान्यादि तत्र नीवारादेर्

श्यामाकादेर्वा बदरादिपक्वेङ्गुदादिफलं च तदशनशीलः ॥ कालपक्वाशी वाशब्दोऽग्नि

पक्वाशनेनो वा स्यात् कालपक्वभुगेव वेति मनुस्मृत्यग्निपाकाभिन्याभिप्रायः ॥ अश्मकु

ट्टको वा भवेत् ॥ अश्मना कुट्टनमवहननं यस्य तेनोस्याः ॥ तथा श्रौतस्मार्तं च कर्म द्वस्मा

र्थ्यमभोजनाभ्यंजनादिक्रिया॥ लुकुचमधूकादिमेध्यतनुफलोद्भवैः स्नेहद्रव्यैः कुर्यात्
नघृतादिकैः॥ तथा च मनुः॥ मेध्यवृक्षोद्भवानद्यात्स्नेहांश्च फलसंभवानिति॥ ब्रह्मचार्य
तथाविधिहि भोजनानिवृत्तिमाह॥ चांद्रायणैर्नयेत्कालं कृच्छ्रैर्वा वर्तयेत्सदा॥ पक्षे गते वाप्य
श्नीयान्मासे वाहनि वा गते॥ चांद्रायणैर्वक्ष्यमाणलक्षणैः कालं नयेत्॥ कृच्छ्रैर्वा प्राजा
पत्यादिभिः कालं वर्तयेत्॥ यद्वा पक्षे पंचदश्यादिना स्मके मासांते ऽश्नीयात्॥ मासे
वाह्नि वा गतेन क्रमशोऽश्नीयात्॥ अपि पक्षश्चतुर्थकालिकत्वादिनापि यथाह मनुः
नक्तं वान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः॥ चतुर्थकालिको वा स्यात्स्याद्वाष्टमकालि
कस्तथा॥ एतेषां च कालनियमानां शक्त्यपेक्षयापि कल्पः॥ किंवा स्थाद्भूमौ शुची
रात्रौ दिवा संप्रपदैर्नयेत्॥ स्थानासनविहारैर्वा योगाभ्यासेन वा तथा॥ आशारयेद्वात
वसरवर्षं रात्रौ शुचिः प्रयतः स्वप्यात्॥ नोपविष्टो नापि तिष्ठेत्॥ दिवास्वप्नस्य पुरुष
मात्रार्थं तथा प्रतिषिद्धत्वान्न तन्निवृत्तिपरं तथा रूमावेव स्वप्यात्रप्राप्ये कृ[illegible]त्ति तापां

मेव कोशे वा ॥ दिने च संप्रपदैर्नदिनैर्नयेत् ॥ स्थानासनाभ्यां वा विहारैः संचारैः कैश्चित्का

लं स्थानेन कंचित्रोपवेशनेनमित्येवं नादिनं नयेत् योगाभ्यासेन वा तथा च मनुः ॥ विवि

धाश्चौपनिषदीरात्मसंसिद्धये श्रुतीरिति ॥ आत्मनः संसिद्धये ब्रह्मत्वप्राप्तये तथा शास्त्र

तजितपमित्त्यो वनाद्यान्नयेत् ॥ भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनमिति मनुस्मरणा

त् ॥ प्रपदैः पादाग्रैः ॥ किंच ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिले शयः ॥ आर्द्रवासास्तु हे

मंते शाल्मलं वापि तपश्चरेत् ॥ स तु संवत्सरे ग्रीष्मो वर्षा क्रमाद्धेमंत इति प्रसिद्धेनात् ग्री

ष्मे चैत्रादिमासचतुष्टये चतसृषु दिक्षु चत्वार उपरि आदित्य इत्येवं पंचाग्नीनां म

ध्ये तिष्ठेत् ॥ तथा वर्षासु श्रावणादिमासचतुष्टये त्विके नु वासो वसीत ॥ एवं विधतप

श्चरणासमर्थः स्वशक्यमुद्दिश्य वा तपश्चरेत् ॥ तथा शरीरशोषणं त्यापते त ॥ तपश्चरंश्चो

ग्रतरं शोषयेद्देहमात्मन इति स्मरणात् ॥ किंच यः कंटकैर्वितुदति चंदनैर्यश्च लिंपति

अक्रोधो परितुष्टः समस्तस्य च तस्य च तस्य वापः कश्चित्कंटकादिभिर्विविधमंगानि वितु

दन्ति व्यथयन्ति तस्मै न क्रुध्येत्, यः खं दन्तादिभिरुपलिंपति तेषु व्यथयन्ति तस्य न परितुष्येत्
किंतु तयोरुभयोरपि समः स्यादुदासीनो भवेत्। अग्निपरिचर्याक्रमं प्रत्याह। अग्नीन्वा
प्यात्मसात्कृत्वा वासोभिनाश्रमः वानप्रस्थगृहेष्वेव यात्रार्थं भैक्ष्यमाचरेत्। अग्नी
नात्मनि समारोप्य वृक्षवासी वृक्षएव आवासः कुटी यस्य स तपोत्स्यामिनाश्रमः
अल्पाहारो अपि पिष्टाद्यन्नफलमूलाद्याश्रमस्य भवेत्। यथाह मनुः। अग्नीन्वात्मनि वै
तानां समारोप्य यथाविधिः। अनग्निरनिकेतस्यान्मुनिर्मूलफलक्षं वा वानप्रस्थगृहे
ष्वाचरेत्। यदा तद्दलं भवेत् व्याधिभिर्वा व्याधिभिर्भयो वा तदा किं कर्तव्यमित्यत
आह। ग्रामादाहृत्य वा ग्रासानष्टौ भुंजीत वाग्यतः ग्रामाद्भैक्ष्यमाहृत्य वा यत्नो भो
जी भूत्वा। अष्टौ ग्रासान्भुंजीत ग्रासभैक्ष्यविधानात् मुख्यं नियमोऽर्थं तु दः
यदा पुनरस्य भिर्गोसैः प्राणधारणं नस्यं भवति। तदा अष्टौ ग्रासा मुने भैक्ष्यं वानप्रस्थ
स्य गृहे भवेदिति समस्त्यं तपो तं दृष्टव्ये। सकलान्नष्टानासमर्थं प्रत्याह। वायुभक्षा प्रागुदी

चीगच्छेदावर्ष्मसंक्षयात् । अथवावायुरेवभक्ष्योगस्यास्यावायुभक्षाः प्रागुदीचींमेशा
नीं दिशंगच्छेत् ॥ आवर्ष्मसंक्षयात् ॥ वर्ष्म वपुस्तस्य निपातात्तस्य पर्यन्तमकुटिलगा
तिर्गच्छेत् ॥ यथाह मनुः ॥ अपराजितां वास्थाय दिशं गच्छन्नजिह्मगतिमशास्या
नेप्य शक्तोभृगुपतनादिकं वा कुर्यादिति ॥ वानप्रस्थो वीराध्वानं ज्वलनांबुप्रवेशनं भृगु
पतनं वानुतिष्ठेदिति गौतमस्मरणात् । लोनाबमनादिनियमाब्रह्मशरीरप्रकरण
मिदितामृत्याविरोधिनोस्यापिभवंति ॥ ज्वलनादीनां चैतदविरोधीति गौतमस्मरणात् ॥ ए
वं प्रागुदितैरवादिदीक्षामहाप्रस्थानपर्यन्तैस्तनुत्यागात्तमनुतिष्ठन् ब्रह्मलोके प्रा
प्नोति ॥ यथाह मनुः ॥ आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुं ॥ वीतशोकभयो विप्रो
ब्रह्मलोके महीयत इति ॥ ब्रह्मलोकस्यानविशेषेण तु नित्ये ब्रह्मतत्त्वलोकप्राप्तस्या
स्यायोगात् । तुरीयाश्रमसंतरेण मुक्त्यनंगीकारश्च ॥ न च योगाभ्यासेन वाष्ठनरीति
ब्रह्मोपासनं विधमनुपपत्या तद्भावापत्तिः परिशोकनीयाः सालोक्यादिप्राप्त्यर्थत्वे नापि

तदुपपत्तेरत्र एव श्रुतौ त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति प्रथम
स्तपो ब्रह्मचर्याचार्यकुलवासी तृतीयोऽत्यंत माचार्यकुल एवात्मानमवसादय
न्निति गार्हस्थ्य वानप्रस्थनैष्ठिकत्वान्यनूद्य समभिधाय सर्व एते पुण्यलोका भवंती
ति त्रयाणामाश्रमिणां पुण्यलोकप्राप्तिमभिधाय ब्रह्मसंस्थोऽमृतत्वमेतीति ॥ पारिशे
ष्यात्पारिव्राजकस्यैव ब्रह्मसंस्थस्य मुक्तिलक्षणममृतत्वप्राप्तिरभिहिता ॥ यदपि श्रा
द्धकल्पस्य वादी चार्हस्यापि हि मुच्यत इति गार्हस्थ्यस्यापि मोक्षप्रतिपादिनेतदु
पांतराणां भूतपारिव्राज्यस्यैवस्यैव गंतव्यं ॥ इति वानप्रस्थप्रकरणं ॥ वैखानसधर्मा
नतुक्रम्य क्रमप्राप्तान्पारिव्राजकधर्मान्सांप्रत प्रस्तौति ॥ वनाद्गृहाद्वा कृत्वेष्टिं सा
र्ववेदसदक्षिणां ॥ प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि ॥ अधीतवेदो जपकृ
त्पुत्रवानन्नदोऽग्निमान् ॥ शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥ यावता को
ऽनंतोऽप्रतयः ॥ शोषितवपुषो विषयकषायपरिपाको भवति ॥ पुनश्च मरीचिर्द्वा शं

कानो ह्याप्येतेनावत्कालपर्यंतं वनवासं कृत्वा ततस्समनंतरं मोक्षे मनः कुर्यात् ॥ वन
महशब्दाभ्यां तत्संबंध्याश्रमो लक्ष्यते ॥ मोक्षशब्देन च मोक्षैकफलकश्चतुर्थाश्रमः
अथवास्मद्वा गार्हस्थ्यादनंतरं मोक्षे मनः कुर्यात् ॥ अनेन च पूर्वोक्तचतुराश्रमसमु
च्चयपाक्षिक इति द्योतयति ॥ यथा च विकल्पो जाबालश्रुतौ श्रूयते ॥ ब्रह्मचर्यं समा
प्य गृही भवेद्गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् ॥ यदि वेतरथा ब्रह्मचर्यादे
व प्रव्रजेत् ॥ गृहाद्वा वनाद्वेति तथा गार्हस्थ्यनंतराश्रमयाद्यश्वगेतमेनदर्शितः ॥ एकाश्र
मेत्याचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येति ॥ एषां समुच्चयविकल्पबाधः पक्षाणां सर्वे
षां श्रुतिमूलत्वादिच्छयाविकल्पः ॥ अतोपत्यैकस्त्रियंडि तमन्यैवक्तं स्मार्तत्वान्नै
ष्ठिकारीणां गार्हस्थ्यन श्रौते न बाधः ॥ गार्हस्थ्यानधिकृतोपत्नीवादिविषयता चेति
तस्याध्यायाध्यापनवैधर्यनिबंधनमित्युपेक्षणीयं ॥ किंच ॥ यथा विद्युक्तमण
वेक्षणमधक्षमतनायेग्वारीणां श्रौते धनाधिकारस्तथा स्मार्तेष्वपुरक्तं भाहरण

४७

भिक्षाचर्यां स्समत्वात्कष्टेषणादिविषयतया नैष्ठिकत्वादाश्रमनिर्वाहः ॥ अस्मिंश्चाश्रमे ब्राह्म
णस्यैवाधिकारः ॥ ब्राह्मण्याग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥ तथाचाभिहितो
धर्मो ब्राह्मणस्य चतुर्विधस्तूपक्रमोपसंहाराभ्यामत्र नाब्राह्मणस्याधिकारप्रतिपा
दनात् ॥ ब्राह्मणः प्रव्रजन्तीति श्रुतेश्चाग्रजन्मन एवाधिकारे न द्विजातिमात्रस्य ॥ अ
न्ये तु त्रैवर्णिकानां प्रकृतत्वात्तत्त्रयाणां वर्णानां चेदमधीत्य चत्वार आश्रमा इति
सूत्रकारवचनाद्बाह्यद्विजातिमात्रस्याहुः पदावचनात् ॥ ऊर्ध्वं प्रव्रजेत्तदा सावेद
सदक्षिणां सर्वधनसंवेदिनीं दक्षिणां यस्याः सा तस्योक्तानां प्राजापत्यां प्रजापति
देवताकां कृत्वा तदन्ते तानग्नीनात्मनि श्रुत्युक्तविधिना समारोप्य चतुरका
दुदरगयमेयोरर्णमास्यां पुरश्चरणमादौ कृत्वा स्वदेहेन कामेनाष्टौ श्राद्धानि निर्वपेत् ॥ दा
दशावेतिबौधायनाद्युक्तं पुरश्चरणादिकं कृत्वा ॥ तथाधीतवेदो जपपरायणो जातपु
पुत्रादीनां धकूपतडागर्थिसाध्यायुषयाज्ञातया न्यदेश्चन्द्रकृत्वा नाहिताग्निज्येष्टत्वादिना

४८

प्रतिवेधानागृहस्थस्यप्रव्रज्यायामनधिकारं दर्शयति ॥ यथाह मनुः ॥ ऋणानि त्रीण्यपा
कृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः इति ॥ यदा तु ब्रह्म
चर्यात्प्रव्रजति तदा न प्रजोत्पादनादि नियमः । अकृतदारपरिग्रहस्य तत्रानधिकारा
त् ॥ रागप्रयुक्तस्य त्वाश्रमविवाहस्य ॥ नवर्गत्रयकरणविधिरेव दारानाक्षिपतीति शोक
नीयं विद्याधर्मार्जननियमवदन्यप्रयुक्तदारसंभवेत्तस्या नाक्षेपकत्वात् ॥ ननु जाय
मानो वै ब्राह्मणस्त्रिभिरृणैरृणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः
प्रजया पितृभ्य इति जातमात्रस्यैव प्रजोत्पादनादीन्यावश्यकानीति दर्शयति ॥ मेवेन
द्विजातमात्रीकृतदाराग्निपरिग्रहस्यैव ऋणादिसंबंधोऽधिक्रियते ॥ तस्मादधिकारी जायमानो
ब्राह्मणादिपदस्तादानन्तु तिष्ठेदित्यस्यार्थः ॥ अतश्चोपनीतस्य वेदाध्ययनमेवावश्य
कं कृतदारस्याग्निपरिग्रहस्य यज्ञोत्पादनमपीति निरवद्यं एवमधिकारिणं निरूप्य
तद्धर्मानाह ॥ सर्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥ एकाराम: परिव्रज्य भिक्षा

र्यग्निमात्मसमासयेत्॥ सर्वभूतेभ्यः प्रियाप्रियकारिभ्यो रिक्तहस्तो नानपुनर्दत्ता
वरणाः हिंसानुग्रहयोरनारंभ इति गौतमस्मरणात्॥ रागतो वाद्यांत करणे परतः
त्रिदंडाः प्रत्यस्तंतीति त्रिदंडीति कथ्यते त्वचश्मिश्रंजकाष्ठ्यवस्त्राद्वा दंडा वैणवा
ग्राह्याः प्राजापत्येष्ट्यनंतरं त्रीन् वैणवान् दंडान् मस्तकप्रमाणान् दक्षिणेन पा
णिना धारयेत्॥ स ऐनसोऽरंके कमंडलुमिति स्मृत्यंतरदर्शनात्॥ एकं दंडं धा
रयेत्॥ एकदंडी त्रिदंडी वेति बौधायनस्मरणात्॥ चतुर्थमाश्रमं गच्छेत् ब्रह्मविद्यापा
रायणः सर्वसंगविवर्जित इति चतुर्थं वैशाखिमतेदर्शनाच्च तथा शिखाधारणमपि वै
कल्पिकं॥ मुंडः शिखी वेति गौतमस्मरणात्॥ मुंडोऽममोऽपरिग्रह इति वसिष्ठस्मरणा
त्॥ यज्ञोपवीतधारणमपि वैकल्पिकमेव॥ सशिखान्केशान्निकृत्य विसृज्य
यज्ञोपवीतमिति काठकश्रुतिदर्शनाच्च॥ कुटुंबं पुत्रदारं च वेदांगानि तु सर्वशः
केशान्यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिरिति वाष्कलस्मरणात्॥ अथ यज्ञो

स्त

१ धीमच्छ्रुत्वेति । मत्वाहेति । अथ पदे ऽ पादतेनवेमागोपीयोगिपरिधिष्ठादर्शनात् । यथशालंकौ
थापिपरिग्राह्या । का वा पीठुङ्गास्त्रजोद्दले कमण्डलुपवित्रपादुकासन कंथामात्रिवलम्ब
रणात् । पैशाचाद्यर्थं कमण्डलुसहितं पात्रमभवेत् । एकाकी मः अतोजितान्तरेण सहायः तं
न्यासिनीभिः स्त्रीभिश्चस्त्रीणां चैकदति बौधायनेन स्त्रीणामपि प्रव्राजनस्मरणात् । तथा
वदता । एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतं । त्रयो ग्रामः समाख्यात ऊर्ध्वं तु नगरायते
राजवार्त्तादि तेषां च भिक्षावार्त्ता परस्परं । अपि पैशुन्यमात्सर्यं सन्निकर्षान्न संशयः इति
परपूर्वा प्रजातिर्यातु सपा ऽगे वर्त्तते । अतश्चाहममाभिमानेन तत्क्वतल्लौकिके कर्मणि च
यं वैदिकं चानन्त्यं काम्यात्मकं वसंत्यजेत् । तदुक्तं मनुना सुखाभ्युदयिकं चैव नैश्रेय
सिकमेव च । प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिके । इह वा काम्यं प्रवृत्तमुपदिश्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते । यथोक्तान्यपि पूर्वोक्तानि पारहाय द्विजोत्तमः आ
त्मज्ञाने शमे तस्याः त्वये दाभ्यासे च यत्नवानिति । अत्र वेदाभ्यासः प्रणवाभ्यासस्तत्र यत्न

(431)

वान्॥ भिक्षाप्रयोजनार्थं मासमासस्य त्यागे विहरेन्नतु नः सुखेन यावत्सार्थं वर्षाकाले तु न दोषः॥ ऊ
र्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थाने वासी इति प्रोक्तं स्मरणात्॥ प्रसक्तो पुनर्भोसर्वत्र तु इत्यपि
स्थातव्यं॥ नौर्भवरमेकत्र वसेदन्यत्र वर्षाकालानाद्यावग्रहे पञ्चत्वारो मासा वर्षाकाल
इति देवस्मरणात्॥ एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकं॥ वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतु
रो वसेदिति कण्वस्मरणात्॥ कथं भिक्षाकाले कार्यमित्यत आह॥ अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने
नाभिलक्षितः॥ रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः॥ अप्रमत्तो वाक्चक्षुरादिचापल
रहितो भैक्ष्यं चरेत्॥ वसिष्ठेनाप्यत्र विशेष उक्तः सप्तागारान्येकस्मिन्वानि च
रेद्भैक्ष्यमिति सायाह्ने ह्नः पञ्चमे भागे॥ तथा च मनुः॥ विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने
वृत्ते शरावसंपाते नित्यं भिक्षां यतिश्चरेत्॥ एककालं चरेद्भैक्ष्यं प्रसज्जेत न तु विस्तरे॥ भैक्ष्य
प्रसक्तो हि यतिर्विषयेष्वपि सज्जतीति॥ अनभिलक्षितः शिवः स्यात्तिर्वित्॥ ज्ञानोपदेशादिना
प्रख्यापितः॥ न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया नानुशासनवादाभ्यां भिक्षां लिप्सेत

क्षेतत्कर्हिचित्॥ इतितैत्तिरीयोक्तेश्चात्॥ यत्तु नैवपीड्यपचने॥ ब्राह्मणकुलेवायत्तत्र्यमते
तद्भुंजीत तस्यैषमातर्मोस्वयर्नोमित्ति॥ तद्यूलकोभिषयंभिक्षुकैर्भिक्षणप्रीतैः श्वाद्यादि
भिः वर्जिते ग्रामे॥ मनुना चात्रविधिप्रोक्तः॥ नतापसैर्ब्राह्मणैर्वा वयोभिरपिश्वाभिः॥ प्र
कीर्णं भिक्षुकैरन्यैरागारमुपसंव्रजेदिति॥ यावता प्राणयात्रा वर्तते तावन्मात्रं भैक्ष्यं चरेत्।
तथा च संवर्तः॥ अष्टौ भिक्षाः समादाय स मुनिः सप्त पंच वा॥ अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीया
च्च वाग्यतः इति॥ अल्पोलुपः भिक्षान्नव्यंजनादिष्वप्रसक्तः॥ भिक्षाचरणार्थं पात्राण्याह॥ य
तिपात्राणि मृद्भाण्डलाबुदारुवैणवानि च सलिलेन शुद्ध्येरन् तेषां गोवालैश्चावघर्षणं॥ मृदादि
प्रकृतिकानि यतीनां पात्राणि मनवेषु॥ तेषां सलिलेन गोवालावघर्षणं च प्रोक्षणे च शुद्धिसाध
नं॥ इयं च शुद्धिः भिक्षाचरणादिप्रयोगं गमनेनामेध्याद्युपहतेतिविषया॥ तदुपहते द्रव्य
शुद्धिः प्रकरणोक्ता द्रष्टव्याः॥ अतएव मनुना॥ अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च॥ तेषा
मद्भिः स्मृतं शौचं चमसानामिवाध्वरे इति चमसः दृष्टान्तो यादानेन सायोगिकाशुद्धिदर्शिताः

पात्रान्तराभावे भोजनमपि तत्रैव कर्तव्यं ॥ तद्भैक्षं गृहीत्वैकान्ते तेन पात्रेणान्येन वा तु भो मा
त्रया तु जीर्णतेति केवलस्य मरणान्तम् ॥ एवंभूतस्य यतेरभ्यासनोगतनियमाविशेषमाह ॥ सं
नि तु श्चेन्द्रियग्रामं रागद्वेषौ प्रहाय च ॥ भयं कृत्वा च भूतानाममृतो भवति द्विजः ॥ चक्षु
रादीन्द्रियसमूहं रूपादिविषयेभ्यः संनिरुध्य विनिवर्त्य रागद्वेषौ प्रियाप्रियविषयौ
प्रहाय त्यक्त्वा च प्राणिहिंसादीन्यपि भूतानामभयाकारकरणेनभयम कुर्वन्नमृ
श्रोता । करणैः सत्त्वहेतुसाक्षात्कारेणामृतो भवति मुक्तो भवति ॥ किंच ॥ कर्तव्याशय
शुद्धिस्तु भिक्षुकेणाविशेषतः ॥ ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च ॥ विषयाभि
लाषजानि तद्दोषकलुषितस्याशयस्यान्तःकरणस्य शुद्धिः कल्मषक्षयः प्राणायामैः
कर्तव्या ॥ तस्याः शुद्धेर्ज्ञानस्याद्वैततत्साक्षात्कारस्य पश्चानोत्पत्तिनिमित्तत्वात्तु ॥ एवं स
ति विषयाज्ञाने तत्ज्ञानि तद्दोषान्तराकः प्रतिबंधक्षये सत्यात्मध्यानधारणे योग्यतं
त्रो भवति ॥ भिक्षुकेणत्वेषा शुद्धिर्विशेषतोऽनुष्ठेया तस्य मोक्षप्रधानत्वात् ॥ मोक्षस्य

श्रुतः । करणतामेतरेणादुर्लभत्वात् । तथा स्मृतं ॥ दृश्यते ध्यायमाना नां धातूनां
द्वयथा मन्ता ॥ यथेंद्रियाणां दृश्यते दोषाः प्राणस्पर्शनिग्रहादिनि ॥ इंद्रियाणि रोधोया
मत्तयासं साम्यं चरूपनमाह ॥ प्रधोस्पाग गर्भवासाश्च कर्मजाग तयस्तथा ॥ आधयो
व्याधयः क्लेशा जनारूपा विपर्ययः ॥ भवो जातिस्र हस्त्रेषु प्रियाप्रिय विपर्ययः ॥ वैराग्य
मिथ्यार्थेम् त्रयुराबाद्दिष्टनानाविधगर्भवासा प्रवेशलक्षणाः पर्यालोचनीयाः ॥ यथा
द्वौ जननी परमावपि तथा निषिद्धा वरणादि ॥ क्लेशा जन्या महारौरवादि निरयपतनदु
पागतयः ॥ आधयो मनःपीडा आधयो ज्वरातीसारादयाः ॥ पारतः क्लेशाश्चाविद्यास्मि
तारागद्वेषाभिनिवेशाः ॥ पंचाजरावत्नीपालितरूपाण्यभिभवः ॥ रूपाविपर्ययः षंजत्वादि
नाप्राल्कनरूपस्यान्यथाभावः ॥ तथाश्चम् करत्चरोऽध्यायमनेकजातिषु भवतस्यातिः
तथा इष्टस्याप्राप्तिरनिष्टस्य प्राप्तिरित्यादि यत्तु तत् क्लेशा वगाहनेनात्यन्तं पर्या
लोच्यतत्याग्रसार्पमात्मन्तानो पापमत्तेऽद्रियजयप्रयतेत ॥ एवमवेक्षानंतरं किं ॥

435

किं कार्यमित्यत आह ॥ ध्यानयोगेन संपश्येत् सूक्ष्म आत्मात्मनि स्थितः ॥ योगशास्त्रतत्त्वज्ञ आ
त्मैकाग्रतापन्नं ॥ तस्मादेव बाह्यविषयाद्योपरमः ध्यानयोगेन निदिध्यासनापरपर्या
येन सूक्ष्मशरीरप्रारंभनाडीव्यतिरिक्तः ॥ क्षेत्रज्ञ आत्मनि ब्रह्मणि अवस्थित इति तत्त्वे
नाश्वयोऽभेदं सम्यक् प्रपश्येदपरोक्षीकुर्यात् ॥ अत एव श्रुतौ आत्मद्रष्टव्य इति साक्षा
त्कारस्य दर्शनमनुष्ठानसाधनत्वेन श्रोतव्यो मंतव्यो निदिध्यासितव्य इति ॥ सम्य
ग्मननमनिदिध्यासनानि विहितानि ॥ किंच ॥ नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः
अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत् ॥ प्राक्तनश्लोकोक्तात्मोपासनाश्रमधर्मे
नाश्रमो हेतुरित्यादि धर्मे ॥ यस्मादसौ क्रियमाणो भवेदेव नातिदुःकरः ॥ तस्मा
द्यदात्मनोऽपथ्यमुद्वेगकरं परुषभाषणादि तन्न परेषां समाचरेत् ॥ अनेन सातो
त्पत्तिहेतुत्वं तांतःकरणस्याप्यादरत्वेनोक्तं रागद्वेषप्रहाणस्य प्रधानत्वेन
सपूर्णलाभार्थमाश्रयणीतां करणं ॥ न पुनरन्यादिग्रामायनस्यापि विविदिह तत्त्वात् ॥ तदुक्तम्

५१

536

मनुना ॥ भूषितोपि चरेद्धर्मं यत्र तत्राश्रमे वसन् । समः सर्वेषु भूतेषु न लिंगं धर्मकारणं ॥
किंच ॥ सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः ॥ संयतेंद्रियता विद्या धर्मः सर्व उदाहृ-
तः ॥ सत्यं यथार्थप्रियवचनं ॥ अस्तेयं परद्रव्यानपहारः ॥ अक्रोधो ऽपकारिण्यपि क्रोध-
स्यानुत्पादनं ह्रीर्लज्जा शौचमाहारादिशुद्धिः ॥ धीर्देहादिष्वविवेकः ॥ धृतिरिष्टवियोग-
निष्टप्राप्तौ अचलितचित्तस्य यथापूर्वमवस्थानं ॥ दमो रागत्यागः ॥ संयतेंद्रियता ऽप्रतिषि-
द्धविषयेष्वनतिप्रसंगः ॥ विद्या ऽऽत्मज्ञानं ॥ एतैः सत्यादिभिरनुष्ठितैः सर्वोप-
नोऽदृष्टिनो भवति ॥ एतेन दंडकमंडल्वादिधारणाया सद्धर्मलक्षणत्वं सत्यादीनामात्म-
गुणानामंतरंगत्वं द्योतयति ॥ ननु ध्यानयोगेनात्मनमात्मनि स्थितं ॥ पश्येदित्ययुक्तं जी-
वपरमात्मनोर्भेदाभावादित्यत आह ॥ निःसरंति यथा लोहपिंडात्तप्तात्स्फुलिं-
गकाः ॥ सकाशादात्मनोस्तद्वदात्मानः प्रभवंति हि ॥ यद्यपि जीवपरमात्मनोः पारमा-
र्थिको भेदो नास्ति तथाप्यात्मनः सकाशाद्विद्योपाधितो भिन्ना यथा जीवात्मानः

प्रभवंतीति यस्मात् भुज्यत एव नो वपरस्यो मे देव्या न देव्यपदे शालनं तेनेतदेतत् ॥ अत उपपन्नमात्मा
नमनिष्पिनो रक्ष्यामीति ॥ पद्यार्थः ॥ ननु श्रुत्यादि समयेप्रलयेन लकलक्षेत्रस्थानोत्र
स्थाणुप्रलीनत्वात्कस्याप्यमात्मनोपसनाविधिरित्यत आह ॥ निसरेतीत्यादि ॥ यद्य
पि सूक्ष्मरूपेण प्रलयवेलायां प्रलीनानामात्मनः ॥ सकाशाद्वात्मनः प्रभवंति पुनः क
र्मवशात्स्थूलशरीराभिमानेनोत्पद्यंते ॥ तस्मान्नोपसनाविधिविरोधः ॥ तेजसस्य ध्य
द्भावः सामग्यान्नोहृपिंडदेहस्यातः ननु चानुपादानवस्तुभो क्षेत्रस्थानोनिः ॥ परस्परदेतपाक
र्मोचात्कथं तान्निबंधनो जरायुजोंडजस्वेदजोद्भिज्जचतुर्विधदेहपरिग्रह इत्यत आ
ह ॥ तत्रात्मा हि स्वयं किं चित्र कर्म किं वस्वभावद्य ॥ करोति किंचिदस्या साद्धर्मा धर्मो भ
यात्मिके यद्यपि तस्यामवस्थायां परिस्पंदात्मकक्रियाभावस्तथापि धर्माधर्मात्म
कमानसं कर्मसंभवत्येव ॥ तस्य विशिष्टशरीरग्रहणे हेतुत्वमस्त्येव ॥ वाचिकैः पक्षिम
तोमानसैरेंत्यजातितामिति मनुस्मरणात् ॥ एवं गृहीतवपुः स्वयमेवान्वयव्यतिरेकाभिरपेक्षः

प्रादुर्भावीयानुभवभावितभावनानुभवोद्भूतकार्यावबोधः किं चित्तस्यपानादिकं करोति त
थाचक्षुस्यैतत् ॥ अस्ति जन्मा जन्मन्यन्तो दानमध्ययनं तपः ॥ तेनैवाभ्यासयोगेन तदेवाभ्य
सते पुनरिति ॥ एवं जीविनां वैचित्र्यात् तत्कृतं जरायुजाण्डजादिवैचित्र्यं युज्यत एव ॥ न चै
वं सति ब्रह्मण एव कथंचिज्जीवव्यपदेशः स्यात् तस्य वनित्यत्वादिधर्मत्वात्कथं चित्सुखि
त्वो जात इत्यप्यनवहार इत्याशंक्याह ॥ निमित्तमजरः कर्ता बोध्यब्रह्मगुणी वशी ॥ अ
जः शरीरग्रहणं स्म जातमुक्तिः कीर्त्यते ॥ सत्यमात्मा सकलजगत्प्रपंचाविर्भावविधा
समावेशावशात्समवाय्यसमवायिनिमित्तमित्येवस्वयमेव त्रिविधमपि रूपं पुनः
कार्यकोटिविभ्रमः यस्माद्ब्रह्मरोविनश्वरः ॥ ननु सत्त्वादिगुणविकारस्य सुखदुःख
मोहात्मकस्य कार्यभूते जगत्प्रपंचे दर्शनात् ॥ तद्गुणवत्यप्रकृतेरेव जगत्सुन्नत्वोचि
ता ॥ न पुनर्निर्गुणस्य ब्रह्मणः ॥ मैवं मंस्थाः ॥ आत्मैव कर्ता यस्मादसौ जीवोपभोग्यसु
खदुःखहेतुभूतादृष्टाद्बोद्धा न पुनश्चेतनायाः ॥ प्रकृतेर्नामरूपव्याकृतविचित्रभो

439

कर्मवर्गभोगानुकूलभोग्यभोगायतनादियोग्यजगत्प्रपंचरचनाघटते तस्मादात्मैवकर्त्ता
त्वात्स एव ब्रह्मविदंद्रको विस्तारकाः न चासौ निर्गुणो यतस्तस्य त्रिगुणा शक्तिः प्रविद्या
प्रकृतिः प्रधानाद्यपरपर्यायाभिधीयते अतः स्वतो निर्गुणत्वेऽपि शक्तिमुखेन सत्त्वा
दिगुणयोगुकथ्यते न चैतावता प्रकृतिः कारणता यस्मादात्मैव वशी स्वतंत्रो न प्र
कृतिर्नाम स्वतंत्रं तत्त्वान्तरं तादृग्विधत्वे प्रमाणाभावात् न च वचनीयं शक्तिरूपा
पि सैव कर्त्रीभूतेति यतः शक्तिस्वीकारके न शक्तेस्तस्मादात्मैव जगतस्त्रिविधमपि
कारणं तथाऽप्रजकस्योत्पत्तिरहितः अनन्तत्वमप्यविनाश्यादुत्पन्नत्वेनोपपद्यते तथापि
शरीरग्रहणमात्रेण जात इत्युच्यते अवस्थान्तरयोगात् तयोस्त्येतद्गर्हाश्चो जात इति
वत्स शरीरग्रहणप्रकारमाह सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं मही सृजत्येको
त्तरगुणं तथादत्ते भवन्नपि संक्षिप्तसमये सत्परमात्मा यथाकाशादीन् शब्दैकगुणं गग
नं शब्दस्पर्शरूपं गुणं तेजः शब्दस्पर्शरूपरसवदंबुकं शब्दस्पर्शरूपरसगंधगुणा

स्त्रीपुंसयोश्च योगे विसृष्टे शुक्रशोणिते । ते च धातून् स्वकं बद्ध्वा प्राप्नुते गुणवत्प्रभुः स्वतुर्वेतावा ॥ १ ॥

जगती ॥ इत्येवमेकोत्तरगुणान्त्यागती तथात्मा जीवभावमापन्नो भवेदुत्पद्यमानो
पि शारीरारंभकत्वेनापि तानुपादत्ते तेन ज्ञातिकथं शारीरारंभकत्वे पृथिव्यादीनामित्य
त आह ॥ प्राकृत्या व्याप्यते सूर्यः सूर्याद्वृष्टिरथो बधिः ॥ तद्वन्नं रक्षद्रूपेण शुक्रत्वामु
पगच्छति ॥ जायमानैः प्रक्षिप्तया प्राकृत्या पुरोगप्राग्दिनसेनाप्याप्यते सूर्यः ॥ सूर्याच्चा
कालवशेन परिपक्वात्स्यादित्यर्द्धं वीरसाद्वृष्टिर्भवतीति तौ ॥ श्री स्यादौषधिरूपमन्नं
तदन्नं सेवितं सद्रसरक्तादिक्रमेण शुक्रशोणितः ॥ भावमापद्यते ॥ ततः किमस्यत
आह ॥ स्त्रीपुंसयोगे शुक्रं च शोणितं ते च शुक्रशोणिते तस्मिन्परस्परं संयुक्ते निसृष्टे
रात पितृश्लेष्मदुष्टसंगं स्थितप्रवेशीणमूत्रपुरीषगंधिरतान्स्पर्शजातानि निःसृत्य तरो
त्तरोत्तरहितेस्थित्वा पंच धातून् पृथिव्यादिपंचभूतानि शारीरारंभकतया स्वयं
बद्ध्वा विधानेनात्मा प्रभुः ॥ शरीरारंभककारणादृष्टकर्मयोगित्वात् समर्थो गुण
परस्पराप्ते भोग्यपत्नत्वेन स्वीकरोतीति तथा च शारीरके स्त्रीपुंसयोश्च संयोगे जानतोरस्ते

नीरजसाभिसंसृष्टंपुरुकंतजुणमेवसहभूतात्मनानुगतैश्चसत्त्वरजस्तमोभिःसहवा
युनाप्रेर्यमाणंगर्भाशयेतिष्ठतीत्यर्थः। किंच॥ इंद्रियाणिमनःप्राणस्तानमायुःसुखंध
ति धारणाप्रेरणंदुःखमिच्छाहंकारएवच। प्रयत्नःप्राकृतिर्वर्णस्वरद्वेषौभवाभवौ
तस्यैतदात्मकंसर्वमनादेरादिमिच्छतः॥ इंद्रियाणिस्तानकर्मेंद्रियाणिवक्ष्यमाणा
निमनश्चोभयसाधारणं। प्राणापानौव्यानोदानःसमानइतिपंचवृत्तिभेदाभिन्नःशा
रीरोवायुःप्राणस्तानमवगमः। आयुःकालविशेषावच्छिन्नंजीवनंसुखंनिर्वृत्तिःध
त्तिश्चितस्यस्थैर्यंधारणंप्रस्तामिधावा। प्रेरणंस्तानकर्मेंद्रियाणामधिष्ठानंदुःखं
मुद्वेगः॥ इच्छास्पृहाअहंकारोहंकृतिः। प्रयत्नःकृतिराकारः वर्णोगौरमादि स्वरःषड्जा
काकल्यादि द्वेषोवैरंभवःपुत्रपश्वादिविभवः। अभवस्तद्विपर्ययः। तस्याना
देरात्मनोनित्यस्यादिमिच्छतःशरीरंनिघक्षरीरंजिघृक्षमाणस्यसर्वमेतदिंद्रिया
दिकमात्मजानितंप्राग्भवीयकर्मबीजंजन्यमित्यर्थः। संयुक्तमुक्तश्लोकेनतस्यका

यद्रूपपरिणतौ क्रममाह ॥ प्रथमे मासि संक्लेदभूतो धातुविमूर्छितः ॥ मास्यर्बु-
दं द्वितीये तु तृतीयेंगेंद्रियैः ॥ ॰असौ चेतनः षष्ठो धातुर्धातुविमूर्छितः ॥ धातुषु पृ-
थिव्यादिषु विमूर्छितो लोलीभूतः क्षीरनीरवदेकीभूत इति यावत् ॥ प्रथमे गर्भ-
मासि संक्लेदभूतो द्रवरूपतां प्राप्त एव वर्त्तिष्ठते ॥ न काठिन्यापरिणमते ॥ द्विती-
ये तु मास्यर्बुदमीषत्कठिनं मांसपिंडरूपं भवति ॥ ॰प्रथमपि अभिप्रायः कोष्ठपव-
न जठरदहनाभ्यां प्रतिदिनमीषदीषच्छोष्यमाणे शुक्रसंचकोपादितद्रवीभावं भू-
तजातं त्रिफाद्विदिनैः काठिन्यमापद्यत इति ॥ तथा च सुश्रुतो ॥ द्वितीये शीतोष्मानिलै-
रभिपच्यमानो भूतसंघातो घनो जायत इति ॥ तृतीये तु मास्यंगेंद्रियैर्युक्तो भ-
वति ॥ किंच ॥ ॰आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकं ॥ वायोस्तु स्पर्श-
नं चेष्टां व्यूहनं रौक्ष्यमेव च ॥ पित्तात्तु दर्शनं पंक्तिमौष्ण्यं रूपं प्रकाशितां ॥ रसात्तु र-
सनं शैत्यं स्नेहं क्लेदं समार्दवं ॥ भूमेर्गंधं तथा घ्राणं गौरवं मूर्तिमेव च ॥ ॰आत्मा

५५

शोत्पजः सर्वेन्द्रीयस्पंदते ततः ॥ आत्मा गर्भज्ञानी तत्सर्वं तत्संवध्यते गगनादन्नाद्यमाने ले
पनक्रिया ॥ वव्यागि तां श्रोत्रस्पंदन्सूक्ष्मो ॥ स्थिकात्वे प्राहुः श्रवणेन्द्रियेपवले शेर्द्धं ॥ आदि
त्यहणं सुषिरत्वं विविक्षुतांवं ॥ आकाशाच्छिद्रं श्रोत्रं विविक्तं सर्वे छिद्र समूहं
श्चेत गर्भो पानिष्पर्दशी नाह ॥ पवनात्स्पर्शनेन्द्रियं चेष्टागमनागमनादिकं व्यूह
न मेगानां विविधं प्रसारणं रोक्ष्यं कर्कशत्वं च पराशा स्पर्शं चापितानेजसः दर्शो
ने चक्षुरिन्द्रियं ॥ पान्त्विप्रुक्तस्यान्नस्यान्नस्य पचनं ॥ अप्रश्यष्ट स्पर्शत्वमंगानां रूपं
स्यामस्यादि ॥ प्रकाशितां भ्राजिष्णुतां ॥ तथा संतापामर्यादिव ॥ सौर्यामर्षक्षतौक्षापण
पत्नैश्या भ्राजिष्णुता सां तापवर्नरूपे ॥ इंद्रियाणि तेजसानी ॥ निगर्भोपानिषद्दर्शना
त् ॥ एवं रसात् इदकाइत्नेन्द्रियं प्रेत्यमेगानां स्निग्धानां ॥ मृदुत्वसादि नांक्लेदमाई
ता ॥ तथा भूमेर्गंधं प्राणेन्द्रियं गरिमानं मूर्तिं च सर्वमेतत्स्परमर्थं तो जन्मरादितो प्या
त्मा तृतीये मासि गर्भज्ञानि ॥ ततश्चतुर्थे मासिस्पंदते चलति ॥ तथा च शारीरके ॥ चतु

544

र्थे मासि चलनादायामिप्रायं करोतीति किंच ॥ दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुया
त् । वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रिया ॥ गर्भस्यैकं हृदयं गर्भिण्याश्चापरमि
त्येवं द्विहृदया या स्त्री या यद्यमिलषति तत्तद्दौहृदं तस्या अप्रदानेन गर्भो विरूपतां मरण
रूपं दोषं वा प्राप्नोति ॥ तस्मान्न दोषपरिहारार्थं गर्भवृद्ध्यर्थं च गर्भिण्या स्त्रिया यदभि
यमभिलषितं तत्संपादनीयं ॥ तथा च सुश्रुतः । द्विहृदयां नारीं दौहृदिनीमाचक्षते ॥ तदभि
लाषितं दद्याद्वीर्यवन्तं चिरायुषं पुत्रं जनयति ॥ तथा व्यायामादिकमपि गर्भग्रहणप्रभृति तया
परिहरणीयं ॥ ततः प्रभृति व्यवायव्यायामातितर्पणदिवास्वप्नरात्रिजागरणशोकयान
यानारोहणवेगधारणकुक्कुटासनशोणितमोक्षणानि परिहरेदिति ॥ तत्रैवाभिधानात् । गर्भ
ग्रहणे च शुक्रशोणितयोः कलरूपत्वं धातुस्फुरणं च यो न्यायादि तत्रैवोक्तं ॥ किंच । द्वितीये मेनु पर्येन्वं
गतां पंचमहाभूतानिलोद्भवः । स एव कलस्य वर्णाय घनतेरोमक्रमंसंभवः तृतीये मासि प्रा
दुर्भूतस्याङ्गसंगस्य चतुर्थे मासि स्थैर्यं लब्धमानत्वोति ॥ चतुर्थेनोदितस्याङ्गुवक्षस्यातिः ता

प्यायते। नवर्णस्याकारस्य मोमसं च संभव। किंच। मनश्चैतन्ययुक्तो सौ नाडीस्नायुशि
रायुतो। सप्तमेवात्ययमेवैव त्वंगमांसस्मृतिमानपि। अष्टौ पूर्वो गर्भः सप्तमे मासि नसां च
तनयाद्युक्तो नाडीभिर्नाडिनोभिः स्नायुभिरस्थिवं धनैः शिरानिर्वा तथापि तल्लोमाभिस्थसंयु
क्तस्त्वष्टमे मासि त्वचा मांसेन नखरस्याच युक्तो भवति। किंच। पुनर्धात्री पुनर्गर्भमो
जस्तस्य प्रधावति। अष्टमे मास्यतो गर्भो जातैः प्राणैर्वियुज्यते। तस्माष्टमे मासि कस्य
गर्भस्यौजः कस्य न गुणा विशेषो धात्रीगर्भे च पुनः पतति चंचलत्वपाशीघ्रं गच्छति। ततोऽ
ष्टमे मासि जातो गर्भः प्राणैर्वियुज्यते। अन्ये तु ओजः स्थितिरेव जीवनहेतुरस्ति दर्शयति। ओ
जः स्वरूपे सम्यक् तत्र दर्शितं। हृदि तिष्ठति यच्छुद्धमीषद् रक्तसपीतकं। ओजः शरीरसं
ख्यातं तन्नाशान्नाशमृच्छतीति। किंच। नवमे दशमे मासि प्रवृत्तैः सूतिमारुतैः नि
सार्यते बाण इव यंत्रच्छिद्रेण सज्वरः। सर्वं करचरणवक्षःपादिपार्श्वलिंगेंद्रियो नवमे दशमे
वापि मासे। अपि शब्दात् प्रागपि सप्तमे अष्टमे वा। अन्याभ्यां मासादिभ्यो वर प्राप्तः प्रवृत्तसूतिहेतु

प्रभंजनप्रेरितैः तस्मात्स्वेच्छ चर्मादिनिर्मितबुद्बुदं पत्रच्छिद्रेण सूक्ष्मसुषिरेणास्यो
दुःसहदुःखामित्युपमा नीतिः सामार्थते ॥ धनुर्यंत्रेण बुधन्वप्रेरितया बाणेरवारिति ॥ वे
गेन निर्गमनमनेन तरं च वायुपवनस्य शोनस्य प्राचीनस्येति मेवाति ॥ जातः सबाधुनास्य
श्रेयो नस्मरति पूर्वजन्ममरणं कर्म चाशुभाशुभं मिलितनिद्रा कस्मादपि प्रोमिधानात् ॥ काय
स्वरूपं विवृण्वन्नाह ॥ तस्य षोडशशरीराणि षट्त्वचो धारयंतीत्यर्थः ॥ षडंगानि तथास्थां च सह
षष्ट्या शतत्रयं ॥ तस्यात्मनो नानि नरा सृजोऽन्न शरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादि
षड्धातुपरिपाकहेतुभूतषडग्निस्थानपोनिगत्वे नतथाहि अन्नरसो जाठरेणाग्निना पच्यमानो
रक्तीभवति ॥ स रक्तं च त्वक्कोशस्थाग्निना पच्यमानो मांसत्वं मांसं च त्वक्कोशानलप
रिपक्कं मेदस्त्वं ॥ मेदोऽपि त्वक्कोशवह्निना पक्कं मेदस्त्वं मेदोऽपि त्वक्कोशवह्निना पक्कमस्थितां
अस्थ्यपि त्वक्कोशाणि विपरिपक्कं मज्जात्वं मज्जापि त्वक्कोशपावकपरिपच्यमानः शुक्रमेधातु
तया परिणमते ॥ चरमत्वाच्छुक्रपरिणतिर्नास्तीति सख्यानतः प्रथमकोशस्त्वेवं षट्को

557

धानि योगित्वात् । षड्कात्वंशरीराणां प्रतरमहत्त्वस्य लुप्तप्रथमाधातोरसि यतत्वात्
तेन प्रकारान्पत्वे । नाति च शधितात्तिष इत्यवोधारयेति । स्तम्भौ समेदोस्थिमज्जास्त्रकाल्मोः
षडानवे भानंतं मत्वामि ववासामान्यतरह्यपेतास्थितात्वागव प्राछारिक त्वात् । स्वयं
स्नावङ्द्गत्ववोधारयेति । तद्दिरमायुर्वेदि प्रसिद्धं । तत्रांगानि च षडेव करयुग्मं चरणयुग
लमुत्तमांगं गात्रमिति । अस्थ्नां तु षष्ट्यधिकं शतत्रयमुपरितनषष्ठो क्त्या वक्ष्यमाणमवगंत
व्यं । किं च । स्थालैः सह चतुःषष्टिर्दंतावींविंशतिनखाः पाणिपादः शलाकास्तासां स्था
नं चतुष्टयं । स्थलानि द्वे तन्मूलप्रदेशास्थान्यस्थीनि द्वात्रिंशत् । तैः सह द्वात्रिंशदंतास्रतुः
षष्टिर्भवंति । नखाः करचरणविंशतिदन्तपादस्थानि शलाकाकारणस्थीनि माणिबंध
स्योपरि वर्तान्यंगुलिमूलस्थानि विंशतिरेव । तेषां तिषां नखवानां शलाकास्थावलान च चतु
ष्टयं । द्वौ च प्रत्येक करे चेत्यष्टानां चतुरस्त्रं स्थानं । किं च । पश्चांगुलानां द्वे पार्श्वे गुल्फेषु च
चतुष्टयं । चत्वार्यरत्निकास्थीनि जंघयोस्तावदेवतु । विंशतिरंगुलजन्नासामेकैक

558

स्था स्त्रीणि त्रीणि इत्येवमंगुलिसंबद्धान्यस्थीनि षष्टिर्भवंति । पादद्वयोः पश्चिमो भागो पा
र्ष्णी तयो रस्थीनि द्वि एकैकस्मिन् स्याद्द्वावित्येवं चतुर्षु गुल्फेषु चत्वार्यस्थीनि वा द्वे द्वे रत्नि
प्रमाणानि चत्वार्यस्थीनि जंघयोस्तावद्द्वे च चत्वार्येवेत्येवं चतुः सप्तति । किंच द्वे द्वे जानु
कपालौ नूफलकं सलसमुद्भवे । अष्ठनालूपके श्रोणीफलके चाविनिर्दिष्टे तथा । जंघाद्भवसं
धि जानुकपोलौ गतः । ऊरुः प्रोक्तस्तत्फलकं । अंसौ भुजशिरः । अक्षः कर्णनेत्रयोर्मध्ये
प्रावेदधोभागस्तालुमूलकं काकुदं । श्रोणी कुकुन्दरौ तत्फलकं तेषामेकैकस्यास्थि
नी द्वे द्वे विनिर्दिष्टे इत्येवं चतुर्दशास्थीनि भवंति । भगास्थ्येकं तथा पृष्ठे चत्वारिंशास्थि
पंचक्र ग्रीवायां चदशास्थिस्यात् जत्रुके च तथा हनुः गुह्यास्थ्येकं पृष्ठस्य पश्चिमभागे च पं
च चत्वारिंशास्थीनि ग्रीवा कंधरा सायं च दशास्थिर्भवेत् । वक्षोभ्यां संधिर्जत्रु मातेज
त्येकैकं हनुस्थिबुकं । तत्राप्येकमस्थ्या तेवं चतुःषष्टि । किंच तन्मूलद्वेन्न तालुयान्ति
गंडे नासाघ्रनासिका । गण्डकालेकैः सार्धमबुद्दैप्र माद्विसप्तति । तस्मादनोर्मूलेऽप्र

स्था

स्थिनी द्वे ललाटे भाले ॥ अक्षिवंक्षणगंडकपोलनासयोर्मध्यप्रदेशः ॥ तेषां समाहारे ललाटा
क्षिगंडं तत्र प्रत्येकं अस्थियुगलं ॥ नासाधनसंतनकाः रध्यिमती पार्श्विका कक्षाधःप्रदेशस्तदवे
धान्यस्थीनि तदाधारभूतानि स्थालकानि तैः स्थालकैरर्बुदैश्चास्थिविशेषैः सह पार्श्व
कादि सप्ततिः पूर्वोक्तैश्च नवतिभिः सार्धमेकाशीतिर्भवति ॥ किंच ॥ द्वौ शंखकौ कपालानि
चत्वारि शिरसि विदलरूपाणि ॥ ततः सप्तदशास्थीनि पुरुषस्यास्थिसंग्रहः ॥ भ्रूकर्णयोर्मध्यप्रदेशा
र[illegible] स्थिविशेषौ शंखकौ शिरः संबंधीनि सहस्रचत्वारि कपालानि एवं वक्षस्तत्सप्तद
शास्थिकानि सर्वं त्रयोविंशतिः पूर्वोक्तैश्च पञ्चाधिकं शतत्रयं इत्येवं पुरुषस्यास्थिसंग्रहः ॥ क
थितः ॥ सविषयानि सांतेंद्रियाण्याह ॥ गंधरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः ॥ नासिकालोचने
जिह्वा त्वक् श्रोत्रं चेंद्रियाणि तु ॥ एते गंधादयोर्थविषया पुरुषस्य बंधनहेतवो विषयग्राहकस्ये
षित्रं बंधनरूपस्याधातो व्युत्पन्नत्वात् ॥ एतैश्चागंधादिभिर्योगपत्त्वेन व्यवस्थितैः स्वस्वगो
चरसन्निसाधनतयानुमेयानि घ्राणादीनि पंचेंद्रियाणि भवंति ॥ कर्मेंद्रियाण्यर्थादिसार

हस्तौ पायूपस्थं जिह्वा पादौ च पंचमौ ॥ कर्मेंद्रियाणि जानीयात् । मनश्चोभयात्मकं ह
स्तौ प्रसिद्धौ पायुर्गुदं उपस्थः स्मरनिलयापरपर्यायं तु वेसाधनं जिह्वा प्रसिद्धा पादौ च । एतानि हस्तादीनि
पंच कर्मेंद्रियाणि दानहरणानंदव्याहारविहारादिकर्मसाधनानि जानीयात् ॥ मनोंतः
करणं युगपज्ज्ञानानुत्पत्तिगम्यं ॥ तच्च बुद्धिकर्मेंद्रियसहकारित्वादुभयात्मकं ॥ प्राणपंचना
निर्दिदिक्षुमाह ॥ ~~[illegible]~~ ॥ नासिकाग्रे गुदे [illegible]
तथा ॥ [illegible] कंठहृदये प्राणस्यायतनानि तु ॥ नाभिप्रभृतीति हृदयपर्यंतं प्राणस्यायतनानीति समान
नाम्नः पवनस्य सकलांगसंचारित्वेऽपि नाभ्यादिस्थानविशेषैः ॥ बाह्योपाधिः प्राचुर्याभिप्रा
येण ॥ प्राणस्य नासिकाग्रं चापि तु मातापितृदेहजं स्थूलं तत्र गुदमेव च ॥ इसे चतुर्दश कोशा
विस्तारो यमुद्दारकत्तः ॥ वपाप्रसिद्धा वेश्मानी समस्तस्नेहः ॥ प्रवहननेपुंसः ॥ स्नायुः स्नाश्रायुर्वेदप्र
सिद्धा तौ च मांसपिंडकारौ सव्यकुक्षिस्थितौ यकृत्क्लोमकाविकालीममांसपिंडः ॥ तौ च दक्षिणकु
क्षिगतौ क्लोम [illegible] हृत्स्थात्रे वृक्कौ हृदयसमीपस्थौ मांसपिंडौ वस्तिर्मूत्राशयः पुरीषाधाने

(451)

पुरीषाशयः ॥ प्राणांसपोषकानां स्थानं हृदयं हृत्पुंडरीकं स्थूलो त्रयोदशसारिणि प्रसिद्ध
निवाद्याकुंदद्वलयादेद्द ॥ गुदद्वलयो द्वौ तौ त्रयोदशौ कोष्ठ्यौ कोष्ठ्यनामेरधः प्रदेशो भवौ प्रपं
च प्राणायतनस्य विस्तारस्तत्कृतः ॥ पूर्वश्लोके तु संक्षेपः प्रतन्यत्र पूर्वश्लोकोक्तानां केषांचि
दिहपाठपुनः प्राणायतनप्रपंचमाह ॥ कर्मनिर्के वाल्किनृते शष्कुली कर्णपत्रकौ ॥ वर्णौ
ष्ठौ प्लीम्नोर्देनौ वेष्टा कुकुंदरः ॥ वक्षणौ वृषणौ मुष्कौ श्लेष्मसंघाति कौस्तनौ ॥ उपजिह्वा स्फि
जौ बाहू जंघोरु पृष्ठपिंडिका ॥ तालूदरं बस्तिशीर्षं चिबुकं गलशुंडिके ॥ प्रवदश्चैव नमेना
निस्थानान्य शरीरके प्रक्षिप्तवर्णचतुष्कानि पद्मस्तहृदयानि च ॥ नवछिद्राणि तान्येव प्राणा
स्यायतनानि तु ॥ कनीनिके अक्षिप्रक्षितारे प्रक्षिकूटे प्रक्षिना शयोः संधि ॥ शष्कुली कर्णश
ष्कुली ॥ कर्णपत्रकौ कर्णपाल्यौ ॥ देताविष्टादंतपाल्यौ ॥ कुकुंदरे जघनकूपौ ॥ वक्षणौ वृ
षणोरुसंधी ॥ पक्षौ पूर्वोक्तौ ॥ स्तनौ च श्लेष्मसंघातौ तौ उपजिह्वा घटिका ॥ स्फिजौ कटिप्रोथौ
जंघोरु [illegible] पिंडिका ॥ जंघयोरूर्ध्वपिंडिका मांसलप्रदेशः ॥ गलशुंडिके हनुमूलग

४५२

त्नयोः संधी शीर्षशिरः ॥ अवटः शरीरस्यः कथ्यनानि न्तो देशः कंठमूलनकलादिः ॥ अवटुर्घाटि
पाठेककाटिका ॥ तथा अपांगेः कनीनिकयोः प्रत्येकं श्रोतं पार्श्वद्वयमिव चक्षुष्यने घना ॥ प्र
त्ति पुट चक्षुश्छदं श्रोत्रं प्रसिद्धं ॥ एवमेतानि कुत्सितं शरीरस्यानानि तथा ॥ प्रालिपुगालं कर्णपुगा
लं नासाविवरद्वयमास्यं पायुरूपस्थमिति नव तानि स्त्रोतांसि नव छिद्राणि च प्राणस्याय
तनानि एव ॥ किंच ॥ शिराः शतानि सप्त नव स्नायुशतानि च धमनीनां शते द्वे तु पेशी
शतानि तु ॥ शिरा नाभिसंबद्धाश्चत्वारिंशत् संख्या वातपित्तश्लेष्मवाहिन्यः सकलकलेव
रव्यापिन्यो नानाम ॥ नाभेस्तु द्वादशाश्चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः शाखोपशाखाः
सप्तशतसंख्याः भवंति तथांगप्रत्यंगसंधिबंधानालोपयोनवसतानि ॥ धमन्यो नाभ्यना
मेरुद्धताश्चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः शाखो भेदेन द्विशतं भवंति ॥ पेशयः तु
नर्मांसकाष्ठकल्पिपिंडिका अंगप्रत्यंगसंबंधिन्यः पंचशतानि भवंति ॥ पुनश्चामेवशिरा
ही नो शाखो शाचुर्येण संबो तमारु ॥ एकोनत्रिंशदन्त्रलक्षाणि तथा नवशतानि च षट्पं

याशाश्च सानी तन्त्रि राध मनि संस्थिताः ॥ शिराधमन्यो मिलिता शाखोपशाखाभेदेन विंशा
तिलक्षाणि तथा नवशतानि षट्पंचाशत् भवन्ति इत्येवं देहे सा मध्यमः प्रमत्त यो मुनयो जानी
त ॥ किंच ॥ त्रयो लक्षास्तु विज्ञेयाः श्मश्रुकेशाः शारीरकाः सप्तोत्तरं कर्मशाते द्वे संधिशते
तथा ॥ शारीरकाः श्मश्रुकेशास्त्रिमिलिता संतत्त्रयो लक्षा विज्ञेयाः मर्माणि मरणकराणि
लोकशकराणि च स्थानानि तेषां सप्तोत्तरशतं विज्ञेयं प्रस्थांतु देहे संधिशतेन्नाव त्रिशादि संधयः
प्रवर्तते ताः सकलशरीरमाविष्टिते सो माह ॥ रोमकूपं [illegible] पंचाशत्तस्तः कोटयः एव
च ॥ सप्तषष्टि तथा लक्षा सार्धाः ॥ चिरायते सदा वायवी सहिता [illegible] विवि
गणे विभक्ताः ॥ परमाणवः पश्च को केनु वर्त्येषां भावानां चैव संस्थितिः ॥ पूर्वोदित शि
रादि केशादि सहितानां रोमांग परमाणवः ॥ सूक्ष्मसूक्ष्मतररूपा भागाः स्वेदस्रवणसु
षिरैः सह चतुःपंचाशत्कोटयस्तथा तो त्वरं षष्टिलक्षाः सार्धा पंचाशत्सहस्रसहिताः वायवीये
विभक्ता पवनपरमाणामिथः पृक्ता विगण्यन्ते एतच्च शास्त्रदृष्ट्याभिहितं ॥ चक्षुरादिकरणं पथगोचरत्वाभावा

455

दस्यार्थस्यदुर्गमत्वात्तिगहनाद्यग्रिद्यादिभावसंस्थानरूपं देहमनयोः सवतोमध्येयदिकश्चिद
नुवेत्ति ॥ सोपिमहानृष्याबुद्धिमतां ॥ अतोयत्नतोबोद्धव्याःभावसंस्थितिः ॥ शरीररसादि
परसानमाह ॥ रसस्यनवाविज्ञेयाजलस्यांजलयोदश ॥ सदैवतुपुरीषस्यरक्तस्याष्टौ
प्रकीर्तिताः ॥ षट्श्लेष्मायचपित्तंतुचत्वारोमूत्रमेवच वसात्रयोद्वौतुमेदोमज्जैकोर्द्ध
तुमस्तके ॥ श्लेष्मौजसस्तावदेवरेतसस्तावदेवतु ॥ इत्येतदस्थिरंवर्ष्मयस्मान्मोक्षायकल्प
त्यसौ ॥ सम्यक्परिणताहारसारोरसस्तस्यपरिमाणंनवांजलयः ॥ पार्थिवपरमाणुरूण
संश्लेषनिमित्तस्यजलस्यांजलयोदशविज्ञेयाः ॥ पुरीषस्यावर्चस्कस्यसदैवरक्तस्यजी
वसानलयाराख्याकायादितलौदिस्त्यौलासस्याष्टावंजलयःप्रकीर्तिताः ॥ श्लेष्मणःक
फस्यषडंजलयः ॥ पित्तस्यतेजसःपंचमूत्रस्योच्चारस्यचत्वारः ॥ वसायामांसस्नेहस्य
मे त्रयोदेहसौमांसरसस्य द्वावंजलीमज्जात्वस्थिसुषिरगतस्यैकोंजलिः ॥ मस्तके
पुनरर्द्धांजलिमज्जाश्लेष्मौजसः श्लेष्मसारस्यतथारेतसश्चरमधातोस्तावदेवार्द्धांज

लिरेव एतत् । अवमधात्तुपुरुषाभिप्रायेनोक्तं रहस्यं । विषमधात्तोस्तु न नियमः वैलक्ष
ण्याच्छरीरारम्भकस्यापि त्वात्तेष्वेव बाधोषधान्तु मलानां च परिमाणं न विद्यत इत्याशु
वेदरहस्यम् । इतीदृशमस्थिरमाञ्चाधरमेतदशुचिनिधानं च र्बा स्थिरमिति यस्य बु
द्धिरसौ कृतीपण्डितो मोक्षाय समर्थो भवति वैराग्यानित्यानित्यविवेकयोर्मोक्षोपायत्वात्
अस्थिमूत्रपुरीषादिप्राचुर्यस्यानस्य वैराग्यहेतुत्वात् अतस्तद्व्यासः सर्वाशुचिनिधा
नस्य कृतघ्नस्य विनाशिनः प्राकृतकस्यापि कृते मूढाः पापानि कुर्वते यादृनामास्य
कायस्य यदंतस्तद्यदि भवेत् दंडमादाय लोकोऽयं शुनः काकांश्च वारयेदिति तस्मादी
दृशात्कुत्सितशरीरस्यात्यंतिकविनिवृत्त्यर्थमात्मोपासने प्रयतितव्यं उपासनीयात्म
स्वरूपमाह । द्वादशसप्ततिसहस्राणि हृदयादभिनिःसृताः । हिता नाम हिताना
मत्यासां मध्ये शशिप्रभं । मंडलं तस्य मध्यस्थ आत्मा दीप इवाचलः । स ज्ञेयस्तं विदित्वे
ह पुनरजायते ननु । हृदयप्रदेशादभिनिःसृताः कदंबकुसुमकेसरवत्सर्वतो निर्ग

456

ताडितकरत्वेनहिताहितसंज्ञा द्वासप्ततिसहस्राणि नाड्यो भवंति ॥ अथ यासु तिस्रो नाड्यस्ता
सामिडापिंगलाख्ये द्वे नाड्यौ सव्यदक्षिणपार्श्वगते इडादिविपर्यस्ते नासे वंधरसंवद्धे प्राणापा
णावर्तने सुषुम्नाख्या पुनस्तृतीया कंदमध्ये ब्रह्मरंध्रं विनिर्गता तासां नाडीनां मध्ये मंडलं चं
द्रप्रभं तस्मिन्नात्मानिवातास्थदीप इवाचलः प्रकाशमान एवास्ते स एवं भूतो ज्ञातव्यो यत्तस्य
साक्षात्कारेण देहसंयोगेन पुनः संसारेन पुनः संसरत्यमृतत्वं च प्राप्नोति ॥ किंच ज्ञेयं
चारण्यकमहं यदादित्याद्वाप्तवान् ॥ योगशास्त्रं च मत्तो लब्धं ज्ञेयं योगमभीप्सता ॥ चित्तवृ
त्तौ विषयांतररहितिरस्कारेण तन्निस्थैर्यं योगस्तस्य प्रसिद्धं मया यदुक्तं द्वारण्यकाख्यमादित्या
त्प्राप्तं तद्वज्ञातव्यं तथा यन्मया तं योगशास्त्रं तदपि ज्ञातव्यं ॥ कथं पुनस्तावात्मध्यातव्यस्तत्रा
ह ॥ अनन्यविषयं कृत्वा मनो बुद्धिस्मृतींद्रियं ॥ ध्येय आत्मा स्थितो यो सौ हृदये दीपवत्प्रभुः
आत्मव्यतिरिक्तविषयेभ्यो मनो बुद्धिस्मृतीन्द्रियाणि प्रत्याहृत्यात्यैकविषयाणि कृत्वा मा
ध्येयः यो सौ प्रभुर्निर्वातस्थदीप इव दीप्यमानो निःसंकंपो हृदि तिष्ठति यत्तद्वस्यध्ये

यत्त्वं यश्चित्तवृत्तेर्विषयावभासतिरस्कारेण त्वमप्रवणता नामघ्राणवसंपुटनिरुद्धप्रभाप्र
तानप्रसरस्येव प्रदीपैकनिष्ठत्वं । यस्य पुनश्चित्तवृत्तिर्निरालंबनतया समाधौ ना
भिरमते । तेन शाब्दब्रह्मोपासनं कार्यमित्याह । यथाविधानेन पठन् सामगणयमविच्युतं
सावधानस्तथाभ्यासात्परब्रह्माधिगच्छति । स्वाध्यायाधिगतमार्गो वसितिक्रमेण सामगा
यंगानां तान्योगानात्मकत्वेपि गायत्रिति विशेषणं अगीतमंत्रव्युदासार्थं । अविच्युतम
स्खलितं सावधानः । सामान्यनुस्यूतोत्स्यैकाग्रचित्तवृत्तिः पठंस्तदभ्यासवशात्तत्रानि
ष्णातः शाब्दाकारसूत्र्योपासनेन परं ब्रह्माधिगच्छति । तदुक्तं शब्दब्रह्मणि निष्णातः परंब्र
ह्माधिगच्छति । यस्य पुनर्वैदिक्यां गीतौ चित्तं नाभिरमते तेन लौकिकगीतानुस्यूतान्योपा
सनं कार्यमित्याह । अपरान्तकमुल्लोप्यं मद्रकं प्रकरीं तथा । औवेणकं सरोविंदुमुत्तरं गीतका
नि च । ऋग्गाथापाणिका दक्षविहितब्रह्मगीतिका गेयमेतत्तदभ्यासकारणान्मोक्षसंज्ञि
तं । अपरान्तकोल्लोप्यमद्रकप्रकार्यौवेणकानि सरोविन्दुकमुत्तरं चोत्तरमित्येतानि प्रक

रणाख्यानि सप्तगीतकानि चण्डाह्वमादि नवर्द्धमान कान्यमहागीतकानि गृह्यन्ते । सा
गाथाख्यास्वं तस्मो गीतकारस्येतदपपंते । कादि गीतजातमध्यानोपितात्सभावे मोक्षसा
धनत्वंन्मोहसंज्ञितं मंतव्यं । तदभ्यासस्यैकाग्रपापादनद्वारेण स्मैकतापस्तिकारणत्वे
न । किंच । वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासे
न मोक्षमार्गं नियच्छति । भरतादिमुनिप्रतिपादितवीणावादनतत्त्ववेदी । श्रुतय इति
स्वरांतद्वाविंशतिविधाः सप्तस्वरेषु । तथाहि षड्जमध्यमपंचमाः प्रत्येकं चतुश्श्रुतयः
ऋषभधैवतौ प्रत्येकं त्रिश्रुती गांधारनिषादौ प्रत्येकं द्विश्रुतीइति । जातयस्तु षड्जर्
षभगांधारमध्यमपंचमनिषादधैवताः सारश्रुताः । एकस्माज्जातयस्त्वेकादशैस्येव
मष्टादशविधाः तासु विशारदः प्रवीणः । तालज्ञ इति गीतपरिमाणं कथ्यते । तत्त्वरूपज्ञ
श्च ब्रह्मोपासनया तालादिभंगमार्गेर्वर्तते यस्स्मैकाग्रतापाः सुकरत्वादप्रयासेनैव
मुक्तिमार्गं नियच्छति प्राप्नोति । चित्तविक्षेपाद्यो तदावद्ध तस्य गीतज्ञस्य फलोत्तरमाह

गीतत्वेयदियोगेननाप्नोतिपरमंपदं तदस्यानुचरोभूत्वासंहरतेनैवमोदते । गीतत्त्वोयदिकथंचियो
गेनपरमंपदंनप्राप्नोतितदारुद्रस्यसचिवोभूत्वातेनैवसहमोदतेक्रीडतेति । पूर्वोक्तमुपसं
हरति । अनादिरात्माकथितस्तस्यादिस्तुशरीरकं । आत्मनश्चजगत्सर्वंजगतश्चात्म
संभवः प्रागुक्तवीत्याश्चनादिरात्मस्तेत्रसः ॥ तस्यशरीरस्यहरणमित्येवादिउद्भवः कथि
तः । अजः शरीरग्रहणादित्यत्रपरमात्मनः सकाशात्स्थित्यादिसकलोद्भवमोद्भवस्त्व
उद्भूतास्तपश्चित्यादिभूतसंघाताजीवानात्मस्थूलशरीरत्तयासंभवश्चकथितास्तर्गादौ
समयप्राकाशामित्यादिना । एतदेवपक्षसमूर्ध्वकं विवृणोति । कथमेतर्हिब्रूमः सदे
वासदेवासुरमानवं । जगदुद्भूतमात्मानकथंतस्मिन्नवदस्थनः पदेतत्सकलंसुरा
सुरादिमानुषादिसदितंजगदात्मनः सकाशात्तत्कथंब्रूतदन्तेआत्मायत्तस्मिन्ज
गतिकथंतिष्ठत्सदरीरत्वादिशरीरभागपवतोत्पेतस्मिन्नथेतिब्रूमः । अतोमे
हापदन्त्यर्थमस्माकंचित्तरशोवदस्व । एवंमुनिभिःपृष्टः प्रत्युत्तरमाह । मोदजा

क्र६०

लमयास्येदपुरुषो दृश्यते हि यः । सहस्रकरपन्नेत्रः सूर्यवर्चासिहस्रकः । सर्वात्मा
चैव यस्तस्य विश्वरूपः प्रजापतिः । विराजः सोऽत्र सेण यस्तत्त्वमुपागच्छति इह जगति
यदिदं स्थूलकलेवराद्यवनामात्माभिमानरूपं मोहजालं तत्तदपास्यन्नच्छति रिक्ते
यः पुरुषोऽनेककरचरणलोचनः सूर्यवर्चा । अनंतरश्मिसहस्रकः । चक्षुषा दृश्य
ते । एतच्च तत्त्वज्ञो चरमात्मा धारजसो यो ध्यते । तस्य साक्षात्कारादिसंबंधाभावात्
स एव च सर्वात्मा यस्तः प्रजापतिश्च यः जो सो विश्वरूपः सर्वात्मकः । वैश्वरूप्यमेव क
थमिति चेत् । यस्मा दसौ विराजः पुरोडाशाद्यत्तद्रूपेण यस्तत्त्वमुपगच्छति । यस्मा
च्च वक्ष्यादि द्वारेण प्रजास्त्रष्टिरित्येव वैश्वरूप्यं । एतदेव प्रपंचयति योऽयं देवता
त्पादसंभूतो सत्त्व[illegible]त्तमः । देवान्संतर्प्य सरसो यजमानेफलेन च । मं यो ऽन्यथाऽथ
नासौ मं नीयते तस्मिन्नमि स्ततः । स्वरूपश्च । सामविहितं सौरं धामोपनीयो ऽस्य मंड
लादसौ सूर्यः स्वजन्यम तमुत्तमं । यजन्मसर्वभूतानामस्थानानशानात्मना तस्मादे

न्तपुनर्यज्ञः पुनरन्नं पुनः क्रतुः ॥ एवमेतदनाद्यन्तं चक्रं ॥ इत्यस्यायमर्थः पुराकाशादेर्देवतोपासनया
ग्नाह्नयोरसौ प्रवृष्टः सूर्यमात्मानं परिणम्य पंचतरमुत्तमः सकलजगज्जन्मबीजतया प्रकृष्टतमः
संभृतः स देवान् संप्रदानकारकभूतान् सम्यक् प्रीणयित्वा यजमानं चाभिलषितेन फ
लेन योग्यपवनप्रेर्यमाणश्चन्द्रमंडलं प्रतिनीयते ततः शशिमंडलाद्रश्मिभिर्भूमंडले सै
षात्रौषधीविधानतयात्मभेदाभिधानोद्गम्यतः सामवयं प्रत्युपनीयते । ततः स्वमंडलीदसौ
सूर्यमरुत्तरसैर्वृष्टिरत्युत्तमं ॥ यत्सकलभूतानामशमानप्रानात्मनां चराचराणां जनन
निमित्तं तत्सृजतीति तस्माद्वृष्टिसंपादितौषधिमयाप्रजोत्पत्तिहेतोरन्नात्पुनर्यज्ञोयस्मा
पूर्वाभिहितभेगयाः पुनरन्नमन्नाद्धि पुनः क्रतुरित्येवमेतदखिलं संसारचक्रं प्रवाहरूपे
णोत्पत्तिविनाशाविरहितसम्परिवर्त्ततइत्येनेन क्रमेणात्मनः सकाशादखिलजगदुत्प
त्तिस्तत्र चात्मनः स्वकर्मानुरूपविग्रहपरिग्रहः ननुपद्यात्मनः संसरणमनाद्यन्तं तर्ह्यनि
र्मुक्तिप्रसंग इत्यत आह ॥ अनादिरात्मा संभूतिर्विद्यते नोभयात्मनः समवायी तुपुरु

स

462

बोमोहेच्छाद्वेषकर्मजः। यद्यप्यात्मनोनादित्वात्संभूतिर्नविद्यतेऽतएवात्मनः शरीरव्यापि
नत्वाद्यापिपुरुषोशरीरेणसमवायीभवतिभोगायतनेसुखदुःखात्मकंभोगजातमु
पभुंक्तइत्येवंसृतेनसंबंधेनसंबंधीभवत्येव। सचसमवायोमोहेच्छाद्वेषजनितकर्मनि
मित्तोनतुनिसर्गजातः। तस्यकार्यत्वेनविनाशोपपत्तेर्नानिमुक्तिः। आत्मनोजगज्जन्मेत्यु
क्तंतत्प्रपंचयितुमाह। सहस्रात्मामयायोऽसावादिदेवउदाहृतः। मुखबाहूरुपज्जास्युः तत्
स्यवर्णायथाक्रमं। पृथिवीपादतस्तस्यशिरसोद्यौरजायत। प्राणान्प्राणादिशःश्रो
त्रात्स्पर्शाद्वायुर्मुखाच्छिखी। मनसश्चंद्रमाजातश्चक्षुषश्चदिवाकरः। जघनादंतरिक्षं
चजगच्चसचराचरंयोसौसकलजीवात्मकतयाप्रपंचात्मकतयाचसहस्रात्माबहुरूपस्त
यथाक्रममग्रजन्मादयश्चत्वारोवर्णास्तथातस्यपादाद्भूमिः मस्तकात्सुरसप्राणाच्चप्राणाःक
र्णात्ककुभःस्पर्शात्पवनोवदनाद्हुतवहोमनसःशशांकोनेत्राद्भानुजघनाद्गगनेजगमाजंग

मात्मकं जगच्च ॥ अत्र चोदयंति ॥ यद्येवं स कथं ब्रह्मन्यायमोनिषु जायते ॥ ईश्वरः स कथं
भावैरनिष्टैः संप्रयुज्यते हे वत्स नन्वयोगीश्वरा द्वयात्मैव नीवादिभावं भजते ॥ तर्हि कथमसौ
पापयोनिषु म्लेच्छत्वादिषु जायते ॥ अथ मोहरागद्वेषादिदोषदुष्टत्वात् जन्मैर्युज्यते ॥ स्वना
यस्मादसार्वेश्वरः स्वतंत्रः कथमनिष्टैर्मोहरागादिभावैः संयुज्यते ॥ किंच करणेनाचितस्या
पि पूर्वस्थानं कथं च न वेत्ति सर्वगतो कस्मात् सर्वज्ञोपि न वेदनां ॥ तथैदमध्यत्र रूपणं मनप्रभ
तिस्थानो यायैः सहितस्यापि तस्यात्मनः पूर्वस्थाने जन्मांतरानुभूतविषये कस्मात्तोस्य द्योत्त
तथा सर्वप्राणिगतो वेदनां सुखादिरूपां स्वयं सर्वज्ञोपि सर्वदेहगतोपि कस्मान्न वेत्ति ॥ त
स्मादात्मैवेश्वरो जीवादिभावं भजन्नस्पृष्टः ॥ तत्र पूर्वचोद्यस्योत्तरमाह ॥ अंत्यपाक्षिस्था
वरत्वं मनोवाक्कायकर्मजैः ॥ दोषैः प्रयाति जीवो भवं भवं योनिशतेषु च ॥ यद्यपीश्वरः स्वरूपेण
सत्यज्ञानानंदलक्षणं तथापि अविद्यासमावेशवशान्मोहरागादिहीनयोनितामापद्यते ॥ अं
तावंडजोद्भवः पाक्षिणः काकादयः स्थावरा वृक्षादयः ॥ तेषां भावो त्वपाक्षिस्थावरत्वं तां य

याक्रमेण मनोवाक्कायास्य कर्मदोषैर्जन्मसहस्रेषु जीवः प्राप्नोति॥ किंच॥ अनेनाश्व
यथाभावाः शरीरेषु शरीरिणां रूपाण्यपि तथैव देहसर्वयोनिषु देहिनां॥ शरीरिणां जीवानां शरी
रेषु भावाः अभिप्रायविशेषाः सत्वादयो यथा कर्मानुरूपा भवंति तथा तत्कार्याण्यपि रूपा
णि कुब्जवामनत्वादीनि देहिनां सर्वयोनिषु भवंति॥ ननु यदि कर्मजन्यानि कुब्जत्वादीनि तर्हि
कर्मानंतरमेव तैर्भवितव्यमित्याशंक्याह॥ विपाकः कर्मणां प्रेत्य केषांचिदिह जायते। इ
ह वामुत्र वै केषां भावस्तत्र प्रयोजनं। केषांचित् तज्ज्योतिष्टोमादिकर्मणां विपाकः
फलं प्रेत्य केषांचित्कारीर्यादिकर्मणां वृष्ट्यादिफलमिहैव भवति॥ केषांचिच्चित्रादीनां फलं
पश्वादिकमिह देहांतरे वेत्यनियतं न ह्यनंतरमेव कर्मफलेन भवितव्यमिति श्लोकस्यार्थः॥ अ
त्र च कर्मणां शुभाशुभफलकत्वे सत्वादिभाव एव प्रयोजकं न तु स्वरूपं तत्त्वात्फलतार
तम्यस्य॥ मनोवाक्कायकर्मजैः रित्यादिना तानि प्राप्नोतीत्युक्तं तत्प्रपंचयितुमाह परद्रव्याण्य
भिध्यायंस्तथानिष्टानि चिंतयन्॥ वितथाभिनिवेशी च जायतेंत्यासु योनिषु॥ परधनानि कप

मद्रमपहरेयमित्याभिमुख्येन ध्यायेत्तथानिष्टानि ब्रह्मवधादीनि हिंसात्मकानि करिष्यामीति
चिंतयंश्चिंतयेत् असत्यभूतेवस्तूनि अभिनिवेशः पुनःपुनः संकल्पस्तद्धार्ष्ट्यं चंडालाद्यंत्ययोनि
षु जायते। किंच पुरुषोऽनृतवादी च पिशुनः परुषस्तथा। अनिबद्धप्रलापी च मृगपक्षिषु
जायते। यस्त्वनृतवदनशीलः पुरुषः पिशुनः कर्णेजपः परुषः परोद्वेगकरभाषी अनिबद्ध
प्रलापी प्रकृतासंगतार्थवादी च द्विपूर्वोक्तस्यादितास्तस्व[illegible]दीनो कृष्णमृगपक्षिषु जायते
किंच अदत्तादाननिरतः परदारोपसेवकः हिंसकश्चाविधानेन स्थावरेष्वपि जायते अद
त्तपरधनापहारप्रसक्तः अविहितमार्गेण प्राणिनां घातकश्च दोषगुरुलघुभावतारतम्या
त्तरुलताप्रतानादिस्थावरेषु जायते। सत्वादिगुणपरिपाकमाह। आत्मज्ञः शौचवान्दां
तस्तपस्वी विजितेंद्रियः। धर्मकृद्वेदविद्यावित्सात्विको देवयोनिताम्। आत्मज्ञो विद्याधनाभि
जनाद्युपाभिमानरहितः शौचवान् बाह्याभ्यंतरशौचयुक्तः दांत उपशमान्वितः तपस्वी
तद्विहिततपोयुक्तः। तथेंद्रियार्थेष्वप्रसक्तो नित्यनैमित्तिककर्मानुष्ठाननिरतो वेदार्थवेदी च यः

चयः स सात्त्विकः स च सत्त्वोद्रेकतारतम्य। वशादुत्कृष्टोत्कृष्टतरसुरयोनिं प्राप्नोति ॥
किं च असत्कार्यरतो धीरः आरंभी विविषयी च यः। स राजसो मनुष्येषु मर्त्यो जन्माधिगच्छ
ति ॥ असत्कार्येषु तूर्यवादित्रनृत्याद्युद्दिष्टाभिरतो यस्तथाप्यव्यग्रचित्तः सदा कार्यानुत्तो वि
षयेष्वपि प्रसक्तश्च स रजोगुणयुक्तस्तद्गुणतारतम्याद्धीनोत्कृष्टमनुष्यजातिषु मरण
नेतरमुत्पत्तिं प्राप्नोति ॥ निद्रालुः क्रूरकृल्लुब्धो नास्तिको याचिकस्तथा प्रमादवान्भि
न्नवृत्तो भवेत्तिर्यक्षु तामसः ॥ यः पुनर्निद्राशीलः प्राणिपीडाकरो लोभयुक्तश्च तथा नास्ति
को धर्मादिनिंदको याचनशीलः प्रमादवानकार्याकार्यविवेकशून्यो विरुद्धाचारश्च
सोऽत्र तमोगुणयुक्तस्तत्तारतम्याद्धीनहीनतरपश्वादियोनिषु जायते ॥ पूर्वोक्तमुपसंहरति
रजसा तमसा चैवं समाविष्टो भ्रमन्निह ॥ भावैरनिष्टैः संयुक्तः संसारं प्रतिपद्यते ॥ एवम
विद्याविद्धोऽयमात्मा रजस्तमोभ्यामनुगाविष्ट इहास्मिन्संसारे पर्यटन्नानाविधदुःखप्रदैर्भा
वैरभिभूतः पुनःपुनः संसारे देहयन्त्रं प्राप्नोति ॥ इतीश्वरः स कथं भावैरनिष्टैः संप्रयुज्यते

इत्यस्यबोद्धस्यानवकाशः॥ यदपिकरणैरन्वितस्यापीत्तिहितियबोधंतस्योत्तरमाह मलिनो
द्विपथादृष्टोरूपालोकस्यनक्षमः॥ तथापिविपक्षकरणाग्रात्मासानस्यनक्षमः यद्यप्यात्मा
तःकरणादिज्ञानसाधनसंपन्नस्तथापिजन्मांतरानुभूतार्थावबोधेनसमर्थः अविपक्षकरणो
रागादिमलाक्रांतचित्तोयस्माद्यथादर्पणोमलच्छन्नोरूपज्ञानोत्पादनसमर्थोनभवति॥ न
नुप्राग्भवीयज्ञानस्याप्यात्मप्रकाशत्वात्तस्यचस्वतःसिद्धत्वात् नानुपालंभोयुक्तइत्याशं
क्याह॥ कटुवारीयथापथ्येमधुरःसरसोपिन॥ प्राप्यतेह्यात्मनितथानापक्वाकरणै
स्तता॥ अपक्वेकटुर्वारौतिक्तककर्कटिकायांविद्यमानोपिमधुरोरसोयथानोपलभ्यतेतत
थात्मन्यपक्वकरणेविद्यमानापिततासात्वतापा॰ दुर्वीयवस्तुगोचरानप्राप्यते॥ वे
त्तिसर्वगतोकस्मात्सर्वगोपिनवेदनामिति अनुक्ते॥ तत्रोत्तरमाह॥ सर्वाश्रयांनिजे
देहेदेहीविंदतिवेदनां॥ योगयुक्तस्तुसर्वाख्यांयोनचाप्नोतिवेदनां॥ यंपुनर्देहीअभि
मानयुक्तःससर्वाश्रयामाध्यात्मिकादिरूपांवेदनांस्वकर्मोपार्जितएवदेहेप्राप्नोति

नदेहांतरगतोभोगायतनारंभादृष्टवैलक्षण्यादेवपरस्परयोगीमुक्तोमुक्ताहंकारादिसस
कलक्षेत्रसंगतानांसुखदुःखादिसंविदांवेदिता भवतिपरिपक्वकरणत्वात् ॥ नन्वेक
स्मिन्नात्मनिसुरनरादिदेहेषुभेदप्रत्ययो नघटतइत्याशंक्याह ॥ आकाशमेकंहि
यथाघटादिषुपृथग्भवेत् ॥ तथात्मैकोह्यनेकस्थजलाधारेष्विवांशुमान् ॥ तथैवक
मेवगगनंकूपकुंभाद्युपाधिभेदाभिन्नंनानेवानुभूयतेयथावाभानुरेकोपिभिन्नेषुज
लभाजनेषुकरकमणिकमण्डलुकादिषुनानेवानुभूयते ॥ तथैकोप्यात्मानःकरणो
पाधिभेदेननानाप्रतीयतेइतिदृष्टांतोपाधानामात्मनेभेदस्यापारमार्थिकत्व
द्योतनार्थं ॥ पंचधातून्व्यंचष्टे आदत्तेयुगपच्चमुः इत्याद्युक्तमर्थमुपसंहरन्नाह ॥ ब्र
ह्मात्माखंगगनमनिलोवायुस्तेजोग्निर्जलंप्रसिद्धंभूरवनिस्त्येतेवातादिधातवइत्य
शरीरंव्याप्यधारयंतीतिधातवोभिधीयंते ॥ तत्रखादयःपंचधातवोलोकंतेदृश्यं
तइतिलोकाजडाइतिच ॥ यावदेषुविधातुरात्मायत्तस्मात्जडाजडसमुदायात्स्थावर

जंगमात्मकं जगदुत्पद्यते । कथमसावात्मा जगत्सृजतीत्यत्राह यद्वद्दंडचक्रसंयो
गात्कुंभकारो यथा घटं करोति तृणस्थूलकाष्ठैः गृहं गृहकारकः हेममात्रमुपा
दाय रूपं वा हेमकारकः निजलालासमायोगात्कोशं वा कोशकारकाः करणान्येव
मादाय तासु तास्विह योनिषु सृजत्यात्मा च संभूय करणानि च यथा हि कुलालो मृच्च
क्रचीवरादिकं करणजातमुपादाय कर्कशराकाकनानाविधकार्यजातं चरयति यथा
वा वर्द्धकिस्तृणस्थूलकाष्ठैः परस्परसापेक्षैस्तैरेकं गृहाख्यं कार्यं करोति यथा वा हेमका
रकः केवलं हेमोपादाय हेमानुगतं कटकमुकुटलादि कार्यमुत्पादयति यथा वा
कोशकारकाः कीटविशेषा निजलालया रब्धमात्मबंधनं कोशाख्यमारभंते तथात्मा
पि पृथिव्यादीनि साधनानि परस्परसापेक्षाणि तथा करणानि चक्षुःश्रोत्रादीन्युपादाया
स्मिन्संसारे तासु सुरादियोनिषु स्वयमेवात्मानं निजकर्मबंधबद्धं शरीरत्रितया सृजति
किंपुनर्वैषयिककरणानींद्रियव्याप्तिरहितात्मसद्भावे प्रमाणमित्याशंक्याह महाभूतानि

सत्यानियथात्माहि तथैवाहि । कोन्यथैवाननेनेत्रेण दृष्टमन्योन्यपश्यतीति । वायं वा को विजानाति
पुनः संस्कृत्य संस्मरति । यथा दिपृथिव्यादिषु महाभूतानि सत्यानि प्रमाणगम्यत्वात्तथात्मा
पि सत्यो ग्रन्थ्यात् यदि बुद्धेंद्रियव्यतिरिक्तो नास्तीति पूर्वो नस्याद्येकेन चक्षुषा वेन्द्रियेण दृष्टं
वस्तु तेन नस्पर्शेनेंद्रियेण को विजानातीयमहमद्राक्षं तमहं स्पृशामीति तथा कस्यचि
चित्पुरुषवाचं पूर्वं श्रुत्वा पुनः स्मृयमाणां वा चतस्य वागियमिति का प्रत्यभिजानातीति
स्मात् ज्ञानेन्द्रियातिरिक्तो ज्ञाता ध्रुव इति सिद्धं । किं च । प्रतीतार्थस्मृतिः कस्य को
वाद्य प्रयत्नकारकः । ज्ञानिरूपवपोवृत्त विद्यादि मिश्रं हंकृतः । शब्दादि विषयो द्योगकर्म
णा मनसा गिरा । यथात्मा ध्रुवो वस्यात् हि अनुभूतार्थगोचरा स्मृतिः । पूर्वं तु भवभावित
संस्कारोद्बोधनिबन्धना सैको भवेत् तह्यन्येद् दृष्टे वस्तुन्यस्मृतिरुपपद्यते । तथा कः स्व
प्रस्तानस्य कारकाः । नहीन्द्रियाणां उपरत व्यापाराणां तत्कारकत्वं । तथाहमेवाग्निनि
जेनत्यादि सपेन्नब्बातिसपन्न इत्येवं विधानुप्रत्ययः कस्य भवति । स्थिरात्मव्याति

५७८

देहेऽात्मा स्थितः ॥ उपासनाविशेषाविध्यर्थं संसारस्य रूपं विवृण्वन्नाह । संदिग्धमतिः कर्मफलमस्ति न वेत्ति न वेत्ति तावित्युक्तः सिद्धमात्मानं प्रसिद्धोपि दिमन्यते । यो सौ पूर्वोक्तश्रान्तोहंकारदूषितः ॥ स सकलं कर्मसु फलमस्ति न वेत्ति संदिग्धमतिर्भवति । तथा सिद्धोप्यकृतार्थोपि सिद्धमेव कृतार्थमात्मानं मन्यते । किंच ममदाराः सुतामात्याश्चाहमेषामिति स्थितः हिताहितेषु भावेषु विपरीतमतिः सदा । तस्य विस्तुते मम कलत्रपुत्रप्रेष्यादयोऽहमेषामित्यतीव ममताकुलास्थितिः । तथा हिताहितकरे कार्यप्रकरे स विह्वलमविपरीतमतिः सदा भवेत् ॥ किंच । सेयस्स प्रकृतौ चैव विकारे वाविशेषवान् ॥ प्रनाशाकानलापात्तऽलप्रपत्ततोधमी । एवंवृत्तो विनीतात्मा वितथाभिनिवेशवान् ॥ कर्मणोहेत्वमोदाभ्यां दृष्ट्या चैव वध्यते । संपंजानाती सेयः सस्तस्मिन्नात्मनि प्रवृत्तौ यात्मनो गुणस्तस्यावस्थायां विकारे चाहंकारादावविशेषवान् विवेकानभिज्ञो भवति । तथा नष्टाकुताशानां बुप्रवेशाविशाद्मनाविष्णुविह्वलववशात्कृतप्रयत्नो भवेदेवं नानाप्रकारकार्या

प्रवृत्तो विनीतात्मा ऽसंयतात्मा आसनकार्याभिनिवेशयुक्तो सत्तत्कृतकर्मजातेन राग
द्वेषाभ्यां मोहेन बध्यते शरीरग्रहणद्वारेण । कथं पुनस्तस्य विशेषो भवतीत्यत आह
आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता । तत्कार्मणामनुष्ठानं रागः सद्भिर्गिरः शुभाः
स्त्र्यालोकालंभविगमः सर्वभूतात्मदर्शनं । त्यागः परिग्रहाणां च जीर्णकाषायधारणं
विषयेंद्रियसंरोधस्तंद्रालस्यविवर्जनं । शरीरपरिसंख्यानं प्रवृत्तिष्वघदर्शनं । नीरजस्त
मता सत्वशुद्धिर्निःस्पृहता शमः । एतैरुपायैः संशुद्धः सत्वयोग्यमतिर्भवेत् । विद्यार्थमाचा
र्यसेवा वेदशास्त्रार्थेषु पातंजलादियोगशास्त्रार्थेषु विवेकित्वं तत्प्रतिपादितध्यानादिकर्म
णामनुष्ठानं सत्पुरुषसंगः प्रियहितवचनत्वं स्त्रीनालंभयोः परित्यागः सर्वभूतेष्वात्मव
दर्शनं समत्वदर्शनं । परिग्रहाणां वपुत्रक्षेत्रकलत्रादीनां त्यागो जीर्णकाषायधारणं त
था शब्दस्पर्शादिविषयेषु श्रोत्रादींद्रियाणां प्रवृत्तिनिरोधस्तंद्रानिद्रानुकारिणी आल
स्यमनुत्साहस्तयोर्विशेषेण त्यागः शरीरकस्य परिसंख्यानमस्थिरत्वाशुचित्वादिदोषा

नुसंधानं तथा सकलगमनादिषु प्रवृत्तिषु सूक्ष्मप्राणिवधादिदोषपरिसंख्यानमस्थिर
समर्थस्तथास्यजस्त्रमो विधूरता प्राणायामादिभिर्भावशुद्धिः ॥ गमनादिषु प्रवृत्तिषु
निःस्पृहता विषयेष्वनभिलाषः समो वाह्यांतःकरणसंयमः एतैराचार्योपासनादिभि
रुपायैः सम्यक्शुद्धः केवलसत्वयुक्तो ब्रह्मोपासनेनामृती भवेन्मुक्तो भवति कथमम
तत्वमित्यत आह ॥ तत्वस्मृतेरुपस्थानात्सत्वयोगोन्यपरिक्षयात् । कर्मणां सन्नि
कर्षाच्च सतां योगः प्रवर्तते ॥ आत्मात्म्यतत्वस्मृतेरात्मनि निश्चलतयोपस्थानात् सत्व
शुद्धियोगात्केवलसत्वगुणयोगात्कर्मबीजानां परिक्षयात्सत्पुरुषाणां संबंधादात्मयो
गः प्रवर्त्तते ॥ किंच शरीरसंक्षयेयस्यमनः सत्वस्यमीश्वरं ॥ अविप्लुतमतेः सम्यक्स
जातिस्मरतामियात् ॥ यस्य पुनर्योगिनो विप्लुनमतेः शरीरसंक्षयसमये मनः सत्वमु
क्तं सम्यग्ग्रेकाग्रतयेश्वरं प्रति व्याप्रियते सयच्चुपासनाप्रयोगप्रवीणः तथात्मानं नाधि
गच्छति ॥ तर्हि विशिष्टसंस्कारपाटववशेन जात्यंतर एव मृत्तक्रमिकादिहिनानागर्भ

५७५

वासादिसमुद्भूतदुःखस्मरत्वं प्राप्नुयात् तत्स्मरणेन वजातोद्वेगस्तादृक्छेदकारिणि मोक्षे
प्रवर्त्तते । यस्त्वयदुसंस्कारस्तया पूर्व्वानुभूतं न स्मरति तस्य का गतिरित्याह । यथा हि भरतो
वर्णैः वर्णयत्यात्मनः तनुं । नानारूपाणि कुर्वाणस्तथात्मा कर्मतास्तनूः । भरतो नटः
सप्यारामरावणादिनानारूपाणि कुर्वाणः सितासितपीतादिभिर्वर्णैरात्मनस्तनुं व
र्णयति रचयति तथैवात्मा तत्त्वकर्मफलोपभोगार्थं कुब्जवामनादिं नानारूपाणि क
र्मनिमित्तानि कलेवराण्यादत्ते । किंच । कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च । गर्भस्य
वैकृतं दृष्टमंगहीनादिजन्मतः । न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं किंतु । का
लकर्षणं स्वपितृकरणबीजदोषैर्मातृदोषश्चेति सर्वमेतत्सहकारिकारणमेते
न दृष्टरूपेण गर्भस्यांगहीनत्वादिविकारो जन्मनः प्राग्भवान्नियतकालो दृष्टः । न
नुपाक्षिप्तिकपत्तनयावसरे मदोघविलनादिकारविनाशो कर्मणांवः कथंचन मनोहंका
रोपसीहोगतिः संसरणहेतुभूतो दोषराशिः कर्मफलं धर्माधर्मरूपं । शरीरं लिंगा

मि॰ प्रा॰
७१

त्मकं ॥ एतैरहंकारादिभिरुपमात्मा कदाचिदपि न मुच्यते यावन्मोक्षः ॥ ननु प्रतिनिय
तकर्मणां जीवानां प्रतिनियतकालमेवोपरतिर्युक्ता न पुनः संग्रामादौ युगपदकाले
ले प्राणसंक्षयस्त्याशंक्याह ॥ वर्त्याधारस्नेहयोगाद्यथा दीपस्य संस्थितिः ॥ विक्रियापि
च दृष्टैवमकाले प्राणसंक्षयः ॥ यथा हि खलु तैलवर्त्तिकानेकवर्त्तिवर्त्तिनीनां नानाज्वा
लानां युगपत्स्थितिस्तासां च स्थितानां पड्त्तरयोरूपमानपवमाद्युपहतिरूपविप
त्तिहेतूपनिपातयौगपद्याद्युगपदुपरतिर्यथा भवति ॥ तथैव सङ्कुलेष्वपि वाजिकुंजरा
दिजीवानां युद्धाख्योपरतिहेतुयौगपद्यादकालेपि प्राणपरिक्षयो नानुपपन्नः ॥ एतदु
क्तं भवति ॥ अप्रतिनियतकालविपत्तिहेतुभूतादृष्टस्य तद्विरुद्धकार्याकारदृष्टहेतु
रूपनिपातेन प्राप्तिर्घटत इति ॥ मोक्षमार्गमाह ॥ अनंताः रश्मयस्तस्य दीपवद्यः स्थितो
हृदि ॥ सितासिताः कद्रुनीलाः कपिलाः पीतलोहिताः ॥ ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा
सूर्यमंडलं ॥ ब्रह्मलोकमतिक्रम्य तेन याति परां गतिं ॥ यासौ हृदि दीपवत्स्थितो जीवस्त

526

स्यां नेतारस्मयो नाज्ञः सुखदुःखहेतुभूतान्ग्रासहन्ति सहस्राणीत्यादिनोक्ताः सिता
सितकर्बुरादिरूपाः सर्वतः स्थितास्तेषामेकोरश्मिरूर्द्ध्वं व्यवस्थितस्तायोसौ मार्तंडमंड
लं निर्भिद्य हिरण्यगर्भं निलयं चातिक्रम्य वर्त्तते तेन जीवाः परां गतिमपुनरावृत्ति
लक्षणां प्राप्नोति ॥ स्वर्गमार्गमाह ॥ यद्यस्मान्नाडरश्मिभ्यः तमूर्द्ध्वमेव व्यवस्थितं ॥ तेन सु
रशरीराणि सेजसानि सुखैकभोगाधिकरणानि सधामानि कारजतरत्नरचितामर
पुरवरसहितानि प्रपद्यते ॥ संसरणमार्गमाह ॥ येनेकरूपा रश्म्याधस्ताद्रश्मयोस्य मृदुप्रभाः
इह कर्मोपभोगाय तैः संसरति सोवशः ॥ ये पुनरस्तस्याधस्ताद्रश्मयो मृदुप्रभा इह फलो
पभोगार्थं संसारे संसरन्ति ॥ अवशः ॥ स्वकर्मपरतंत्रः ॥ भूतचैतन्यवादिपक्षमपि जिही
र्षुराह वेदैः ॥ शास्त्रैः सविज्ञानैर्जन्मना मरणेन च ॥ आर्त्या गत्या तथागत्या सत्येनाथ
नृतेन च ॥ श्रेयसा सुखदुःखाभ्यां कर्मभिश्च शुभाशुभैः ॥ निमित्तशकुनज्ञानग्रहसंयो
गजैः फलैः ॥ तारानक्षत्रसंचारैर्जागरैः स्वप्नजैरपि ॥ आकाशपवनज्योतिर्जलभूति

५८७

बुद्ध्यैतन्यादिसमवायः संभवति तदारंभकत्वसंभवात् भौतिकेष्वनुपलंभात् न चासदृशत्वेऽपि न्यायेन नियततया तत्प्रागमनागमनाभ्यां ज्ञाने ऽपि प्रयत्नाधारनियताभ्यां मयि भौतिकदेहातिरिक्तात्मा

मिरैस्तथा । मन्वंतरैर्युगप्राप्त्या मंत्रौषधिफलैरपि । वित्तात्मानं वेदमानं कारणं ज-
गतस्तथा वेदैः स एव मे निर्नेतीत्यात्मेति स्थूलमनवह्रस्वमपाणिपादमित्यादिः । शास्त्रे
ष्वमीमांसान्वीक्षिताद्विभिः विज्ञानैश्चमेतमेद शरीरमित्यादिदेहव्यतिरिक्तात्मा
रूपानुभावैस्तथा जन्ममरणाभ्यां जन्मांतरानुष्ठितधर्माधर्मनिपतताभ्यां स्पर्शादेहा
दिव्यतिरिक्तात्माऽसौ वक्तुद्वक्तनुमानं । जन्मांतरगतं कर्मानुमानं । न हि देहस्थचैतन्या
दिसमवायः संभवतिपतः कारणगुणप्रक्रमेण कार्यद्रव्यवैशिकगुणारंभो दृष्टः । न चैतत्का
रणभूतपार्थिवपरमाद्विद्रव्यं तत्संयोगजं शतिवाच्यं । शाकैः साधारणगुणत्वात् तदतो भौ
तिकदेहातिरिक्तश्चैतन्यादिसमवाय्यंगीकर्तव्यः सत्यानंतप्रसिद्धेश्चयोऽद्वितप्रा[illegible]प्तिः दु
खदुःखविश्रामसुखमिकेत्तप्याशुभकर्मानुष्ठानमशुभकर्मपरित्यागः एतौ श्च ७५ ज्ञाननियतैर्देहा
तिरिक्तानुमानं । निमित्तैर्भेदकं वादि शाकुमज्ञानेषिकान्तादिप नत्रिवेष्टालिंगकं संज्ञानं गन्धः स्पर्शो
रूपः । तत्संयोगजैः फलैः नायं प्रत्विन्यादिव्यतिरिक्तानि जोती । षिनक्षत्राण्यत्रयुक्तप्रभृतीनि

४७८

ग्रहोषां संचारैः । शुभाशुभफलद्योतनैः जगद्वैरोगजरावस्थाजन्मविपत्त्यादिदर्शनैः स्तथा
स्वप्नजैः खरवराहमुक्ताद्यारोहणादिफलैस्तथाकाशाद्यैश्चजीवोपभोगार्थैस्तथासृष्टैः
स्तथामन्वंतरप्राणिमानुयुगांतरप्राप्त्यादेहेतुरुपपद्यमानं यान्तथामंत्रौषधिफलैः प्रत्यक्षपू
र्वकैः क्रूरकर्माद्यैर्मासाख्यसंपरयावादेर्हेतुरुपपद्यमानेतेश्वमानेदेहमुनयोवितन्जानीते । किंच अ
हंकारः स्मृतिर्मेधाद्वेषो बुद्धिः सुखेच्छेति । इंद्रियांतरसंवादः श्वासप्रश्वासौ चेति । स्वर्गः स्वप्नस्वभा
वानां प्रेरणं मनसो गतिः । निमेषश्चेतनायत्त आदानं पांचभौतिकं । एतानि दृष्टपूर्वोक्तलिंगा
नि परमात्मनः तस्माद्दृष्टिपदैर्देहाद्यात्मा सर्वग ईश्वरः । अहंबेतिरहंकारः स्मृतिः प्रागनु
भूयानुभवभावितसंस्कारोद्बोधनिबंधानां तत्स्मृत्यादीनां व्यापारः सुखमेहि कंध तिथे
यमिंद्रियांतरेणदृष्टेर्थे रयांतरेणादृष्टेर्थे इंद्रियांतरस्य संचारो यमहमद्राक्षं तमहं स्पृशा
मीत्येवमनुसंधानरूपं इंद्रियांतरसंचारः । अत्रैष्याप्रत्यक्षस्यैतस्यानां स्वरूपेणलिंगत्वेपू
र्वक्तोकेऽनुगमनसत्स्ववचनादेहेतुत्वर्यार्थिकं लिंगत्वमित्यपौनरुक्त्यं । तथाधारणांशरी

रस्य जीवितं प्राणधारणं स्वर्गो नियतदेहां तदुपभोगसुखविशेषः स्वर्गः प्रसिद्धः पूर्वश्लोकेनु
खस्यास्याशुभफलद्योतकतया लिंगत्वमत्र स्वरूपेण त्वयोनरूक्तं ॥ भावानामिंद्रियादीनां प्रेर
ण मनसोगतिश्चेतनाधिष्ठानत्वात्तानि मेषं प्रसिद्धः तथा पंचभूतानामुपादानं यस्यादेता
नि लिंगानि भूतेष्वनुपचरितसाक्षात्परंपरया वा परमात्मनो द्योतकानि दृष्टं तेन तस्माद्व्यति
देहाद्व्यतिरिक्त आत्मा सर्वगईश्वरश्चेति सिद्धं ॥ क्षेत्रस्वरूपमाह ॥ बुद्धींद्रियाणि सार्थानि मनः
कर्मेंद्रियाणि च ॥ अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥ अव्यक्तमात्मा क्षेत्रज्ञः क्षे
त्रस्यास्य निगद्यते ॥ ईश्वरः सर्वभूतस्थः सदसद्रूप एव सः ॥ बुद्धींद्रियाणि श्रोत्रा
दीनि ॥ सार्थानि शब्दादिविषयसहितानि ॥ मनः कर्मेंद्रियाणि वागादीनि तथाहं
कारो बुद्धिश्च व्यापात्मिका ॥ पृथिव्यादीनि पंचभूतानि अव्यक्तं प्रकृतिरित्येतत्क्षेत्रमस्यायो
सावीश्वरः सर्वगतो नरएवसद्रूपः प्रमाणांतरागम्यत्वादसत्स्पष्टप्रतीतिकत्वात्सदस
द्रूपो सावात्मा क्षेत्रज्ञ इति निगद्यते ॥ बुद्ध्यादेरुत्पत्तिमाह ॥ बुद्धेरुत्पत्तिरव्यक्तात्ततो हंका

४८०

रसंभवः। तन्मात्रादीन्यहंकारादेकोत्तरगुणानि च॥ सत्वादिगुणसाम्यमव्यक्तं तत त्रि
प्रकारायाः सत्वरजस्तमोमय्या बुद्धेरुत्पत्तिः। तस्याश्चवैकारिकस्तैजसो भूतादिरिति त्रि
विधोहंकारस्तत्पद्यते। तत्र तामसाद्भूतादिसंज्ञकादहंकारात्तन्मात्राणि। आदिश
ब्दाद्गगनादीनि। तानि चैकोत्तरगुणान्युत्पद्यंते। यथाशब्दाद्वैकारिकतैजसाभ्यां बुद्धि
कर्मेंद्रियाणामुत्पत्तिः। गुणरूपमाह। शब्दःस्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः। यो
यस्मान्निःसृतश्चैषां स तस्मिन्नेव लीयते। तेषां गगनादिपंचभूतानां एकोत्तरवृद्ध्या
यते। प्रकरणार्थमुपसंहरन्नाह। यथात्मानं सृजत्यात्मा तथा वः कथितो मया। विपाका
त्त्रिप्रकाराणां कर्मणामीश्वरोपि सन्। एवं रजस्तमश्चैव गुणं स्तस्यैव कीर्तिताः। रजस्त
मोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ। अनादिरादिमांश्चैव स एव पुरुषः परः। लिंगेंद्रि
यग्राह्यरूपः सविकार उदाहृतः। मानसादित्रिप्रकारकर्मणां विपाकादीश्वरोपि सन्ना
त्मा यथात्मानं सृजति। तथा युष्माकं कथितः। सत्वाय रजश्च गुणास्तस्यैवाविद्याविष्टस्य

७४

कीर्तितास्तथा सएव स्वजन्मतोऽभ्यासाविष्टश्चक्रवदिह संसारे भ्राम्यतीत्यपि कथितं । सए
वानादिः परमपुरुषः शरीरग्रहणेनादिमानत्र कुब्जवामनत्वादिविकारसहितस्तथा
स्थूलाकारतयापरिणतो लिंगेंद्रियग्राह्यस्वरूपउदाहृतः । स्वर्गमार्गमाह । पितृयानो
जवीथ्याश्च यदगस्त्यस्य वांतरं । तेनाग्निहोत्रिणो यांति स्वर्गकामा दिवं प्रति । अजवी
थ्यमरमार्गस्तस्यागस्त्यस्य च यदंतरं मध्यं सोपि पितृयानस्तेनाग्निहोत्रिणः स्वर्गकामाः स्व
र्गं प्राप्नुवंति । किंच येच दानपराः सम्यगष्टाभिरात्मगुणैर्युताः । तेपि तेनैव मार्गेण सत्य
व्रतपरायणाः । येच दानादि स्मार्तकर्मपराः सम्यग्धर्मरहिताः । तथाष्टाभिरात्मगुणैर्द
याक्षांतिरनसूयाशौचमनायासो मंगलमकार्पण्यमस्पृहेति गौतमादिप्रतिपादितैर्यु
क्तास्तथाये च सत्यवचननिरतास्तेपि तेच पितृयानेन सुरसद्मनमाप्नुवंति । ननु नैमित्ति
कादिप्रतिसंवत्सरे खिलाध्यायकप्रलयादि विदितवेदास्तस्योपरि तज्जनाः कथमिवाग्नि
होत्रादिकं कर्म करिष्यंति । कथं तत्रोचात्र कर्माणः स्वर्गमार्गमधिरोक्ष्यंत्यत आह । तत्रा

(4.82)

७४

ष्टाशीतिसहस्राः मुनयो गृहमेधिनः ॥ पुनरावर्त्तिनो बीजभूता धर्मप्रवर्त्तिकाः ॥ तत्रापि
तथान्ये ऽष्टाशीतिसहस्रसंख्या मुनयो गृहस्थाश्रमिणः पुनरावर्त्तिनो बीजभूता धर्म
धर्मिणः सर्गादौ वेदस्योपदेशकत्तया धर्मतत्त्वप्रादुर्भावे बीजभूताः सन्तः ऽग्निहोत्रा
दिधर्मप्रवर्त्तप्रवर्त्तकाः अतो न प्रागुदितदोषसमासंगः ॥ किंच सप्तर्षिनागवीथ्युत्तरं देव
लोकं समाश्रिताः ॥ तावन्त एव मुनयः सर्वारंभविवर्जिता ॥ तपसा ब्रह्मचर्येण संगत्या
गेन मेधया ॥ तत्र गत्वावतिष्ठंते यावदाभूतसंप्लवं ॥ सप्तर्षयः प्रसिद्धाः नागवीथ्यैरावतपथः
तदंतराले तावंत एवाष्टाशीतिसहस्रसंख्या मुनयः ॥ सर्वारंभविवर्जिताः कैवल्यस्नान
निष्णास्तपोब्रह्मचर्ययुक्तास्त्यागसंगत्यागिनो देवलोकं समाश्रिताः ॥ आभूतसंप्लवं प्रा
कृतप्रलयपर्यंतमवतिष्ठंते ॥ तत्रापि तास्य स्थादावाध्यात्मिकधर्मस्य प्रवर्त्तकाः क
थंभूतास्ते मुनय इत्यत आह ॥ यतो वेदाः पुराणानि विद्योपनिषदस्तथा ॥ श्लोकाः सू
त्राणि भाष्याणि यच्च किंचन वाङ्मयं ॥ यतो हि विद्याद पि मुनिसम्हाच्च त्वारो वेदाः

पुराणांगानि विद्योपनिबंधदर्शनानि नित्यभूतान्येवाध्येतृपरंपरया प्रवृत्तास्तथा श्लोकाः सूत्रिदासा
त्मकाः सूत्राणि च शब्दानुशासनमीमांसागोचराणि भाष्याणि च सूत्रव्याख्यारूपाणि पद
न्यदापुर्वीद्यादिकं वा भुवं तदपि पत्तत्सकाशात्प्रवर्तंतपयाविद्यास्तमुनयो धर्मप्रवर्त्तका
एवं सति वेदस्यापि नानित्यत्वादोषप्रसंगः ॥ ततः किमित्याह ॥ वेदानुवचनं यज्ञो ब्रह्मच
र्यं तपो दमः । श्रद्धोपवासस्वातंत्र्यमात्मनो ज्ञानहेतवः । वेदस्य नित्यत्वे सति तत्प्रामाण्यबला
द्वेदानुवचनादयः सत्त्वशुद्ध्यापादानद्वारेणात्मज्ञानस्य हेतवः इत्युपपन्नं भवति ॥ किंच
स स्वात्मा मोविजिज्ञास्यः समस्तैः स्वमेकत्तु । द्रष्टव्यस्तत्र मंतव्यः श्रोतव्यः श्रद्धया द्विजातिभिः ॥ यएन
मेवं विंदंति ये नीरस्य कमाश्रिताः । ह्यनेद्विजाः सत्यं श्रद्धयापरवाप्नुताः ॥ यस्मान्नित्यतया
त्मप्रमाणभूता वेदस्तस्मादसंबुद्धमार्गणसकलाश्रमिभिर्नानाप्रकारं जिज्ञासितव्य
स्तमेव प्रकारं दर्शयति द्विजातिभिर्द्रष्टव्यो ऽपरोक्षीकर्त्तव्यस्तत्रोपायं दर्शयति ॥ श्रोतव्यो
मंतव्य इति । प्रथमतो वेदांतश्रवणेन निरोधितव्यस्तदनंतरं मंतव्यो युक्तिभिर्विचारेप

[illegible]श्रुत। ततस्तान्पुरुषोऽम्येत्यमानसो ब्रह्मलोकिकान्॥ करोति पुनरा
वृत्ति[illegible]मानवं न विद्यते॥ विदितात्मानः क्रमादम्याद्यभिमानदेवतास्थानेषु मुक्तिमार्गे
ष्वेतेषु विश्रम्य ततः प्रस्थापिताः परमपदं प्राप्नुवन्ति॥ प्राचिवाह्नः रहाहरन॥ शुक्लपक्षस्तथो
त्तरायणं॥ पुरस्पासविनतात्सूर्यः वैद्युतं चतेजात्मा॥ नेवं क्रमार्चिरादिस्थानगतावमान
वः पुरुषो ब्रह्मलोकभाजः करोति॥ तेषामिह संसारे पुनरावृत्तिर्न विद्यते॥ किंतु प्राक्र
तप्रतिसंचरावसरे त्यक्तलिंगशरीराः परमात्मन्येकीभवन्ति॥ पूर्वोक्तं पितृयानमाह प
[illegible]तपसा दानैर्येहि स्वर्गजितो नराः॥ धूमं निशां कृष्णपक्षं दक्षिणायनमेव च॥ पितृलो
कं चैव[illegible]ायं रश्मिजलं मही॥ क्रमति भवं तो ह्यपुनरेव व्रजेति च॥ एतद्यो नि विजानाति मा

तद्व्यक्ततोसौ ॥ ध्यानेनापरोक्षीभवतियेद्विजातयो ऽग्नितिप्रायश्चद्युक्ताः संतो निर्जनप्रदेशा
माश्रिताः ॥ एवमुक्तेन मार्गेण आत्मानं सत्यं परमार्थभूतमुपासते ॥ तस्यात्मानं विदंतिनम
तेप्राप्नुवंति ॥ अग्निमार्गं देवयानमाह ॥ क्रमात्तेलंभवंत्यर्चिरहःशुक्लं तथोत्तरं ॥ अयनं देव
लोकं च सवितारं सवैद्युतं ॥ ततस्तान्पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् ॥ करोति पुनरा
वृत्तिस्तेषामिह न विद्यते ॥ विदितात्मानः क्रमादग्न्याद्यभिमानदेवतास्थानेषु मुक्तिमार्ग
भूतेषु विश्रम्य तैः प्रस्थापिताः परमपदं प्राप्नुवंति ॥ अर्चिर्भिः दिनं ॥ शुक्लपक्षस्तथो
त्तरायणं ॥ सुरसभा सविता सूर्यः वैद्युतं चतेजास्तान् एवं क्रमार्चिरादिस्थानगतावमान
सःपुरुषो ब्रह्मलोकभाजः करोति ॥ तेषामिह संसारे पुनरावृत्तिर्न विद्यते ॥ किंतु प्राक्र
तप्रतिसंचरावसरे व्यक्तलिंगशरीराः परमात्मन्येकीभवंति ॥ एवं पितृयानमाह ॥ य
ज्ञेन तपसा दानैर्येहि स्वर्गजितो नराः ॥ धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ पितृलो
कं चंद्रमसं वायुं वृष्टिं जलं महीं ॥ क्रमात्संभवंतीह पुनरेव व्रजंतीय ॥ एतद्यो नि विजानाति मा

गच्छितयमात्मवान् ॥ दंदशूकः पतंगो वा भवेत्कीटोऽथवा कृमिः ये पुनर्विरिक्तैर्यत्नदीनत
पोभिः स्वर्गफलभोक्तारस्तेक्रमात् ॥ धूमादिवंऽपर्यंतपदार्थाभिमानिनो देवताः प्राप्य
पुनरेवावापुर्वृष्टिः जंतन्भूमौ प्राप्य व्रीह्याद्यात्मरूपेण शुक्रत्वमभ्येत्य वाप्य संसारिणो यो
निं व्रजंति एतन्मार्गद्वयं अप्रमत्तो योगी न विजानाति मार्गद्वयोपायभूतं धर्मानुष्ठानं न क
रोत्यसो दंदशूको भुजंगः पतंगः शलभः कृमिः कीटो वा भवेत् ॥ उपासनाप्रकारमाह
ऊरुस्थोत्तानचरणः सव्ये न्यस्येतरं करं ॥ उत्तानं किंचिदुन्नाम्य मुखं विष्टभ्य चोरसा
निमीलिताक्षः सत्त्वस्थो दंतैर्दंतानसंस्पृशन् ॥ तालुस्थाचलजिह्वश्च संवृतास्य सुनि
श्चलः ॥ संनिरुद्ध्येंद्रियग्राममनातिनीचोच्छ्रितासनः ॥ द्विगुणं त्रिगुणं वापि प्राणायाममु
पक्रमेत् ॥ ततो ध्येयः स्थितो योऽसौ हृदये दीपकप्रभुः ॥ धारयेत्तत्र चात्मानं धारणं धा
रणं बुधः ॥ ऊरुस्थावुत्तानचरणौ यस्य सत्त्वस्थो कोवद्धपद्मासनः ॥ तथोत्तानैः सव्यक
रे दक्षिणमुत्तानं न्यस्य मुखं च किंचिदुन्नाम्योरसा च विष्टभ्य स्तब्धमपि कृत्वा तथा निमि

लिताक्षः सत्यस्थः कामक्रोधादिविरहितो द्वंद्वैर्द्वंद्वातानसंस्पर्शी पदत्रस्तथा तालुनि स्थितामप्र
चलां जिह्वां यस्य सततं योगः तथा संवृतास्यः पिहितनेत्रः सुनिश्चलानिः प्रकंपस्तथा सम्य
गिंद्रियं समाहृत्य विषयेभ्यः प्रत्याहृत्य नातिनीचासनो नात्युच्छ्रितासनो यथा चित्तविक्षेपो
न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वा प्राणायामाभ्यासमुपक्रमेत ततो वशी
कृतपवनेन योगिना यो सौ हृदये दीपवद प्रकंपः प्रभुः स्थितो सो ध्यातव्यः तत्र च हृद्या
त्मानं मनोगोचरं तथा धारणं धारयेद्धारणामकरूपं पंच जान्वग्रभ्रमणेन छोटिकोद्घातका
लो मात्रा ताभिः पंचदशमात्राभिरधमः प्राणायामस्त्रिंशद्भिः मध्यमः पंचचत्वारिंशद्भि
रुत्तमः अस्य एवं प्राणायामत्रयात्मिकैः का धारणा तास्त्रियोगशास्त्रे व्याख्याताः धारयेद्य
थोक्तमनुनाग्रसे भवच्छोटिकोद्घात्कराग्रे जानुमंडले मात्राभिः पंचदशाभिः प्राणा
यामोऽधमस्ततः मध्यमो द्विगुणः श्रेष्ठस्त्रिगुणो धारणास्तथा त्रिभिः त्रिभिः स्तत्रैकैका ता

मिर्योगमत्रयेयचेत्ति। धारणात्मकयोगाभ्यासे प्रयोजनमाह। अन्तर्धानेस्मृतिः कांति
दृष्टिश्रोत्रिसंतानप्या। निजशरीरसुमुक्तस्य परकायप्रवेशने। अर्थानां छ दृत्तः सहिर्योगसि
द्धेश्च लक्षणं। सिद्धियोगेत्यसनु देहममतत्त्वायकल्पते। अणिमासमप्याप्यापरे रहस्यत्व
मेतहीनं स्मृतिरन्तीर्दोपश्चप्पयर्थे श्रुमन्त्वादेरिखस्मरणं। कांतिः कमनीयता दृष्टिरन्तीनाग
तेश्चप्यर्थश्रुतप्यश्रोत्रत्वता। अतिदवीयसि देशाभिव्यंस्यमानतयाश्रोतपथमनासदुषा
मति शब्दानां सात्म्तानिजशरीरत्यागेन परशरीरप्रवेशने। स्वबोधावष्टोनार्थानां कार
णानिस्पेक्षतयासहिर्मित्रोतयोगस्यसिद्धेर्लक्षणं लिंगं। नचैवत्तावदेवप्रयोजनं किंतु
सिद्धयोगेत्यसनुदेहममतत्त्वायकल्पते। ब्रह्मत्वसाधये च प्रभवति। पञ्चदशनाद्यासमवेस
त्वशुद्धि [illegible] भ्यां तदमाह॥ अथवाप्पस्यसन्नवेदं न्यस्तकर्मावनेवसन्। अथवाचिंता
शामिन्यमुक्षरां सिद्धिमवाप्नुयात्॥ अथवात्यक्तकाम्यनिषिद्धकर्मान्यस्तमेवेदमभ्य

स्यन्नेकांतशीलो ऽप्यचित्तमितापुनायादितसत्वशुद्धिरात्मोपासनेन परां मुक्ति
लक्षणां सिद्धिं प्राप्नोति ॥ किंच ॥ न्यायागतधनस्तत्वज्ञाननिष्ठोऽतिथिप्रियः ॥ श्राद्धकृ
त्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥ सत्यपि तु गृहादिन्यायेनोपार्जितधनोऽतिथिपूजा
तत्परो नित्यनैमित्तिकश्राद्धानुष्ठाननिरतः ॥ सत्यवचनशीलः सम्यगात्मतत्वध्याननि
रतो गृहस्थोऽपि सम्यगात्मानुमुक्तिमवाप्नोति ॥ तस्मान्न केवलमेव परिव्राज्यपरिग्रह
एव मुक्तिसाधनं ऽपि तु सन्मार्गतरीयमपि ॥ इति प्रध्यात्मप्रकरणं ॥ वर्णाश्रमेतराणां
नोद्दिष्टधर्मा न भ्रष्टत्यत्र प्रतिपाद्यत्वा प्रतिज्ञातषड्विधधर्ममध्ये पंचप्रकारं धर्म
मभिधायावशिष्टं नैमित्तिकं धर्मं जातं प्रायश्चित्तपदाभिलप्यं प्रारिप्सुः प्रथमत
स्तत्प्ररोचनार्थमधिकारिविशेषप्रदर्शनार्थं बाहुरूपं कर्मविपाकं तावदाह ॥ महा
पातकजान्घोरान् नरकान् प्राप्य दारुणान् ॥ कर्मक्षये प्रजायंते महापातकिनस्त्वि
ह ॥ ब्रह्महत्यादिपंचकस्य महापातकसंज्ञा ब्रह्महा मद्यपस्त्येन्यवक्ष्यते ॥ तद्योगिनो म

हापातकिनस्त्विमहापातकजनितांस्तामिस्रादिनरकान्बहुवत्सरगणान्दुःखानुरूपान्घो
रान्प्रतिसीमप्रवेशनार्हपापकत्वेनातिभयंकरान्प्राप्य तद्दुःखैकभोगनिर्णयानुग्राह्य
कर्मजन्यनरकदुःखोपभोगक्षयादनंतरं कर्मशेषात्पुनरिह संसारदुःखबहुलश्वसृगाला
दितिर्यग्योनिषु प्रकर्षेण भूयो भूयो जायंते ॥ महापातकिग्रहणमितरेषामप्युपपातक्या
दीनामुपलक्षणं तेषां च तिर्यगादियोनिप्राप्तेर्वक्ष्यमाणत्वात् ॥ महापातकिनां संसा
रप्राप्तिमुक्त्वा तद्विशेषकथनमाह ॥ मृगाश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति ॥ खरपु
ल्कसवेनानां सुरापो नात्र संशयः ॥ कृमिकीटपतंगत्वं स्वर्णहार्य समाप्नुयात् ॥ तृणगुल्मलता
त्वं चक्रमशो गुरुतल्पगः ॥ मृगाः हरिणादयः ॥ श्वसूकरोष्ट्राः प्रसिद्धाः ॥ तेषां योनिं ब्रह्महा
स्वकर्मशेषवशात्प्राप्नोति ॥ खरो रासभः पुल्कसः प्रतिलोमनिर्देशेन शूद्राज्जातः ॥ वैदेहकेनां
बष्ठ्यां जातो वेनस्तेषां योनिं सुरापः प्राप्नोति ॥ कृमयः सजातीयसंभोगनिरपेक्षा मांसवि
षणमलादिजन्यास्तत्तत्किंचित्स्थूलतराः पक्षाश्रितरहिताः स्वजातिसंभोगरहिताः पि

पीलिकादयः कीटाः पतंगाः शलभास्तेषां योनिं ब्राह्मणस्वर्णहारी प्राप्नुयात् ॥ तृणकाष्ठा
दि गुल्मलते प्रागुक्ते तज्जातीयतां क्रमेण गुरुतल्पगः प्राप्नोति ॥ यत्तच्चाकामविवद्धं का
मकारम् हेत्वन्यात्वपि दुःखबहुलयोनिषु संसरंति ॥ यथाह मनुः ॥ श्वसूकरखरो
ष्ट्राणां गोजाविमृगपक्षिणां ॥ चंडालपुल्कसानां च ब्रह्महा योनिमृच्छति ॥ कृमिकीटप
तंगानां विड्भुजां चैव पक्षिणां ॥ हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणो व्रजेत् ॥ लूताहि
सरटानां च तिरश्चां चांबुचारिणां ॥ हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥ लूतो
र्णनाभिः सरटः कृकलासः ॥ तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि ॥ क्रूरकर्मकृ
तां चैव शतशो गुरुतल्पगः इति ॥ किंच ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदंतकः ॥ हे
महारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥ यो येन संवसत्येषां स तल्लिंगोभिजायते ॥ एवं रौ
रवादिनरकेषु शूकरखरादियोनिषु च दारुणं दुःखमनुभूती पानंतरं दुरितशेषेण
जनन्लसमयप्रभवक्षयरोगादिलक्षणयुक्ता दुःखप्रचुरेषु मानुषशरीरेषु संसरंति ॥ त

ब्रह्मराक्षसपरोगी राजयक्ष्मी भवेत् ॥ निषिद्धसुरापानः श्यावदन्तः कुनखदर्शनः ॥ ब्राह्मणो हेम्नः हर्त्ता कुत्सितनखत्वं ॥ गुरुदारगामी दुश्चर्मत्वं कुष्ठितां एतेषां ब्रह्महादीनां मध्ये येन पतितेन पापपुरुषः संवसति स तद्रोगी भिजायते ॥ किंच अन्नहर्त्ताऽमयावी स्यात् मूको वागपहारकः ॥ धान्यमिश्रोऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः ॥ तैलहृत्तैलपायी स्यात्पूतिवक्त्रस्तु सूचकः ॥ अन्नस्यापहर्त्ताऽमयाव्यजीर्णवान् ॥ वागपहारको अननुज्ञाताध्यायी पुस्तकापहारी च मूको वागिन्द्रियविकलो भवेत् ॥ धान्यमिश्रोऽतिरिक्ताङ्गः षडङ्गुल्यादिः पिशुनो विद्यमानपरदोषप्रख्यापनशीलः दुर्गन्धनासिकः ॥ तैलस्यहर्त्ता तैलपायी कीटविशेषो भवति सूचकः सद्दूषकीर्त्तनकृद्दुर्गन्धिवदनो जायते ॥ एतच्चातिर्यक्करणात् ॥ किंच परस्यपोषितं हृत्वा ब्रह्मस्वमपहृत्य च ॥ अरण्ये निर्जने देशे भवति ब्रह्मराक्षसः ॥ यः परदारानपहरति ॥ असावरण्ये निर्जले देशे ब्रह्मराक्षसोऽभूत्वविशेषो जायते ॥ यः परदारानपहरति ब्रह्मस्वं च सुवर्णव्यतिरिक्तमपहरति ॥ असावरण्ये निर्जले प्रदेशे ब्रह्मराक्षसो विशे

बो जायते ॥ किंच ॥ हृत्वा तौ प्रजायेत परस्त्रापहारकः ॥ यत्र शाकं शिखी कृत्वा गंधान् छु
छुंदरिः शुभान् ॥ हीनजातौ हीमकारारव्यायां परिजातो परस्त्रापहारको जायते त
थाच मनुः ॥ मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ॥ विविधानि च रत्नानि जाय
ते हेमकर्तृष्विति ॥ तथा यत्रात्मकं शाकं हृत्वा मयूरः शुभान् गंधान् परहृत्य छुछुंदरी रा
जतुहृत्वा खा मूषिका जायते ॥ किंच ॥ मूषको धान्यपहारी स्यात् यानमुष्ट्रः कपिः फलं
धान्य हार्यो खुर्यो नह त्वोथरा चरटाख्यः ष्ट्राः फलं वानरो जलं प्लवः शाकटाचिल्लाख्यः पक्षी
क्षीरं ध्वांक्षो ॥ गृहोपस्करं मृणालादि कृत्वा गृहकारी चरटाख्यः कीटविशेषः मधु हृत्वा दंशाख्याः
कीटा पलं मांसं हृत्वा गृध्राख्यः पक्षी गां हृत्वा गोधाख्यः प्राणिविशेषः ॥ अग्निं हृत्वा वकाख्यः पक्षी
वस्त्रं हृत्वा श्वित्री ॥ इक्ष्वादिरसं हृत्वा सारमेयः ॥ लवणहारी चार्याख्यः उच्चैःस्वरकीटः ॥ एवं प्रदर्शि
नार्थं किंचिदुक्का प्रतिरूप्यं एष्टा कोटेन वक्तुमशक्ते रेकोपाधेनाकर्मविपाके दर्शयितुमाह
प्रदर्शनार्थं किंचिन्मेतनुमयोक्तं हेय कर्मणि ॥ द्रव्यप्रकारादि यथा तथैव प्राणिजातयः द्रव्य

८०

(४९३)

स्यापहारी यमार्गस्यपादहस्ताः प्रकाराश्चाहुष्णाश्वप्राणिजातयः स्तेयकर्मण्यपहर्तारो भवंति
यथाकांस्यहारी हंस इति ॥ अथवा यस्य फलसाधनं द्रव्यमपहरति तत्साधनविकलोपया
ये युक्तामइक्षुहारक इति ॥ श्रीत्वेन कश्चिद्विशेषो दर्शितः ॥ ब्रह्महा कुष्टी तैजसापहारी मंडली दे
वब्राह्मणक्रोशकः ॥ खल्वातिर्गरदश्चाग्निदाबुन्मत्तो गुरुप्रतिहंतापस्मारो भ्रूणघ्नो धर्मपत्नी
मुक्तान्यत्रप्रसकः श्वेतः ॥ दुष्कर्मेतु मेशाकः पित्रादिविवदमानो यस्मारी नास्यापहार्यस्यपत्न्यः
रत्नापहार्यस्यंतरिक्षो विद्यापुरविक्रीयीत पाहुर्वेधो प्राणिविप्रोषः कुंडाशी मगमक्षोदे वब्रा
लणाह्यपहारी पांडुरोगीन्यासापहारी चकारगः ॥ स्त्रीपरायोपजीवी षंढः ॥ कौमारदारत्या
गी दुर्भगामिष्टैःकाशीवातगुल्मी ॥ अभक्ष्यभक्षो गंडमाली ब्राह्मणीगामी नवाजाक्रूर
कर्मा वामनो वस्त्रापहारी पतंगः ॥ अन्यापहारी क्षयणकः ॥ शोलभस्मचपपहारी कपा
लीरोपापहारी कौशिको मित्रध्रुक् क्षयी ॥ मातापित्रोराक्रोशकः खेडकार इति ॥
वह्नि गौतमोपि कश्चिद्विशेषमाह ॥ अनृतवाक् उच्चालो मुहुर्मुहुःसंलग्नवाक् ॥ जलोद

८०

दरी दारत्यागी ॥ कूटसाक्षी क्षोपदी उच्छूनजंघचरणो विवाहविघ्नो कर्त्ता छिन्नो छः अ
वगो चरणछिन्नहस्तो मातृघ्नोऽघः स्नुषागामी वा नवबल चतुष्पथे विप्रमूत्र विस
र्जने मूत्रकृच्छ्री कन्यादूषमगः ॥ वेदविक्रयी हीपी वकु याजको जलप्लवः ॥ अयाज
याजको वराहो निमंत्रितभोजी वायस ॥ मिष्टैकभोजी कामिरट्टता दायी वल्मी वर्दीम
त्सरी भ्रमरो [illegible]कासादी मंडलकुष्ठी शूद्राचार्यः श्वपाको गोहर्त्ता सर्पः स्नेहापहारी क्ष
यी ॥ अन्नापहारी जीर्णो नानायहारी मूक ख्वेडा लीपुकसीगमने जगरः ॥ प्रव्रजिता
गमने मरूपिशाचः शूद्रीगमने दीर्घकीटः ॥ सवर्णाभिगामी दरिद्रो जलहारी मत्स्यः क्षी
रहारको वलाका वार्द्धुषिको गदही नो अविक्रेयविक्रयी गृध्रो राजमहिषीगामी नपुंस
को राजाक्रोशको गर्दभो गोगामी मंडूको नध्यायाध्ययने शृगालः ॥ परद्रव्यापहारी प
रप्रेष्यो मत्स्यवधे गर्भवासित्वेते अनडुद्गमनाद्यत्रि त्रियोऽवतेषु निमित्तेषु पूर्वोक्ता
स्वेव जातिषु स्त्रीत्वमनुभवंति ॥ यथा हमनुः ॥ स्त्रियो व्येतेन कैर्ल्लो न हत्यादोषमवा

मुमुक्षुः ॥ यत्तेषामेव जंतूनां भार्यात्वमुपपद्यते ॥ एतच्च क्षयं न्यादिलक्षणकर्पनं प्रायश्चि
त्तोन्मुखीभूतब्रह्महाद्युद्गजननार्थं न पुनः क्षयित्वादिलक्षणमुक्तानां द्वादशवा
र्षिकाविव्रतप्राप्त्यर्थं संप्रग्रनिवृत्त्यर्थं वा ॥ तथाहि ॥ पापक्षयार्थं प्रायमुमुक्षुः यत्तेषामे
वजंतूनां भार्यात्वमुपपद्यंते ॥ एतच्च क्षयित्वादिलक्षकर्पनं प्रायश्चित्तोन्मुखीभूतब्रह्महाद्यु
द्गजननार्थं न पुनः क्षयित्वादिलक्षणमुक्तानां द्वादशकाविव्रतप्राप्त्यर्थं संप्र
ग्रनिवृत्त्यर्थं वा ॥ तथाहि ॥ पापक्षयार्थं प्रायश्चित्तं न च प्रारब्धफलगापापूर्वविनाशे किं
चन प्रयोजनमस्ति ॥ न हि कार्मुकनिर्मुक्तो बाणो लक्ष्यवेधे वृत्तः ध्यापारस्यवालतां पुनर
पेक्षते ॥ न च तदारब्धफलनाशार्थापूर्वनाशोन्वेषणीयः न हि निमित्तकारणभूतचक्र
चीवरादिविनाशे तदारब्धकरकादिविनाशः न च नैसर्गिकं कौनख्यादिकं प्रत्यानेतुं
शक्यते ॥ किंच नरकतिर्यग्योन्यादिजन्यदुःखपरंपरामत्र भूतस्यादिकौनख्यादिकोवि
कारस्वरमं फलं तेन चोत्पन्नमात्रेण स्वकारणस्य सर्वनाशो जन्यते मंथनजनितामुमुक्षुणि

तस्यचसेवनात् ॥ अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति ॥ तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं
विशुद्धये ॥ एवयमस्यांतरात्माचत्वोवक्ष्येव प्रसीदतीति विहितमिति यदावश्यकं संध्योपास
नाग्निहोत्रादिकं नित्यम शुचिस्पर्शादौ नैमित्तिकत्वेन चोदितं स्नानादिकं च तदुभयमुच्य
ते ॥ विहितस्याकरणान्निंदितस्य निषिद्धस्य सुरापानादेः करणात् ॥ इंद्रियाणामनि
ग्रहाच्चनरः पतनमृच्छति ॥ प्राप्नोति प्रत्यवायी भवतीति यावत् ॥ नन्विंद्रियार्थेषु सर्वेषु
न प्रसज्जेत कामत इतींद्रियप्रसक्तेरपि निषिद्धत्वादिंद्रियाणां निग्रहणेनैव गतार्थत्वात्कि
मर्थमनिग्रहाच्चेंद्रियाणामिति पृथगुपादानं ॥ अत्रोच्यते ॥ इंद्रियप्रसक्तेर्निषेधस्यानैकां
ततः प्रतिषेधरूपतान्नातकधर्ममध्ये स्यपानात्तत्र व्रतानि मातिधारयेदिति ॥ व्रतप्र
स्तावाधिकारानां चाश्रवणाच्चेंद्रियप्रसक्तेः प्रतिषेधकः संकल्पो विधीयते ॥ स चोभयरूप इ
ति पृथगुपादानं ॥ ननु विहिताकरणात्प्रत्यवैतीति कुतो वासितं न तावदग्नि
